(गो. टी.)
१

उत्कर्षताप्रवृर्के

कारख्या:=४

१ योगा =३

॥ ॐश्रीगणेशायनमः॥ श्रीपरमेष्ठिगुरवेनमः॥ ॐ नत्वागजाननंदेवं भक्तानुग्रहकारकम्
ध्यात्वेष्टदेवताभक्त्यागोलव्याख्यांसमारभे॥१॥तत्रादौगणितशास्त्रस्यांलवनंकुर्वे॥एक
श्लोकेन॥यत्रानुपातःक्षितीशप्रदिष्टस्तत्राप्यमात्यौद्विघातत्रिघातौ योगौ शिष्टौनिरंघातभाग
दिकौ सेनानिकास्तत्रकोवैसमर्थः॥२॥तथापिभगवत्कृपयाकिंचिद्व्याख्यानंकरोमि॥श्रीः॥
मू:॥ गोलाध्यायेनिजेयायाअपूर्वाविषमोक्तयः॥तास्ताबालावबोधायसंक्षेपाद्विवृणोम्यहम्॥
॥१॥टी॥अत्रयायाइतिप्रथमांतंपदं॥तास्ताइतिद्वितीयांतंपदंबुद्धिमतांज्ञेयं॥निजेगोला
ध्यायेयायाअपूर्वानान्यैराचार्यैरुक्ताविषमोक्तयः॥तास्ता:नामतान्तानउक्तीन् अहंभास्करा
चार्यःसंक्षेपात् नामसंक्षेपेणयथास्यात्तथाविवृणोमि॥कस्मैप्रयोजनाय॥बालावबोधाय॥ १॥
अथग्रंथारंभार्धं निर्विघ्नंसमाप्तंतथेदमुत्तरार्धमारम्भणीयंसमाप्यतामितिकामनयाचक्रुतंनमस्का
ररूपंमंगलंशिष्यशिक्षार्थेचशार्दूलस्वतेनप्रतिजानीते॥मू॥सिद्धिंसाध्यमुपैतियत्स्मरणतःक्षिप्रं
प्रसादात्तथायस्याश्चित्रपदास्सलंकृतिरलंलालित्यलीलावती॥नृत्यन्तीमुखरंगेवकृतिनांस्या
द्भारतीभारतीतंतांश्चप्रणिपत्यगोलममलंबालावबोधंब्रुवे॥२॥टी॥अहंभास्कराचार्यःगो
लंब्रुवेकिंकृत्वातंचपुनःतांप्रणिपत्य॥सर्वनामांबुद्धिस्थवाचकत्वाद्बुद्धिस्थंदेवंदेवीचप्रणि

त्वा१

शि.व.
१

शायलक्षणः प्रकर्षः प्रशब्देन द्योत्यते ॥ भक्तिश्चाराध्यत्वेन ज्ञानं ॥ अज्ञातु वेदादिबोधितफला
ऽवश्यंभावः ॥ गोलं नाम भूगोलादिनिरूपकं ग्रंथं ॥ तस्यापि गोलपदवाच्यत्वात् ॥ तंकं ॥ यत्तन्नाम
यस्य परमेश्वरस्य तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतिप्रतिपाद्यस्य स्मरणतः नाम
ध्यानसंक्रांतः करणात्तु क्षिप्रं अविलंबं साध्यं नाम पुरुषकृतिविषयं अभीष्टकार्यं सिद्धिं नाम निष्प
न्नतां उपैति प्राप्नोतीत्यर्थः ॥ च पुनस्तां कां ॥ यस्याः देव्याः प्रसादात् अनुग्रहात् कृतिनो विदुषां भार
ती वाणी नृत्यंती भारती इव स्यात् ॥ भरतस्य नाम नर्तकस्य इयं भारती । नर्तकी स्त्री ॥ यथा भाग्य
वतां पुरुषाणां गृहांगणेष्वैरं गम्या नातिमभागम्या नर्तकी नायिका । का पुनर्नृत्यं करोति त
द्वत् विदुषां भारती नाम वाणी भवतीत्यर्थः ॥ अथ दृष्टांतदार्ष्टांतयोः साहश्यावगमाय तुल्यविशे
षणान्याह ॥ किंभूता भारती नाम विदुषां सरस्वती । चित्रपदा चित्राणि नानाविधानि पदानि सु
प्तिङंतरूपाणि विद्यंते यस्यां ॥ किंभूता नृत्यंती भारती नटी नाम चित्रपदा ॥ चित्राणि नानाविध
गायनपादानि अथवा चित्राणि नानाविधचरणांगविन्यासविशेषाणि विद्यंते यस्यां ॥ पुनः किं
भूता सरस्वती ॥ स्वलंकृतिः ॥ सुष्ठु दूषणरहिताः सगुणाः अलंकाराः वक्रोक्तिः अनुप्रासयमकश्लेष
चित्रपुनरुक्तिआभासाः शब्दालंकाराः उपमान अनन्वयोपमा उत्प्रेक्षा ससंदेह रूपक अपन्हुति अति

२

मंजुलस्य भावो लालित्यं ॥ लालित्यं चासौ लीला इति लालित्य लीला ॥ लालित्य लीला विद्यते यस्यां
सा लालित्य लीला वती ॥ लीला विलास इत्यर्थः ॥ पुनः किंभूता भारती नदी ॥ लालित्य लीलावती ॥ विला
सो गमनानि स्याञ्चेष्टा श्लिष्टं गया कृता ॥ कीं तया सुकुमारां गोऽपांगत्वं ललितं विदुः ॥ इति संगीत रत्ना
करोक्तं ललितं ज्ञेयं ॥ यस्य भावः लालित्यं ॥ लालित्यं चासौ लीला इति लालित्य लीला सा विद्यते यस्यां ॥
इति ॥ पुनः किंभूता भारती ॥ मुखरङ्गा ॥ मुखमेव रङ्गो मुखरङ्गः ॥ रंगो नृत्यस्थानं ॥ किंभूतं गोलं अमले
नामनिर्दूषणं ॥ पुनः किंभूतं गोलं ॥ बालावबोधं ॥ बालानां गणित ज्ञो ऽल्प त्व ऽज्ञा नां अवबोधः भूगोल
भादि यथार्थ स्थिति तत्त्वज्ञानं यस्मात्तथा ॥ केचिदाचार्याः ॥ सिद्धिः विद्याधीशत्वेन भारतीशब्दस्य वा
गर्थाभ्युपगमेन च अत्र श्लोके गणेश सरस्वत्योः प्रणमद्इत्याहुः तन्न ॥ भूगोलादीनामीश्वर मायया
निर्मितत्वात् स्वरूपनिरूपणारंभे तयोरेव नमस्कारयोः समुचितत्वात् ॥ अथवा क कथं नृत्यं तीति
चेत् । उच्यते ॥ तवत्त्वमन्त्तविन्दु सन्दोह सदृश मुरस सुकोमलोक्ति गुणगद्यपद्यमयी च चतुरजनम
नश्चमत्कारिणी वाणी नृत्यतीव भाति ॥ श्री ॥ आरंभे मंगलार्थः सिद्धि शब्दस्येति पूः ॥ इति ॥ १ ॥ श्री ॥ (स्पष्टोपः)
ननु गोलनिरूपणाऽऽरंभः प्रयोजनाभावाद्व्यर्थ इत्यतः प्रतिज्ञातं गोलनिरूपणं सप्रयोजनं शार्दूलच्छंद
न प्रतिजानीते ॥ मू॰ ॥ मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना प्रौढिं प्रौढसभासु नैति गणको
निःसंशयो न स्वयं ॥ गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते तस्माद्दस्म्युपपत्तिबोधविधये
॥ गोलप्रबंधोद्यतः ॥ २ ॥

प्रि॰ व॰
२

५तस्मात्कारणात् ५ १

॥टी॰॥ यत् द्युसदां ग्रहाणां मध्याद्यं दशविधं गणितं पूर्वाध्ये प्रतिपादितं तस्य ग्रहगणितनिरूपकग्रंथस्य उपपत्ति
बोधविधये ॥ तदुत्पादकयुक्तिरुपपत्तिः ॥ तस्याः ज्ञानार्थं यो विधिः नाम प्रकारः तन्निमित्तं गोलप्रबंधोद्यतः
गोलस्वरूपज्ञानप्रतिपादकग्रंथसंदर्भार्थं नामग्रथनार्थं गोलबंधार्थं वा अहं भास्कराचार्यः उद्यतः नाम प्रवृत्तः
अस्मि॰॥ तस्मात्कस्मात्॰॥ यस्मात् गणकः ग्रहगणितज्ञः उपपत्तिं विना नाम तदुत्पादनयुक्तिज्ञानव्यतिरेके
ण प्रौढसभासु नाम सदसत्पदार्थतत्वज्ञानेये दक्षाः तेषां समाजेषु प्रौढिं नाम सदसद्विवेचनदक्षत्वं नैति॰॥
कुतः यतः सगणकः स्वयं निःसंशयो न ॥ पुनः सा उपपत्तिः निर्जे गोले प्रत्यक्षतः दृश्यते किंवत्॰ करामल
कवत् यथा हस्तस्थिताऽऽमलक फलं चाक्षुषप्रत्यक्षेण निश्चित्य मम हस्ते आमलकोऽस्तीति ज्ञानं जाय
ते तद्वत्॰॥ अत्रामलकनिदर्शनं गोलस्वरूपाऽवगमार्थं ॥ किंभूता उपपत्तिः विमला नाम प्रत्यक्षप्रमा
णेन निर्दूषणा॰॥ गणकैः प्रत्यक्षप्रमाणात् निर्दूषणा करामलकवत्॰ ज्ञायते इति तात्पर्यार्थः ॥ दृश्यते ज्ञा
यते इति यावत्॰ प्रयोजनं तु॰॥ यथा ग्रहणस्याऽऽदेशकर्तुर्गणकस्योपपत्त्यऽज्ञस्य ग्रहणं कुतो भ
वतीत्यादि पंडितप्रश्नोत्तरदानसामर्थ्याभावेन लोकाऽमान्यत्वमतस्तदुत्पत्तिज्ञस्य तदुत्तरज्ञानसामर्थ्या
त् लोकमान्यत्वमेव उपपत्तिज्ञानप्रयोजनमिति॰॥२॥ ननु सूर्यसिद्धांतावार्षसंमतत्वेन मत्कर्तृक ग्रह
णाद्यादेशसंवादत्वेन च निश्चयज्ञानसंपादनादादेशोपजीव्यधर्मानुष्ठानसंभवादुपपत्तिज्ञानस्य वैयर्थ्यान्न गोल
निरूपणं व्यर्थमित्यतः उपजातिकयाह॰॥मू॰॥ भोज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च सभा
न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र ॥३॥ टी॰॥ अत्र सिद्धांतज्ञेषु मध्ये गोलाऽनभिज्ञः गणकः

ग्रहगणितज्ञः तथा तद्वन्न भाति ॥ नाम लोके न चमत्करोति यथा सर्वरसं नाम सर्वसामग्र्युपपन्नं भोज्यं
आज्यं विना घृतव्यतिरेकेण न भाति ॥ ननु मधुररसविवर्जितं च भोज्यं इति लक्षणेनैव तया विनिगमनाविरहा
च्च भोज्यपदार्थेषु घृतस्य मुख्यत्वं न युक्तं इति अस्वरसात् दृष्टांतरमाह ॥ च नाम अथवा राजविवर्जितं नाम
राज्ञा रहितं यत् राज्यं नाम भूम्याः खंडं स यथा न भाति तद्वत् ॥ ननु नियंतारं विना राज्यस्य सोपद्रवत्वसंभवात्
राज्ये नाम राष्ट्रे राज्ञो मुख्यत्वं न तथा गणके गोलाभिज्ञत्वं मुख्यं इति दृष्टांतदार्ष्टांतयोर्वैषम्यं आयातं इ
ति अस्वरसात् दृष्टांतरमाह ॥ सभा सुवक्तृहीना यथा लोके न भाति तथा ॥ इव यथार्थे ज्ञेयः ॥ यथा साधारण
पंडितसभा लोके मनोहराऽपि अतिपंडिताग्र्येण अतिमनोहरा: तथा केवलग्रहगणितज्ञैः व्यवहारसिद्धौ
अपि गोलज्ञतया उपपत्तिज्ञानाधिक्यात् गोलाभिज्ञगणकस्तेभ्योऽधिकः इत्यधिकत्वसंपादनार्थं गोल
निरूपणमवश्यं अर्थमितिभावः ॥ ३ ॥ ननु अधिकत्वाऽनपेक्षया तन्निरूपणं व्यर्थमेव अन्यथा शास्त्रांतरश्रम
प्रज्ञानस्यापि निरूपणापत्तिरित्यतः शार्दूलवृत्तेनाह ॥ मू० ॥ वादी व्याकरणं विनैव विदुषां धृष्टः प्र
विष्टः सभां जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभंगवक्रोक्तिभिः ॥ ह्रीणः सन्नुपहासमेति गणको गोला
ऽनभिज्ञस्तथा ज्योतिर्विद्सदसि प्रगल्भगणकप्रश्नप्रपंचोक्तिभिः ॥ ४ ॥ टी० ॥ गोलाऽनभिज्ञः गणकः ज्यो
तिर्विद्सभायां प्रगल्भगणकप्रश्नप्रपंचोक्तिभिः ॥ प्रगल्भाः नाम कल्पकाः ये गणकाः गोलस्वरूपतत्त्वज्ञाः ते
षां प्रश्नाः पूर्वपक्षाः तत्संबंधिनो याः प्रपंचोक्तयः ॥ नानाविधभंगिभिः वचनानि तैः सह उपहासं एति ।
नाम प्राप्नोति कथं ॥ यथा । वादी नाम तर्कशास्त्रादिवादी व्याकरणव्यतिरेकेण विदुषां पंडितानां या सभा तां

सभां धृष्टः सन् लज्जारहितः सन् प्रविष्टश्चेत् तत्र सभ
यान् नाम नास्ति वादि तर्कसंगतानां वाक्यानां तत्
पंडितो भवेत् कुं

व्याकरणं विनावादि

^१पटु:नाम=१

अल्पमतिः नाम स्वाऽज्ञानगोपनाऽसमर्थः वादीपुरुषः वै पटुवटुः नाम व्याकरणादि शास्त्रेषु कुशलाः ये वै टुना
म वटवः बालकाः शिष्याः वा तेषां ये भ्रूभंगाः तैः द्योतिताः याः वक्रोक्तयः ॥ कथमनेनाऽशुद्धं संस्कृतं प्रमे
य मुच्यते इत्यादयः ॥ ताभिः वक्रोक्तिभिः ह्रीतः सन् नाम पंडितबालकाः अपि मां मूर्खं ज्ञात्वा वक्रोक्त्या उप
^५उपहासं स्पृति.
^५=४
हसंति इति अहं एतादृशः मूर्खोऽस्मीति लज्जितः सन् पुनः एते बालाः साधुः नाम स्वदोषज्ञाः इति मनसि
विचारं करोति ॥ यथा एतादृशः वादी उपहासं एति तथा गोलाऽनभिज्ञः गणकोऽपि उपहासं एति इति
कलितोऽर्थः ॥ तथा च केवलग्रहगणितज्ञस्य उपपत्तिपरिज्ञानात् लोके तद्वचनाऽप्रामाण्यात् उप
पत्तिज्ञानाऽवश्यकत्वेन गोलनिरूपणं नत्वधिकज्ञानार्थमिति न तद्वैयर्थ्यमिति भावः ॥ सर्वज्योतिर्वि
दऽन=८
द्भूवेष्टिततेन तद्वचनाऽप्रामाण्यं ॥ ज्योतिर्विद्भिर्भूतत्वाच्च ~~मन्ने~~ एवकारः मूर्खसभायां वक्ष्येदार्थः ॥ ४॥
ननु उपपत्तिज्ञानप्रयोजकगोलस्वरूपनिरूपणं व्याकरणवत् सिद्धांतनिरूपणभिन्नत्वेन युक्तं । नहि सिद्धां
^५निरूपणस्य
^५मये=५
ते पदार्थी देशांतु उपपत्तिरपि उद्दिष्टा येन तन्निरूपणं संगतं तस्मात् ग्रहगणितप्रतिपादनानंतरं द्विधा
गणितप्रतिपादनं ॥ तदनंतरं च सोत्तरप्रश्नप्रतिपादनं ततो भूमध्याप्रसंग्रहसंस्थिति कथनमित्या
दि युक्तमित्यतोऽग्रगोलनिरूपणसमर्थनकृत्ये न प्रतिज्ञातगोलबंधवशात् अग्रे उक्त गोलबंधादि
द्गोलस्य प्रयोजनमिंद्रवज्रयाह ॥ मू ॥ दृष्टांत एवाऽवनिभग्रहाणां संस्थानमानप्रतिपाद
नार्थं ॥ गोलः स्मृतः क्षेत्रविशेष एव प्राज्ञैरतः स्याद्गणितेन गम्यः ॥ ५॥ टी ॥ अवनिभग्र

^५अर्थात् गोलप्रतिपादनं न युक्तं=३
निरूपतां

(गो॰ टी॰ ८)

५

नामयुक्तिभिः स्थितिस्वरूपनिश्चय इत्यर्थः तत्प्रतिपादनार्थं नामनिरूपणार्थं गोलः वक्ष्यमाणगोलबं-
धप्रकारेण सिद्धभ्रमादिवेधादिविधौ तज्जनितगोलः दृष्टान्तएव ॥ एवंकारान्नवस्तुरूपः प्राज्ञैः गोल-
स्वरूपतत्त्वज्ञैः स्मृतः प्रोक्तः तथा चोपपत्तिज्ञानार्थं गोलस्वरूपनिरूपणं दृष्टान्तं सुज्ञेयं न भवती-
ति हेतोः गोलबंधविधिना दृष्टान्तः सिद्धः कृतः ॥ गोले भूधिष्ण्यग्रहसंस्थितिज्ञानात् सिद्धान्तवक्तार्थस्यै-
गोलसंज्ञा=५ वनिरूपणं। यत्तु गोलनिरूपणं ॥ चोपपत्तेरपि तदन्तर्गतत्वात् ॥ एतस्य दृष्टान्तत्वे किंमानमत उक्तं ॥ स गोलः
क्षेत्रविशेषएव ज्ञेयः ॥ गोलस्वरूपनिरूपणे यानि क्षेत्राणि जात्यत्र्यस्त्रक्षेत्राणि ज्ञातानि तान्यत्र बंधादि-
रूपत्वगोलेन न प्रत्यक्षाणि किंतु तिर्यगूर्ध्वाधरसूत्ररूपत्वादिसंबंधेन क्षेत्रविशेषएवोक्तः ॥ सूत्रस्य रूपत्वादि-
ना यत्संबंधः तेनेत्यर्थः ॥ अतः गोलस्य क्षेत्रात्मकत्वेन क्षेत्रविशेषाभ्युपगमात् ग्रहबिंबानामाश्रयत्वेन दृ-
ष्टान्तत्वमिति भावः ॥ गोलस्य क्षेत्रात्मकत्वात् एषः गोलः गणितेन पाटीगणितेन गम्यः नामज्ञेयः स्यात् ॥
ननु प्रश्नानामानन्त्यात् तदुत्तराणामुपपत्तिभिः तत्त्वनिश्चयादनुक्तप्रश्नोत्तरज्ञानसूचकप्रश्ना-
ध्यायप्रतिपादनं गोलनिरूपणात्पूर्वमनुचितं ॥ प्रश्नास्तथा सोत्तरा इति पूर्वं प्रश्नस्य लाघवाद्गोले प्र-
श्नोद्देशासिध्यर्थमितिध्येयम् ॥ ५ ॥ नन्वेवं ग्रहगणितनिरूपणात्पूर्वमेवाधिधागणितनिरूपणपूर्वकं
गोलनिरूपणापत्तिः गोलस्य पदार्थज्ञानादेव ग्रहाऽनयनाद्युत्पत्तेः ग्रहगणितस्य संकलनादि-
षड्विधसापेक्षत्वात् पाटीगणितं विना तदनुपपत्तेश्चेत्यतः शार्दूलविक्रीडितेनाह ॥ मू० ॥ ज्योतिः-
शास्त्रफलं पुराणगणकैरादेश इत्युच्यते नूनं लग्नबलाश्रितः पुनरसौ तत्स्पष्टखेटाश्रयं ॥ ते गो-

शिव॰ ८

नाम=२

टी०॥ पुराकल्पकैः वराहमिहिरादिभिः ज्योतिःशास्त्रस्य संहिता जातक गणितस्कंधत्रयात्मकस्य
फलं नाम प्रयोजनं आदेशः वर्तमानभूतभविष्यत् शुभाशुभकथनं उच्यते अंगीक्रियते कुतः
तच्छास्त्रेण तन्निरूपणनिश्चयाद्धेतोः इत्यर्थः॥ पुनः वाक्यालंकारे॥ असौ आदेशः नूनं निश्चयेन
लग्नबलाश्रितः॥ पुनरिदं लग्नबलं स्पष्टग्रहाधीनं॥ तस्मात् ज्योतिःशास्त्रप्रतिपाद्यादेशाः साक्षात्परंप
रया वा स्पष्टग्रहाधीनाः इति सिद्धं॥ ते स्पष्टग्रहाः गोलाश्रयिणः गोलस्थितत्वेन प्रत्यक्षाः॥ पुनः गणि
तं अंतरेण नाम ग्रहगणितव्यतिरेकेण गोलः न ज्ञायते अपि शब्दात् स्पष्टग्रहोपजीव्यं यत् ग्रहणा
दिकं सोपि न ज्ञायते तथा च किं ज्ञातं॥ ग्रहगणितज्ञानाधीनं गोलज्ञानं॥ यः पुरुषः गणितं न
वेत्ति स गोलादिकं कथं ज्ञास्यति॥ अपि तु न ज्ञास्यतीति फलितोर्थः ननु गोलनिरूपणे
एव ग्रहगणितादिपदार्थस्य सामान्यतो ज्ञानसिद्धेः नहि गोलज्ञाने ग्रहगणितज्ञानस्यापेक्षा
इत्यत उक्तं॥ तस्माद्यः गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति इति॥ एतेन सिद्धांतसुंदरे
ग्रहगणितादिकं गोलाध्यायानंतरं निरूपितं तदपास्तम्॥ ६॥ अथ वादीत्यादिश्लोकत्रय
सिद्धांतज्ञो गोलाध्याये विवक्षुः स्वरूपं लाघवान्मालिन्याह॥ द्विविधगणितमुक्तं व्यक्तमव्यक्त
संज्ञं तदवगमननिष्ठः शब्दशास्त्रपटिष्ठः यदि भवति तदेदं ज्योतिषं भूरिभेदं प्रपठितुमधिकारी सोन्य
था नामधारीति॥७॥ टी०॥ व्यक्तमव्यक्तसंज्ञं द्विविधगणितं उक्तं नाम अस्मिन् ग्रंथे प्रकारद्वयेन व्य

क्तमव्यक्तसंज्ञितं गणितं तन्नामगणितं निरूपितं॥

(गो.टी.)
५

१ नाम=२ १ पुरुष:=२

उक्तो ध्योगमाह ॥ तद्वगमनेनाम तयोर्द्विविधमस्तित्येर्थ वगमनेज्ञाने निष्ठः निश्चययस्यानुयः पुरुषः पुनः शब्दशास्त्रे पठिष्ठः अतिशयेन पटुः कुशलश्चयः पिपठिषुः स यदि एताद्दशो भवति तदा इदं प्रसिद्धं ज्योतिःशास्त्रं भूमिभेदं गोलगयभूगोलखगोलदृग्गोलप्रश्नाध्यायात्मकं ग्रंथैकदेशं प्रपठितुं तस्य तत्त्वज्ञातुं अधिकारी भवति ॥ अन्यथा नाम उक्तलक्षणाभावे नामधारी अर्थी केवलं पिपठिषुरेव भवति न तत्त्वज्ञाने कुः भवति ॥७॥ ननु वादीत्यादिना दृष्टांत द्वारेण शास्त्रं तदं विना याकरणमप्रयोजकं इत्युक्तं ॥ पुनः ज्योतिःशास्त्रं तथा नोक्तं ॥ अग्रयाकरण स्यानापन्न गोलाध्याय स्याऽभ्युपगमात् शब्दशास्त्रे पठिष्ठः इत्युक्तमनुपयुक्तमित्यतः सिंहावलोकनयाह ॥ मू. ॥ यो वेद वेदवदनं सदनं हि सम्यक् ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रं ॥ यस्मादतः प्रथममेतदधीत्य धीमान् शा [दा=२]
...शास्त्रं ... [सम्यक्=५]
स्त्रांतरस्य भवति श्रवणेऽधिकारी ॥८॥ टी. ॥ यः पुरुषः वेदस्य वदनं व्याकरणं वेद जानाति सः पुरुषः वेदं नाम ब्रह्मणः स्वरूपं अपि वेद नाम जानाति ॥ किंभूतं वेदवदनं व्याकरणं ब्राह्म्याः सरस्वत्याः सदनं नाम गृहं ॥ यस्मात्कारणात् एताद्दशः पुरुषः स अन्यशास्त्रं किं न जानाति अपितु जानात्येव ॥ अतः अस्माद्धेतोः धीमान् पुरुषः एतत् व्याकरणं प्रथमं अधीत्य पश्चात् स पुरुषः शास्त्रांतरस्य श्रवणे नाम पठने अधिकारी भवति ॥ योग्यो भवतीत्यर्थः ॥८॥ श्रीकृष्णाय ॥

शिव.
५

ऽपठनेपिपठिबुः १ ॥

अथात्मनो गोलग्रन्थस्य प्रशस्ततां अन्योक्तिप्रकारेणाऽऽचार्यभास्करः मंदाक्रान्तया वृत्तेनाह ॥ मू ॥ गोलं श्रोतुं यदि तव मतिर्भास्करीयं शृणु त्वं ॥ नो संक्षिप्तो न च बहु वृथाविस्तरः शास्त्रतत्वं ॥ लीलागम्यः सुललितपदः प्रश्नरम्यः स यस्मात् विद्वन् विद्वत्सदसि पठतां पाण्डितीं व्यनक्ति ॥ ९ ॥ टी ॥ अनेन श्लोकेन आचार्यः आत्मनो गोलस्य नाम स्वकीयगोलस्य पठनार्थं अन्येषां प्रवृत्तिर्भवेत् यथा तथाह नाम तदर्थं श्लोकयोजना ॥ आह ॥ प्रत्यर्थो वाक्यार्थः ॥ हे विद्वन् यदि तव मतिः गोलं श्रोतुं नाम पठितुं अस्ति तदा त्वं भास्करीयं नाम भास्करप्रणीतं गोलं शृणु नाम पठ ॥ ननु अन्यप्रणीतानां सत्वात् दत्राग्रहः कथं ॥ अत आह ॥ यस्मात् कारणात् स भास्करीयः गोलः पठतां पुरुषाणां विद्वत्सदसि पंडितसभायां पांडित्यं किं नाम पंडितत्वं व्यनक्ति व्यनक्ति प्रकाशयति ॥ अन्यो गोलः पठितुं तादृशो नाऽस्ति यत्वान्मदुक्तोऽयं गोलग्रंथो नव्यार्थ इति भावः कस्मात् पांडित्यं व्यनक्ति यतः स भास्करीयगोलः शास्त्रतत्वं अस्ति नाम सकलगोलग्रंथसारभूतं अस्ति ॥ किंभूतः भास्करीयः गोलः ॥ न संक्षिप्तः । नाम अल्पविचारः न ॥ पुनः किंभूतः ॥ बहु वृथाविस्तरः न च नाम यथार्थाक्षया विस्तृतोपि न कृतः ॥ नन्वेतादृशो ग्रंथः कठिनो भवति अत आह ॥ पुनः किंभूतः लीलागम्यः ॥ किंचिदुपदेशेन एव एतस्य गोलस्य बोधो भवतीत्यर्थः ॥ अग्रे हेतुगर्भं विशेषणं मोहतः ॥ कथं लीलागम्यः ॥ अत आह ॥ यतः सुललितपदः प्रश्नरम्यः ॥ सुललितानि पदानि विद्यन्ते येषु प्रश्नेषु तादृशैः गोलोक्तप्रश्नैः रम्यः ॥ रमणीयः ॥ अत एव लीलागम्यः ॥ तथा च ललितपदैः पद्यानां दुर्गमार्थत्वाऽभावात्व श्रुतात्पर्यबोधेन तदुत्तरजिज्ञासयोत्तरपद्यान्यपि तादृशपदैर्न दुर्गमार्थानीति लीलागम्योऽयं गोलाध्यायः इति भावः ॥
॥ १ ॥

कुरु=४

(गो.टी.) ६

पाञ्चालाख्य =२ का१

॥श्रीः॥ शालिग्रामकृतामयूखमतिभा ज्योतिर्विदां प्रीतिदा बालानां हितकारिणी च सुखदा सा
का२ द्धान्मनोल्लासिनी ॥ तस्येयं खलु गोलसंस्तुतिरतो नीता समाप्तिं मया पञ्चालाख्य निवासिनः पटुवयू
नु मा स्यापतोऽतिश्रमः ॥ १ ॥ इति श्रीदेवकृष्णात्मजसुतशालिग्राम विरचितायां मयूखमा गलक =२
6 लीयां गोलप्रशंसा समाप्ता सं. १९४१ पौष प्र. ६ ॥ श्रीगणेशाय नमः ॥ अथ स्वाध्याय प्रतिपादितग्र
हगणितोत्पत्त्यवगतभचक्रसंस्थानं ॥ तन्मध्यस्थितत्वेनावगतभूमिगोलस्य निराधारत्वाऽऽधारप्रश्नव्या
जेन भूमेर्निराधारतामनुष्टुभाऽऽवेदयति ॥ मू. ॥ भ्रमद्भचक्रचक्रांतर्गगने गगनेचरैः ॥ रक्ताध्वताध
राकेनयेनने यम्भियाद्धः ॥ १ ॥ टी. ॥ भ्रमद्भचक्रचक्रांतः नाम भानां अश्विन्यादिनक्षत्राणां चक्रं समूहः
तस्य भसमूहस्याऽऽश्रयीभूतं यच्चक्रं नाम पांचभौतिकं गोलाकारं वस्तुविशेषः तच्छ्गोलाकारं वस्तु भ्रमतः ८
विशेषस्य [illegible] अंतर नाम मध्ये केंद्राख्यप्रदेशे गगने स्थिता धरा भूः गगनेचरैर्ग्रहैः चंद्रबुध
शुक्रादिभिः रक्ता नाम समंततो रक्षिता ॥ एतदुक्तं भवति । यथा नक्षत्राधिष्ठितगोलो भूमेः
समंतात्तुल्यांतरेणास्ति तथा ग्रहाख्यंदंतर्गता कक्षा भूमेः तुल्यांतरेण भ्रमंती स्वस्थाः ॥ एतादृ
शीयं स्वाश्रयगम्या अत्यद्भुता भूः केनाधारेण धृता सती येनाधारेण लेयं भूः अधस्तान्न
धःप्रदेशाऽऽकाशविशेषादधो भागे नेयात् न गच्छेत् तं आधारं वदेत इति शेषः ॥ अथोत्तरष्टाभ्या
केतत्पूर्वोक्तं न युक्तिसहं ॥ आधारपरंपरया भ्रमद्भचक्रचक्रेण सहाऽऽधारस्य संलग्नत्वात्स्यात् । अतो

शिव. ६

किंचिदपि बहुगुरुत्ववान् आकाशे आधारं विना स्थिरा न दृश्यते अतो भूमेरधः पतनं युक्तं ॥ अतः भ
गोलस्य समंतात् तुल्यांतरे भूमिरिति पूर्वोक्तं न युक्तमहं ॥ इत्यनेन श्लोकेन नक्षत्रग्रहस्वरूप संस्थानं प्रवहवाय्वा
दीनां प्रश्नोपि सूचितः ॥ १ ॥ ननु आधारपरंपरायां अपि आधारं ग्रहनक्षत्राणि विभिद्य गच्छंतीति तत्
भ्रमणे बाधकाऽभावात् गणितताऽनुपपत्तिर्न इत्यतः भूमेः प्रश्नविशेषच्छलेन गणितैकदेशानुपपत्ति ऋ=३
मनुष्टुभाह ॥ मू० ॥ किमाकारा कियन्माना नानाशास्त्रविचारणात् ॥ कीदृग्द्वीपकुलाद्रीन्द्रसमु
द्रैर्मुद्रितोच्यतामिति ॥ २ ॥ टी० ॥ भूः किमाकारा इति उच्यतां निर्णीयतां ॥ भूमेराकारः कथमस्तीति वि
चारणीयं ॥ तथा च भुवो मुकुरोदराकारत्वस्य प्रत्यक्षसिद्धत्वेन सर्वदेशे युगपत्सूर्योदयास्तसंभावनया पि
न मानभेदाऽनुपपत्तेः क्षितिजभेदाऽभावात् अतः दिनमानभेदचर देशांतरोपपत्त्यर्थं क्षितिजभेदस्या
वश्यकत्वेन ॥ पुनः क्षितिजभेदस्य गोलाकारत्वे सूपपन्नत्वात् तन्मते भुवो गोलाकारत्वसिद्धौ प्रत्यक्षबा
धो महादोषः इति भावः ॥ ननु यथा चंद्रबिंबं अस्माभिः शृंगोन्नत्युपजीव्योपि मंडलाकारतया प्रती
यते तथैव भूगोलोपि केनचिद्दोषेण आदर्शाकारत्वेन प्रतीयते इति न दोष इत्यत आह ॥ किय
न्मानेति ॥ भूः कियन्मानं प्रमाणं यस्याः ॥ भूमिः कियत् योजनपरिमितास्तीति निर्णीयतां
नानाशास्त्रविचारणात् नाम पुराणज्योतिषार्षग्रंथानां एकवाक्यत्वरूपात् भूः कियन्मिता
इति निर्णीयतामित्यर्थः ॥ एकवाक्यताकरणस्य प्रश[illegible]प्यप्राकयः अतः भूमानजनितगणि
तादीनामुक्तदोषापत्तिः ॥ ननु यत्त्वया ध्यानीतं गणितं संभवति स एव भूपरिधिस्तेन न गणिततो केद

इत्यत आह ॥ कीदृग्भूमिरिति ॥

गो॰टी॰

॥ ...

पुनः द्वीपकुलाद्रिद्रुसमुद्रैः मुद्रिता नामव्याप्ता इयं भूः कीदृक् नाम कथमस्तीति निर्णीयतां ॥ कुलाद्रीनाम
कुलपर्वता ॥ इंद्रपदादन्यपर्वतेभ्यः श्रेष्ठा इत्यर्थः ॥ तथा च भुवो गोलाकारत्वे तस्याो लस्योर्ध्वभागस्य
स्वल्पत्वेन तत्रोर्ध्वभागे द्वीपकुलाद्रीणामवस्थानस्याऽसंभवात् अन्यत्र तिर्यगधःस्थत्वेन पतनसंभ
वात् तेषामवस्थानाऽसंभवाच्च ॥ मुकुरोदरत्वेतु अवस्थानस्य संभवस्तदा देशांतरादिगणितो केद॰
॥२॥ अथ भचक्रसंस्थानमूलकत्वेन ग्रहगणितजातं प्रामान्यतो निरस्य गणितो क्त्यापितन्निराकर्तुं शा
द्यु= दूलवृत्तेन गणितप्रश्नानाह ॥ मू॰ ॥ संसिद्धाद्द्युगणाद्युगादिभगणैः क्षेपोऽनुपातेन यः स्यात्तस्यास्फुटताक
थ= थं कथमथ स्पष्टीकृतिर्नैकधा ॥ किं देशांतरसुझ्मांतरमहोवाक्तरं किंचरं किंचोच्चं मृदुचंचलं च
तदिदं कलातपातः स्फुटइति ॥३॥ टी॰ ॥ संसिद्धात् नाम उपपत्तिसिद्धत्वेनाऽदुष्टात् द्युगणात् नाम अह
सह= र्गणात् युगादिभगणैः अनुपातेन यः खेटः सिद्धस्तस्य खेटस्य अस्फुटता कथं नाम अवास्तवत्वं कथं भ
वति ॥ अर्थात् अहर्गणादिना नावास्तवत्वात् तज्जनितो ग्रहः स्पष्टः कथं न स्यात् मध्य... कुतो जातः
इत्यनेन मध्याधिकारः खंडित इति भावः ॥ ननु अनुपातानीतग्रहस्याऽऽकाशेसंवादाऽभावात् एव फ
लवत्वकस्य अतः मध्यमत्वं तस्य ॥ न मध्यमाधिकारस्य वैयर्थ्यम् इत्यत आह ॥ कथमिति ॥
अथ यथाकथंचित् असंवादात् ग्रहस्य मध्यमत्वेस्थापितेपि ग्रहाणां स्पष्टीकृतिः स्पष्टक्रिया एकधा
नोमस्एकप्रकारेण कथं नोक्ता ॥ यथा मध्यग्रहा एकानुगताऽनुपातेन उक्तास्तथा ते स्पष्टग्रहाः य

(द्यु= ॥ अहर्गणम् ... आदिपदेन कल्पभगणैरित्यर्थः ॥ =द्यु)

शिव॰

ननूक्तस्पष्टक्रियया ग्रहाणां संचारः तदभावात् स्पष्टक्रियाप्रतिपादकाधिकारेण व्यर्थ इत्यत आह
किमित्ति॥ देशांतरं मध्याधिकारोक्तं किं नाम किमर्थं व्यर्थमित्यर्थः॥ अहो इत्याश्चर्ये स्पष्टाधिका
रोक्तं उन्मांतरं नाम उदयांतरं किं कल्पितं पूर्वग्रंथेष्वनोक्तत्वात् त्वया स्वबुध्या कल्पितं उदयांतरं यत्
तदप्ययुक्तं॥ प्राचीनोक्तस्य संस्थानमेव संप्रति दृग्घटं जातमीति कथमधिकं कृतं इति महदाश्चर्यं परं॥
पुनः चरांतरं नाम भुजांतरमप्ययमपि संस्कारो व्यर्थ एव च पुनः चरं किं कृतं सोपि व्यर्थ इत्यर्थः॥ एते चत्वा
रः संस्कारा ग्रहस्य उदयकालीनत्वसिध्यर्थमुक्ताः॥ पुनः अहर्गणस्य सूर्योदयकालीनत्वात् तज्जनितो ग्र
पुनः= होऽपि सुतरामुदयकालिक एव॥ अतः एते संस्काराः असंगता इति प्रतिभाति॥ किं च॥ भूमेर्भुकुरोदरत्वे किमर्थकाः=
सर्वत्रोदयकालैक्यात्। गोलाकारत्वे तु अहर्गणस्य लंकोदयकालिकत्वमानाऽभावात् स्वदेशोदयकालिक
त्वमेवास्तां॥ एतेन मध्यस्पष्टाधिकारयोर्व्यर्थत्वेपि देशांतरादिसंस्कारप्रतिपादनेनाऽनयोरेकदेशो व्यर्थः
इति भावः॥ ननु तथापि तयोरसंगतत्वं न सिद्धमित्यत आह॥ किंचेति॥ ग्रहचलनजातं मृदु च पुनः चं च
लं यदुक्तं तत् किं स्यात् अर्थात् मंदोच्चं च पुनः शीघ्रोच्चं कथमाकाशेऽस्तीत्यर्थः ग्रहाणां खेदर्शना
त् तेषां भगणादिनां ग्रहनिरूपणे युक्तं। उच्चानां आकाशे दर्शनाऽभावात् तस्य तेमानां भावात् क च=
थं तेषां भगणयुक्तं संगच्छते अतः मध्याधिकारस्त्वऽयुक्तः तदुपजीव्यः स्पष्टाधिकारोपि व्यर्थ
त इति भावः॥ अथ प्रसंगात् तदुपजीव्यत्वेन निरस्तानां अधिकारांतराणां स्फुटोक्त्या निरासार्थं प्रश्न

गो. टी.
८

४

स्पष्टतः = १

हे तात नाम पितः मध्याधिकारे भगणादिनाऽऽनीतः पातः कः नाम किं स्वरूप आकाशेऽस्ति ॥ तथा
च । खेपातस्वरूपदर्शनात् पातसत्वेमानाऽभावात् तैपातजनितशरेऽपि मानाभावाच्च तदुपजीव्यग्र
हणग्रहच्छायादि अधिकारोक्तं सर्वं व्यर्थमितिभावः अतस्तदधिकाराः खंडितप्रायाः ॥ अत्र ॥ अज्ञः सु
खमाराध्यः सुखतरमाराध्यते विशेषज्ञः ॥ ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रंजयति ॥ १ इत्युक्त्या
स्पष्टाधिकारखंडने तत्वज्ञेन उपेक्षणीयं इति ॥ अतस्तात इति संबोधनं ॥ यथा पितुरग्रे बालकेन यत्
किंचित्संगतमसंगतं वा खंड्यते तत्सर्वं पित्रा तन्मनः समाधानपूर्वकं समाधीयते तथा त्वदग्रे संगत
मसंगतं वा मया यत्खंडितं तत्सर्वं मन्मनः समाधानपूर्वकं त्वया समाधीयतामिति तात्पर्यं ॥ ३ ॥ ननू
च्चादीनां स्वरूपाऽदर्शनेऽपि मध्यमस्पष्टग्रहांतररूपफलस्य तदुपजीव्यत्वेन तत्सद्भावान्न पूर्वाधिका
रयोरसंगतत्वमित्यतः शार्दूलच्छंदेनाह ॥ किं केंद्रं किमु केंद्रजं किमु चलं किं वा ~~[illegible]~~ चलं तत्फलं
कस्मात्तद्धि ततः कुतश्च सहितः खेटः स्फुटो जायते ॥ किं दृक्कर्म तथोदयास्तसमयौ द्वेधा विदध्यु
र्बुधाः सर्वं मे विमलं वदामलकं कमलं गोलं विजानासि चेत् ॥ ४ ॥ टी. ॥ ग्रहोच्चांतररूपं केंद्रं किं
का = किमात्मकमाकाशेऽस्ति ॥ केंद्रजं किमु नाम केंद्रोत्पन्नभुजकोटि तज्ज्यादिकं च किमात्मकमस्तीत्यर्थः
तत्फलं तस्याः भुजज्यायाः उत्पन्नफलं चलं नाम शीघ्रफलं किमु अचलं नाम मंदफलं ~~[illegible]~~ किं
अर्थादेकरूपेणैकेव कथं न साधितं सर्वेषां फलं इत्यग्रयुक्त्याऽभावात् अनुपपन्नः स्पष्टाधिकार इति

शिव. ८

॰तत्र्मा १

नन्वेतदं येनकेनप्रकारेणनीयतां अतर्हि॰॥ कस्मादिति॰॥ खेट॰ मध्यग्रहः तत्नामफलेनरहितः
कदाचित्स्फुटोजायते हेतुकस्माद्धेतोः॥ चपुनः कदाचित् तत्नामफलेन सहितः स्फुटः कुतोहे
१ किंजातं=२ तोः जायते तेषां च मंदफलं मेषतुलादिकेंद्रे ऋणधनं शीघ्रफलं तु धनर्णं इत्यादि नियमेप्रमा
णाऽभावात् हेतोन उनरेकरूपस्य औचित्याच्च॰॥ स्पष्टाधिकारस्त्वऽयुक्तइतिभावः॥ ननु द्दक्कर्मा ॰एव=४
म्य संपादनोत्फलवलसिद्धं तयो वैजात्यं अतोनकिंचिद्विरुद्धं अतआह॥ किमिति॰॥ वुधाः नाम
तदऽभिज्ञाः तथाउदयास्तसमये दृक्कर्मद्वेधा नाम द्विधाभूतं आयनं आक्षं च संज्ञं विदधुः
तत्किंनामकिमर्थं॥ उदयास्तलग्नयोः सूर्याधीनत्वात् उदयास्तलग्नसाधनार्थमेव दत्त इानमतः
द्दक्कर्मसंस्का रप्रयुक्तमितिभावः॥ तस्मात्पूर्वार्धे प्रतिपादितंगणितंसर्वमयुक्तमित्युपसंहरति॥ चेत्यदि अमलं
नामनिर्दूषणं अलंनाम अत्यर्थं अर्थात् अत्यन्त अर्थ पूर्वकं गोलं भूगोलं खगोलं दृग्गोलात्मकं त्वं ॰ब्रह्मादिसुक
विजानासि तर्हि मे नाम मम सर्वं पूर्वार्धोक्तगणितजातं विमलं निर्दूषणं यथास्यात्तथावद॰॥ =विरचितं ॰ह
पूर्वार्धे पदार्थानां स्वरूपस्य प्रतिपादनाऽभावात् सर्वं गणितजातं मे मे संगतमितिभावः॥४॥
अथ दिनरात्र्योरुत्तरगोले महदल्पत्वं दक्षिणगोले ल्पमहत्त्वं सिद्धं यत्तत्तं कुत विलंबितेनसंवऽय
ति॰॥मू॰॥ महद्दहः किमहोरजनी तनुर्दिनमणौ गणको त्तरगोलगे॥ ननु तनुर्दिवसो महती
निशा वद विचक्षण दक्षिणदिग्गते॥५॥ टी॰॥ हे गणक मामगणितज्ञ साय नदिनमणौ ना=१
=॰चरघटीसहितारहितात्इत्यादिना॥=३

गो॰टी॰ ८

१ नाम १ १ महत्त्नाम १९

किं नाम १४

उत्तरगोलगे नाम उत्तरगोलाधिष्ठिते सति अहोरात्र्याश्चर्ये अहः १ दिवसः १ महान् कृतो भवति रात्रिः

१ किंनाम २ स्तनुः नाम अल्पा कृता भवति भूमेर्विकृतत्वेनोदयास्तयोः कल्प्यत्वाच्च गोलसंधौ दिनरात्र्योस्तु

१ ल्यत्वेनाग्ने उत्तरगोले दिनरात्र्योर्वैषम्यं कुतः संजातो कारणाऽभावात् विपरीतमेव किन्न

जातमित्याश्चर्यपरं ॥ एवं दक्षिणदिग्गतेः नाम दक्षिणगोलस्थे सायन दिनमणौ हे विचक्षण

नामपदार्थस्वरूपविचारक ननु इति वितर्के दिवसः तनुः नाम अल्पः किं च पुनः निशा म

हती किं ॥ अत्र कारणं वद ॥ एतेन दिनरात्र्योरुत्तरदक्षिणगोलक्रमेण विसदृशत्वमयुक्तं सदे

करूपस्य युक्तत्वात् अत उक्तं दिनरात्र्यो विसदृशत्वमसंगतं युक्त्यऽभावादिति भावः ॥५॥

अथ प्रसंगात् देवपितृप्रजापतीनां मध्याधिकारोक्ताऽहोरात्राणि द्युतविलंवितेन वं(?)

यन्ति ॥ मू॰ ॥ भवति किं द्युनिशं द्युनिवासिनां द्युमणि वर्षमितं च सुरद्विषां ॥ पितृषु किं शशि

मासमितं तथा युगसहस्रयुगं द्रुहिणस्य किं ॥ ६ ॥ गो॰टी॰ ॥ द्युनिवासिनां देवानां च पुनः सु

रद्विषां दैत्यानां द्युमणि वर्षमितं नाम सौरवर्षमितं द्युनिशं अहोरात्रं किं भवति कस्माद्धेतो

भवतीत्यर्थः ॥ कथया तु तथा उक्तं अस्मद्देशवत् षष्टी घटीमितं कथं नोक्तं ॥ एवं पितृषु

नाम पितृविषये पितृणां शशिमासमितं नाम चान्द्रमासमितं द्युनिशं अहोरात्रं किं नाम कुतो हेतो

चौकड़ी सहस्र युग मयं अर्थात् सहस्र हजार मिताचौकड़ीत्यर्थः = ४

शि॰ कु॰ ८

१ तौ = २ १ किं नाम· कुतो हेतोः १ = २

अथ कस्य राशेर्महती ज्यकाये त्वायुक्त निरक्षोदयान्स्व देशो दयांश्च कुत्तविलसंवित्तेनखंड यति ।।
मू· ।। भवलयस्य किलार्क लवाः सुमाः ।। किमु ऽसमैः समयैः खलु राशयः ।। समुपयांत्युदयं कि
मुगोलविन्न विषये खविवलेष्वपि ते समा इति ।। १ ।। टी· १ मेषादि राशयः १ असमैः समयैः नाम
अतुल्य कालेन खलु निश्चयेन उदयं समुपयांति उदयमित्युपलक्षणं किंतु अस्तमपि बोध्यं ।। किं
[illegible] कुतो हेतोः १ अतुल्य कालेनोदयास्तं ।। उदयास्त कालाः समाः कथन्नोक्ताः ।। ननु राशिमाना
नां अतुल्यत्वेन एव उदयास्तकालौ अतुल्यौ अतः अतुल्य कालेन उदयास्तं युक्तमुक्तं ।। अतः
राशिविशेषणमाह ।। समा इति ।। किं भूताः राशयः ।। समाः ।। नाम तुल्य प्रमाणाः इत्यर्थः ।। अ
र्थात् त्रिंशत्भागात्मकाः सर्वे राशयः संतीत्यर्थः ।। नहि परस्परं भागैरधिको नास्ति येन उदयास्त
स्युः ५ कालौ परस्पर मधिकोनौ संभवेतां ।। ननु समत्वमाना ऽभाव श्चेत् अत आह ।। भवलयस्येति·
पुनः किंभूताः राशयः ।। भवलयस्य किलार्कलवाः ।। भवलयस्य नाम क्रांतिवृत्तस्य किलेति निश्चये
नार्कलवाः नाम द्वादशांशरूपाः ।। अत एव समाः १ तेन एव किं जातं ।। नाक्षत्र षष्टि घटीभिः क्रांतिवृ
त्तस्य परिवर्तनात् तस्य परिवर्तनकालस्य ६० ÷ १२ = ५ द्वादशांशः पंचघटी मितो राश्युदयास्त कालो
युक्तियुक्तः ।। ननु भचक्र प्रदेशविशेषस्य समत्वेपि प्रदेशविशेषस्योदयास्त [illegible] तो अतुल्य कालेन शक्ती

गिरिश [illegible] २

(गो॰ टी॰
३०)

१० ×हेतोः तेषां विसदृशा उदयाः नाहि भवंति =३

हे गोलवित् हे गोलतत्त्वज्ञ मया यथा कथं चित् राशीनां अतुल्या उदयास्ता ईश्वर शक्तिवशाद् भीकृ
ता परं तु ते राशयः अखिलेषु विषयेषु नाम सर्वदेशेषु समा अविकृता उदयास्तौ किमु न भवंति अर्था
त् प्रतिदेशं विसदृशा उदयाः कथं तेषां संजाताः कुतः॥ भूमेः मुकुरोदराकारेण तुल्यत्वादिति हेतोः॥७॥
अथ त्रिप्रश्न ग्रहणाधिकारौ विहित प्रायावपि शार्दूलेन खंडयन्नाह॥ मू॰॥ द्युज्या कुज्या पमसमनरा
ऽग्राहलंबादिकानां विद्वन् गोले वियतिहि यथा दर्शय द्वेत्र संस्थां॥ तिर्थ्यते चेद्ग्रह उडुपतेः किं
न भानोस्तदानिं मिंदोः प्राच्यां भवति तरणेः प्रग्रहः किं प्रतीच्यां इति॥८॥ टी॰॥ हे विद्वन् हे अद्ध
बोधक॰ द्युज्या॰ कुज्या॰ अपमज्या नाम क्रांतिज्या सम नर॰ समशंकुः अग्रा॰ अक्षज्या लंबज्या
उद्भ=८ नां आदिपदात् उद्धृत शंकुः तद्धृत्यादिः त्रिप्रश्नाधिकारोक्तां द्वेत्र संस्थां द्वेत्र स्थितिं यथा वि ऽपूर्वां=८
यति नाम आकाशेऽस्ति तथा गोले वद्यमाणप्रकारसिद्धं दर्शय॥ हि निश्चयेन॥ मुख्य गो
ले द्रष्टुमशाक्यत्वात् दृष्टांत गोले यथावगतं स्यात् तथा वदेति भावः॥ पूर्वं युक्त्याः प्रतिपादनाऽ
भावात् अयुक्तमित्यर्थः॥ उडुपतेरिन्दोः ग्रहः नाम मध्यग्रहणं तिर्थ्यते नाम पौर्णमास्यं
ते भवति चेत्तर्हि भानोः सूर्यस्य तदानी अमांते मध्यग्रहणं किं न॰ नाम॰ कथं न उक्तं॥ मध्यग्र
हः पर्वविराम काले इत्युक्तं तथा च पुनः अमांते द्वयोः सूर्येंद्वोः युगयोगस्य सत्वात् मध्यग्रहणं तत्रैव

= यथा चंद्रग्रहे छाद्यछादकयो योगस्समयेमध्यग्र॰ ॥ सू॰ चं॰१
= इत्युक्तं तथा सूर्यग्रहे पि छाद्यछादकयोः युगयोग काले मध्यग्रहणं कथं नोक्तं॥ पर्यायः॥ = शिव॰ २॰

त्वयाऽमांतासन्न प्रागपरकाले कथं मध्यग्रहणं युक्तम् [illegible] मित्युक्तमतः मध्यकालोक्तो युक्त्यऽभावा
दयुक्तो ग्रहणाधिकार इति भावः ॥ ननु चंद्रग्रहे लंबनाऽभावात् मध्यग्रहः पूर्णांते सूर्यग्रहे तु लंब
नसत्वेऽमांताऽऽसन्ने काले मध्यः यदा लंबनाऽभावस्तदाऽमांत एव मध्यग्रहणं स्यादतः न क्षतिः ॥
ग्रहणाधिकारोपि सफलः ॥ इत्यत्रऽस्वरसात् दूषणांतरेण खंडयति ॥ इंदोरिति ॥ इंदोश्चंद्रस्य प्रग्र
हः स्पर्शः प्राच्यां भवति पुनः सूर्यस्य तरणेः प्रग्रहः स्पर्शः प्रतीच्यां किं भवति एवं चंद्रस्य मोक्षः प्र
तीच्यां पुनस्तरणेः मोक्षः प्राच्यां कुतः इत्यपि ध्येयं ॥ एतेन ॥ द्वयोर्ग्रहणत्वाऽविशेषेण स्पर्शमो
क्षवलनदाने दिग्भेदेन यत्त्वया उक्तं तदऽयुक्तं युक्त्यऽभावादिति भावः ॥ ८ ॥ ननु सूर्ययोः ग्रहणे
स्पर्शमोक्षज्ञानं परिलेखाधीनं पुनः तस्य परिलेखस्य ग्रहणेऽनतिप्रयोजनात् उक्तदूषणमऽदूष
णमेवेति युक्त एव ग्रहणाऽधिकार इत्यतोऽनुष्टुभा पूर्वदूषणं समर्थयति ॥ मू· ॥ लंबनं वत किं
का च नतिर्निर्मितमतां वर· ॥ न तं संस्कृतिस्तिथौ वा [illegible] किं ते सिद्धे कुतः कुत इति ॥ ९ ॥ टी· ॥ हे मति
मतां सुबुद्धीपुरुषाणां मध्ये वरः नाम श्रेष्ठः अर्थात्स्वोक्त्या दूषणनिरासक ॥ लंबनं किं· वतेति खेदे·
येन लंबनेन द्वयोर्मध्यग्रहणयोर्भेदो जातः तल्लंबनमेवाकिमर्थं ॥ अथवा ग्रहणत्वाऽविशेषेऽपि चंद्रग्रहणे
पि लंबनं कथं न स्यादिति ॥ नहि चंद्रग्रहे लंबनं युक्तं सूर्यग्रहे तु तदाऽवश्यकत्वं युक्त्या प्रतिपादितं असे

प्रतिभाति· कुतः

किं जातं = ६

यो दिग् = ८

त्वदुक्तसमाधानश्रवणात् [illegible]णं तरमवि[illegible]ति ॥ इत्याह ॥ का चेति ॥ नतिः का किंस्वरूपा ॥ च पुनः चंद्रग्रहे नतस्य सिद्धिः सूर्यग्रहे तत्त्वसिद्धि[illegible]ति ग्रहणत्वाऽविशेषात् कथं युक्तं ॥ दूषणं तर्के इत्याह ॥ तिथो नाम अमांते तैर्बाणेना म सूर्यग्रहणीय सपात चंद्रोऽपि ननशरे क्रमेण तत्संस्कृतिः नाम लंबननत्योः संस्कारः किं नाम कया युक्त्या उक्तः अमांते लंबनसंस्कारः च पुनः शरे नतिसंस्कारः किं इति भावः ॥ अर्थादुभयोः संस्करणं एकत्रैव किन्न स्यात् इति तात्पर्यं ॥ अथान्यः प्रश्नः ॥ तेनाम लंबनाऽवनती कुतो हेतोः कुतः नाम भूव्यासार्धात्मिके ॥ श्लोके एकः कुशब्दः पंचम्यंतो हेतुपरः ॥ कारणपरे त्वर्थः ॥ द्वितीयः कुशब्दः पंचम्यंतः कु प्रत्ययांतश्च भूव्यासार्धस्य सूचकः ॥ अर्थात् लंबनाऽऽनयने परमलंबनं घटिका चतुष्टयात्मकं ॥ नत्यानयने परमनतिकलाश्च गतिपंचदशांश रूपाः भूव्यासार्धयोजनोत्पन्ना इति लंबननत्योरानयनं चैं भूव्यासार्धादुपपन्नं भवति ॥ एवं च भूव्यासार्धस्य ग्रहणद्वये साधारणसंबंधाच्चंद्रग्रहणेऽपि तदऽवश्यकत्वापत्तिस्तस्माल्लंबननत्योरव्यवस्थित्या ग्रहणाधिकार एव ऽयुक्त एवेति भावः ॥ ९ ॥ अथ शृंगोन्नत्यधिकारं शार्दूलवृत्तेन खंडयति ॥ श्रीः ॥ शुक्लस्य द्विजराज एव महसो हान्या कुतः कुतः सद्घृतत्वगतोऽप्यहो भ्रमभवाद्दोषादितिसङ्कादिव ॥ सम्याप्याप पुनस्तयी तनुमतस्तस्याश्रयेऽप्येव किं शुक्लस्य क्रमशस्तथैव महसो रुद्धेति सद्घृततास्य ॥ १० ॥

॥ टी ॥ एषः प्रत्यक्षतः द्विजराजश्चन्द्र अहो नाम आश्चर्ये सद्घृतत्वगतः नाम सम्यचीनवर्तुलत्वं प्राप्तः अर्थात् पूर्णांते संपूर्णसंमंडलत्वेन परिणतोऽपि दीप्तिसंगात् [illegible] कृपापन्नाऽऽरंभात् अनंतरं शुक्लस्य महसः नाम अथ तस्य तेजसः हान्या अपचयेन कुतः हीनः कुतः नाम कस्माद्धेतो भवे

(यतोऽयं चंद्रः पौर्णि[illegible]स्याऽनंतरं कृष्णतोऽभवदतः किमनुमीयते किमानो दोषाऽति संगा[illegible]तीयः ॥ पर्यायः ॥)

१ सकलस्य १   २ (शुक्लपक्षे २

पौर्णमासीदिने चंद्रस्य संपूर्णराज्या समागमः । पौर्णमासीव्यतिरिक्तदिने तु चंद्रस्य संपूर्णराज्या समागमो नास्ति । अतएव चन्द्रस्य वक्रतः कारणत्वासंभवेपि कारणत्वं संभावितं इत्युत्प्रेक्षालंकार एवेति पदम् ॥ यथार्थतः कारणत्वेप्रश्नानुत्पत्तेरिति भावः ॥ दोषा रात्रिस्तस्याः अतिसंगात् अत्यंतसमागमात् इव कुरंगः संजात इति प्रतीयते ॥ किंभूताद्दोषातिसंगात् भ्रमभवात् चंद्रस्य पश्चिमाभिमुख भ्रमोत्पन्नात् ॥ पूर्णिमायां संपूर्णमंडलश्चंद्रो भवति ॥ अतस्तस्य चंद्रस्य पूर्णिमायां क्षणमात्रावस्थायित्वेन न पूर्णमंडलस्य चंद्रस्य कारणत्वेक्षा अपि तु दोषातिसंगस्यैव कारणत्वं संभावितम् । यदि पूर्णचंद्रत्वेन एव दोषातिसंगमस्य कारणत्वेक्षा तर्हि संपूर्णचंद्रमंडलस्यैव लाघवात् कारणत्वेक्षा किं नोक्ता इत्यतो दोषातिसंगस्य विशेषणमेव भ्रमभवादिति ॥ अथानंतरं अयं चंद्रः गयीततनु सूर्यं संप्राप्य अर्थात् दर्शांते सूर्यं आश्रित्य अतः नाम (अस्मादनंतरं) शुक्लपक्षारंभात् अनंतरं तस्य सूर्यस्य आश्रयेण एकत्रावस्थानेन एव शुक्लस्य महसः नाम शुक्लस्य तेजसः क्रमशः नाम प्रतिपदादितिथिकालक्रमेण यथा कृष्णपक्षे उपचयो जातः तथा शुक्लपक्षे शुक्लस्य तेजसः रञ्ज्या पुनः नाम मंडलभंगानंतरं मासांतरेण पौर्णमास्यंते सह तेन पूर्णमंडलत्वं किंनाम कृतः एति ॥ तथा च स्वस्य तद्भंगेनैव कुतो न तिष्ठति एवं भोगो भाग्यः कुतो न भवंति इत्यत्र व्यवस्थितत्वयाभंगो नत्वधिकारं खंडितमेवेति भावः ॥ एवं च

पूर्णचंद्रस्य क्षण मात्रावस्थानात् – ६

१ नाम – ५

हयुक्ति नक्षत्रग्रहयुक्ति पाताधिकाराः खंडितपदार्था
पजीव्यत्वेनाखंडिताः स्वतः सिद्धाः इत्यज्ञोपि जानाति ।
अतः प्राधान्येन तत्खंडनं न युक्तं ॥ श्रीरस्तु ॥ श्रीः १

गतिम्

(गो.टी. १२) २५ अपिकुत्सितः नामकुत्सिताचरणवान् कुतोजातः ॥ यतोऽयंब्राह्मणोऽस्मिन् कुत्ततोदशतेऽतः किमनुमीयतेकिं २
=२५ कदाचित् [illegible] भ्रमभवात् नाम=२५२

12

॥ अथएतत्पद्यस्यद्वितीयार्थः ॥ एवं कश्चित् द्विजराजोब्राह्मणवर्यः सद्वृत्तलगतःनामसदा
चारनिष्ठः [redacted] विषयांतरसंलग्नस्वांत त्यासंजातोयोभ्रमःनामचित्तविक्षेपः
एवं नाम उत्पन्नाः तस्मादुत्पन्नोयोदोषः नामनित्यकर्माऽननुष्ठानजनितप्रत्यवायरूपः तस्यातिसंगात्नाम ःदोषस्य=२
अत्यंतपरिशीलनात् इव अयंब्राह्मणः शुक्लस्यमहसः शुद्धतेजसः नामब्राह्मण्यस्य हान्यानाशे
नकुरत्तोजातः इतिप्रतीयते उत्प्रेक्षाद्योतकः इवशब्दः ॥ अथेत्यनंतरं सोत्तिनिद्यः ब्राह्मणः त्रयी
तनुं नामवेदत्रयीमयशरीरं शिष्टश्रेष्ठं संप्राप्यनामलब्ध्वा अनंतरं तस्यशिष्टस्य आश्रयेणनाम
राहित्यादेव= अनुग्रहेण एव अर्थात्पापाऽनुग्रहकनिरासादेव शुक्लस्यमहसः नामब्राह्मण्यस्य तथैव क्रमशः
नामयथा तेजसः येनक्रमेणहानिर्जाता तथैव तेजसः तेनैव क्रमेण [redacted] सद्वृत्ततांसदाचार ःसंजायत=॥
निष्ठतां एति नामप्राप्नोति इति किं नाम अत्रकिंचित्रं कुतः शिष्टानुग्रहस्य तथात्वात् इति॥१॥ यस्त्वेव पुनः ८
एवंखंडनानिरूपिता इति फक्किकयाह ॥ इतिगोलप्रश्नाध्यायः [illegible] इति ॥ पूर्वकथिताः प्रश्नानिरू
त्तिपिताएताट्टशाभ्रमचारणार्थं गोल इत्युक्तिः ॥ इर्वग्रंथेये उक्ता प्रश्नास्तेतु गणितप्रश्नाः सोत्तरा
लग्रंथांतेउक्ताः ॥ एतेतुगोलस्थितपदार्थस्वरूपपृच्छात्मका अनुदिष्टा अपिसंगत्यर्थं निरू
का इतिभावः ॥ श्रीरस्तु ॥ श्रीः ॥ शालिग्रामसुधीर्विचारचतुरः सज्ज्योतिर्विद्यानिधिः [redacted] मवधीत्रै
र्ज्योतिलकोदेव्याः प्रसादात्सुधीः ॥ तेनेदं खलु गोलपृच्छकधियासंस्थापितं खंडनं येसिद्धांततु
ते=१ २=३ [redacted] शिव-१२

ग्रोष्टीकायां=२

विधौ[illegible]योग्याश्चैतुष्यंतु ते ॥ १ ॥ इतिश्रीदैवतक्रुष्णदत्तसुतश्रीलिंगामगणकविरचितायां मयूखमालायां सिद्धांतशिरोमणि[illegible]गोलप्रश्नाध्यायः संपूर्णः ॥ संवत् १९४१ पौषव २३ ॥ श्रीरस्तु ॥

अथ पृथ्वीसंस्थानप्रश्नोत्तरभूतभुवनकोशाध्यायो व्याख्यायते ॥ तत्र सृष्टाभचक्रमित्याद्यवगतस्वाभिमतभचक्रस्थितेः संस्थापनार्थं भूमिप्रश्नोत्तरं भूमिस्थित्यादिस्वरूपभूतं विवक्षुः प्रथमं उपस्थितसृष्टिसंभवः कथमित्याशंकापाकरणीयमूलभूतसृष्टिप्रक्रियायुक्तियुक्तप्रश्नोत्तरस्य सद्यः स्फुरणकामनाचरितं तं मंगलनिबंधनछलेन मंदाक्रांतयाह ॥ मू ॥ यस्मात्क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भेऽहंकारोऽभूत्खकशिखिजलोर्व्यस्ततः संहतेभ्यः ॥ ब्रह्मांडं यज्जठरगमहीपृष्ठनिष्ठाद्विरंचेर्विश्वं शश्वज्जयति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥ १ ॥ टी ॥ तत् जयति ॥ तत् नाम श्रुतिभिः प्रतिपाद्योऽनिर्वचनीयबुद्धिस्थवस्तु विशेषः ॥ जयति नाम सर्वोत्कर्षेण वर्तते इत्यनेन नमस्कार आक्षिप्यते ॥ यतः सर्वोत्कर्षेण वर्तते ऽतोऽहं तं नमस्करोमि इति फलितोर्थः ॥ ननु अनिर्वचनीयत्वान्मिथ्यात्वं तस्य कथं सर्वोत्कृष्टत्वं ॥ अत आह ॥ किंभूतं तत् ॥ तत्त्वं नाम तत् त्वं असि ॥ इति श्रुत्या वस्तुभूतं सत् ॥ तेन वेदांतमतप्रपंचवन्मिथ्यात्वं नेत्यतः सर्वोत्कृष्टत्वं स्वतः सिद्धं तस्य ॥ पुनः विशेषतस्तस्य ज्ञानार्थं हेतुभूतं विशेषणं आह ॥ पुनः किंभूतं तत् ॥ ब्रह्म नाम व्यापकं इत्यर्थः ॥ पुनस्तत्सद्भावे प्रमाणमाह ॥ पुनः किंभूतं तत् ॥ आद्यं नाम जगत्प्राग्भावकालावस्थापित्वं जगदुत्पत्तिः

स्था=१

[illegible]

गो॰टी॰
मयूखमाला॰
१३

॥ यतो वा इमानि भूतानि जायंते तत्सृष्ट्वा तदेवानुप्राविशतीति श्रुतेः =१

एवं कार्यलिंगकानुमानेन ईश्वरसिद्धिर्दर्शिता॥ ननु वेदांतमते एतदुक्तमायया सिद्धेर्नेश्वरसिद्धिरत आह॥ पुनः किंभूतं तत्‌॰ शाश्वतं नाम नित्यः अविनाशीत्यर्थः॥ एवं मायाया विनाशित्वात्‌ तस्याः असिद्धेः ईश्वरसिद्धिः स्वतः इतिभावः॥ नन्वेवं सांख्यमते नित्याद्याः प्रकृतेः सिध्या न ईश्वरसिद्धिरत आह॥ पुनः किंभूतं तत्‌॰ परं नाम उत्कृष्टमित्यर्थः॥ एतेन नित्यविज्ञानमानंदं ब्रह्म इति श्रुतेः सर्वज्ञत्वेन सच्चिदानंदरूपे परमेश्वरे उत्कृष्टत्वमुपपन्नं न प्रकृतौ कुतः अचेतनत्वादित्यर्थः॥ ननु कपिलमुनिमते अचेतनापि प्रकृतिः अगाधमाम्नाय कंठे सकलं तनोति अचेतनसंचलतीव लोह

एवं=८ मित्युक्ता जगदुपादानकारणीभूतायाः प्रकृतेरचेतनायाः जीवात्मसान्निध्यादेव जगत्कर्तृत्वसमर्थनात्परमपदस्याऽप्युपादानकारणमिति भेदोऽर्थः इति पूर्वोक्तविशेषणैः प्रकृतिसिध्या नेश्वरसिद्धिरित्यतः पातंजलमताभ्युपगमपूर्वकसृष्टिप्रक्रियाकथनद्वारेणेश्वरसिद्धिमाह॥ यस्माद्धे

कारणात्‌=५ तोः ब्रह्मांडं उदवर्ध्यत माणरीत्याऽभवत्‌ अस्माद्धेतोः ईश्वरसिद्धौ न किंचिद्बाधकम्‌॥ कया कारणत्=५ रीत्याऽत आह॥ यस्माद्धेतोः क्षुब्धप्रकृतिपुरुषाभ्यां नाम प्रकृतीश्वराभ्यां क्षुब्धाभ्यां सकाशात्‌ महान्नाम महत्तत्वमभूत्‌॥ एतदुक्तं भवति॥ क्षुब्धत्वं नाम अविलंबेन कार्योत्पत्तिकत्वं॥ प्रकृतिर्गुणसाम्यमित्यर्थः॥ क्षोभस्तु गुणाधिक्यरूप इत्यर्थः॥ पुरुषः ईश्वर इत्यर्थः॥ तत्क्षोभश्च सिसृक्षा॥ अर्थात्‌ ईश्वरसिसृक्षया प्रकृतेः क्षुब्धायाः सकाशान्महत्तत्वमभिव्यक्तमभवत्‌॥ तन्मते सत्कार्यवादाऽभ्युपगमा हि

शिव॰
१३

अस्य महत्तत्त्वस्य गर्भे नाम उदरे अहंकारोऽभूत् गर्भे इत्यनेन तु यथा महत्तत्त्वोदरे इति सूचितं ॥ महत्तत्त्वादहंकारोऽभिव्यक्त इत्यर्थः ॥ अयं त्रिगुणात्मकः ॥ यः वैकारिकः सः सत्त्वगुणाधिक्यादभूत्‌ । यस्तैजसः सः रजोगुणाधिक्यादभूत् पुनः यस्तामसोऽहंकारः स भूतादिः ॥ तामसाऽहंकारात् स्व स्व विशेषण पूर्वकाः ख क श्वि खि ज लो व्यः अभवन् एतैः स्वपं च महाभूता उच्यंते ॥ क वायुः श्विखिरग्निः उर्वी पृथ्वीत्यर्थः ॥ अस्य ष्टिकाले सृष्टि कारणाय तु यथा इति विशेषणं ॥ तामसाहंकारात्‌ वदत्तन्मात्रं शब्दतन्मात्रादाकाशः खात् शब्दतन्मात्रं ततः वायुः ॥ अस्मात् तन्मा ॥ ततस्तेजः ॥ अतः रस तन्मा ॥ ततो जलं ॥ अतः गंध तन्मा ॥ अतः ॥ खस्य शब्द गुणः ॥ वायोः शब्द स्पर्श गुणौ ॥ तेजसः श स्प रू त्रीणि गु ॥ जलस्य ४ गु ॥ पृथिव्याः ५ गु ॥ तामसा ऽहंकारोत्पन्नानि पंचमहाभूतान्येव ॥ तन्मात्रं तु विशेषगुणसमवेतो भूतारंभकोऽवयवभूतं ज्ञेयमित्यर्थः ॥

अथ शब्दादिगुणानां ग्राहकाणि पंच बुद्धींद्रियाणि ॥ श्रो १ त्व २ च ३ जि ४ नासि ५ पंच कर्मेन्द्रियाणि च ५

पाणि=२ वाक् १ हस्तौ २ पाद ३ गुद ४ लिंग ५ इति ॥ उभयात्मकं नाम बुद्धिकर्मात्मकं मनः ॥ एषामेकोएकादशेंद्रियाणि जातानि ॥ तैजसाऽहंकारोत्पन्नानि ॥ एषामचेतनत्वात्स्वातंत्र्येण गुणग्राह

ता=३ कत्वमनुपपन्नं अतस्तदधिष्ठातारो देवाः गुणग्राहकाः ॥ अहंकारस्यैव ॥ क्रमेण दिग्वातार्कप्रचेताश्विवन्हि इंद्र विष्णु मित्र चंद्राः सात्त्विकाऽहंकारोत्पन्नाः ज्ञेयाः ॥ वैकारिकेश्च ॥ तैजसादिंद्रियाण्याद्युस्त्यादिरेषा वाग्मे

(प्रकृतिः ॥ महत्तत्त्वं ॥ अहंकारः ॥ तन्मात्राणि ॥ इंद्रियाणि ॥ पञ्चमहाभूतानि ॥ पुरुषः ॥ १९+५+१=२५
(१) (२) (३) + (५) =८+११=१९ ॥ ५ १

तत्त्वः नाम ३

गो·टी·
१४

चेन्नू॥ भचक्रसंस्थानोपयुक्तत्वेन उक्तमानस्यैवोपपत्तेः॥ पुनः पंचमहाभूतानां यासंहतिः ना
मएकीभावः॥ तस्याः संहतेः सकाशात्तु नाम एकीभूतात्संघात्तु ब्रह्मांडं प्रभवत्॥ नामपं
चभूतात्मकं गोलाकारं भाण्डं प्रभवदित्यर्थः॥ यस्मात्कारणात् ब्रह्मांडं एवं रीत्याऽभवत् अ
स्माद्धेतोरीश्वरसिद्धौ न किंचिद्बाधकमित्यर्थः॥ ननु ब्रह्मांडसत्त्वे किं मानं यत्कर्तृत्वेन ईश्वर
सिद्धिरत आह॥ विरंचेरिति॥ पुनः विरंचेः नाम ब्रह्मणः सकाशात् भूर्भुवः स्वर्लोकात्म
इदं विश्वं प्रभूत्॥ तथा च समग्रविश्वस्य अप्रत्यक्षत्वेन यत्किंचित् विश्वैकदेशदर्शनात् सम
ग्रं विश्वं अनुमीयते तत्कर्ता ब्रह्माप्यनुमीयते· तथेदं ब्रह्मांडमप्यनुमीयतां॥ विश्वस्य ब्र
ह्मांडैकदेशत्वादिति भावः॥ ननु विश्वस्य ब्रह्मांडैकदेशत्वे किं मानं इत्यतो ब्रह्मोत्पत्ति
प्रकारसूचकं ब्रह्मणो विशेषणमाह॥ यज्जठरगेति॥ किंभूताद्विरंचेः॥ यत् नाम यस्य
ब्रह्मांडगोलस्य जठरे नाम मध्यगर्भकेंद्रे गं नाम गता केंद्रैक्यरूपेण स्थिता या मही पृथ्वी
तस्याः यत्पृष्ठं सर्वेषामाधारभूतं तस्मिन् निष्ठा नाम स्थितिर्यस्य एतादृशाद्विरंचेः स
काशादित्यर्थः॥ एवं प्रकृतिपरिणामरूपब्रह्मांडमेव ब्रह्मणः शरीरजनकं॥ पुराणो
पप्रसिद्धं इत्यलं विस्तरेण॥३॥ विशेषजिज्ञासुभिः विश्वरूपकृता वृहट्टीका द्रष्टव्या॥

=अथीत्=४

तत्र विस्तारः पूर्वं कंस्य वे मण्डुपपादितम्॥८ श्रीरस्तु॥

शिव·
(१४)

अथ किमाकारेत्यंतप्रश्नयोरुत्तरं स्रग्धरावृत्तेनाह॥ मू०॥ भूमेः पिंडः शशांकज्ञकविरविकुजे
ज्यार्किनक्षत्रकक्षावृत्तैर्वृत्तो वृतः सन्मृदनिलसलिलव्योमतेजोमयोऽयं॥ नान्याधारः स्वश
क्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात्॥२॥
॥टी०॥ अयं जनाश्रयभूतो भूमेः पिंडः स्वां शक्तिं दीर्घत्वेन एकीभावरूपां ब्रह्मांडे वियतिनामब्रह्मां ॥ईः=४
ब्रह्मांड=५ डावच्छिन्नाऽऽकाशमध्यभागे तिष्ठति॥ स्वमध्यभागैक्यरूपेणाऽस्तीत्यर्थः॥ ननु एकीभावो दीर्घत्वेन
अनुपपन्नः॥ भूतत्वविरोधात्। अत आह॥ किं भूतोऽयं पिंडः॥ मृदनिलसलिलव्योमतेजोमयः॥ भू
मेः संपूर्णाऽवयवाः एकीभावापन्नाः॥ वायूदकाऽऽकाशतेजसां प्रत्येकं॥ तन्मय एकीभावरूपोऽयं पिंडः॥
तथाहि॥ केवलभूभागोत्पन्नत्वाऽसंभवेपि जलादिभूतभागसहचारे एतभूभागैकीभावस्य पिंडत्वेनाऽनुप
गा=९ पन्नम्॥ अत एवाऽन्यभागानां वहुत्वात्पृथिवीपिंड इति व्यवहारः॥ ननु अयं पिंडः ब्रह्मांडमध्यगर्भे
एवास्तीति कथं ज्ञायते॥ इत्यतः पिंडस्य वहुस्वरूपसंभवात् किमाकारोयमित्याशंकानिवारकमचक्र
संस्थाने पूर्वकृतत्वात् पिंडस्वरूपकथनच्छलेन तदुत्तरमाह॥ पुनः किंभूतोऽयं पिंडः॥ शशांककविवि
रविकुजेज्यार्किनक्षत्रबिंबानां भ्रमणमार्गरूपमार्गसंबंधिनाकाशगोलैः कक्षावृत्तपदवाच्यैः वृत्तः
सन् नाम समंतादेतेऽभितो व्याप्तः सन् अयं पिंडः वृत्तः नाम वर्तुलः कंदुकाऽऽकारः अस्ति॥
तथा च कक्षावृत्तसमभिव्याहारादुक्तकेमेतगोलानामूर्ध्वाधःस्थत्वं पूर्वोद्दिष्टस्याऽनंतरो ॥ल१

गो. टी.
१५

१ यावति

18

दिग्गा ऽऽयनत्वं च लभ्यते ॥ तथा च ॥ विषुवति याँवत्कालं उदया ऽनंतरं अहादेर्दर्शनं तावदेव
देवा अस्तानंतरं अदर्शनं इति नियमानुरोधात् भूगोलस्य ब्रह्मांडमध्यभागस्थत्वं ॥ न द्वन्द्व गोला
नां ब्रह्मांड परिधे स्थितत्वकल्पनात्तदा ऽभाव कल्पने मानाऽभावात् ॥ अहनक्षत्राणां एक गोलाधिष्ठितत्वं चे
दंगीक्रियते तदाश्रयाभावे युतौ सति एकत्र सन्निवेशेन तयोरतिविरलत्वमंडलयोर्गमनाऽनुपपत्तेः
हेतोः = ५ मंडलभंगापत्तेश्च इति पृथक्पृथक् गोलास्तेषां ॥ तत्र नक्षत्रा ऽऽकाशगोलश्च पांचभौतिकः ॥ म = ५
तस्मिन् = ६ ध्या ऽऽकाशात्मकः नीलरूपः ॥ तत्र नक्षत्राकाशगोले नक्षत्राणि ब्रह्मणा स्वेच्छया इतस्ततः स्था
पितानि ॥ अहास्तु स्वस्वा ऽऽकाशगोलस्थाः भ्रमंतीति बाधकाभावात् तेषां मूर्तगोलाः न
ल्प्या = ८ कल्प्या इति ध्येयम् ॥ इत्थं लंबे यवापुल्यभयाद्विस्तरं तु अहस्तीकायां विश्वरूपैः प्रतिपादितम् ॥
ननु ब्रह्मांडस्य मध्यगर्भे स्थितो भूगोल आधारं अपेक्षते ॥ आधारोऽपि स्वस्थैर्यार्थं आधारं अपेक्ष
ते इत्याधारपरंपरया भवन्हु भ्रमणाऽनुपपत्तिः ॥ अत आह ॥ नेति ॥ पुनः किंभूतोऽयं पिंडः ॥ नान्या
ऽऽधारः ॥ अन्य आधारः असन् अर्थादन्यो मूर्ताधारो ऽस्य नेत्यर्थः ॥ अमूर्तेश्वरस्य जगदाधारत्वे जगदंत
र्भूत भूगोलस्याधारत्वं निवारयितुं अशक्यत्वात् अन्येषु उक्तं अन्यथा नाधार इत्युक्तत्वापत्तेः ॥
ननु एवं चेत् तदा भूगोलस्य निराधारत्वे नाऽवस्थानस्य समर्थनं ब्रह्मणोऽप्यशक्यं अत आह ॥ पुनः किंभूतः ॥
स्वशक्त्या एव नियतं ॥ यथा चुंबकमणेः लोहाकर्षणे शक्तिस्तथा ॥ ननु तारागणस्य नक्षत्राकाशे स्थिता भूः
(१ निराधारे संपादिकया ऽनिर्वचनया स्वशक्त्या एव नियतमस्तीत्यर्थः ॥ १ गु. १ पं. ॥)
१ अवस्थितिः १

शि. व.
१५

॥ केचित्तदा चार्यैर्ध्रुव द्वय शङ्कया भूरा काशे स्थिता इत्युक्तं तन्न ॥ परशक्तिकल्पने गौरवात् स्वशक्तिरंभी ॥ कारे लाघवं दृष्ट्वा
एव कारेण पठितः ॥ अथी देवकारेण तेषां मतं खंडितमाचार्यैरिति फलितम् ॥ पुनः स्वाश्रयभूतभूमेर्गोलाकारत्वेन
दृश्यते ॥ समन्तात् दर्पणोदरवत् प्रतीयते ॥ अयं वृत्त इति कथमुक्तं ॥ अतः भूगोलांतः स्थितभूगो
लस्याऽऽश्रयीभूतः इयं वृत्तपदसिद्धा या भूः साभिन्ना इति कल्प्यते ॥ अस्याः शंकायाः वारणार्थं
पिंडः अप्रस्येति ॥ पुनः किंभूतं ॥ अस्य नाम भूगोलांतर्गतभूगोलस्य पृष्ठे नाम पृष्ठभागे विश्वं भूर्भुवः स्वरात्मकं
नित्यं स्थितमित्यर्थः ॥ एतत्पृष्ठविभागे लोकभूम्यः ब्रह्मणा न विभक्ताः ॥ कुतः भूगोलांतोऽवस्थानाऽयोग्य भ=६
त्वादित्यर्थः ॥ चकारात्समुद्रनदीद्वीपादिकमत्रैवास्तीति ध्येयम् ॥ ननु ब्रह्मणा विश्वं किमर्थमुपकल्पितं इत्य
तो विश्वविशेषणमाह ॥ किंभूतं विश्वं ॥ भूगोलस्य पृष्ठे समंतात् दनुजमनुजाऽऽदित्यदैत्यैः सह वर्तमानं
संयुतमित्यर्थः ॥ दनुजा दानवाः ॥ मनुजा मनुष्याः आदित्याः देवाः दितिपुत्राः दैत्याः ॥ तथा च स्वनिर्मित देवमनु
ष्यदैत्यादिभूतं संकीर्णावस्थाननिमित्तं विश्वविभाग उपकल्पितमिति भावः ॥ ननु भूमेर्गोलत्वेन उपरितनभा
गस्य समत्वात्स्वल्पत्वं तत्र कथमेषां मवस्थानस्य सन्निवेशः अन्यत्र पतनशंकया तदऽसंभवात् समंतादित्यु
क्तं ॥ तथा च ॥ गोलपृष्ठेऽभितस्तेषां यथायोग्यं सन्निवेश इति भावः ॥ ननु तिर्यगधोऽवस्थानस्यातिवि
रुद्धत्वेन कालांतरेण पतनशंकायाः संभावितत्वात् कथमवस्थानं अत आह ॥ पुनः किंभूतं विश्वं ॥ शश्व
त् नाम अनवरतं तिष्ठति ॥ कालांतरेपि पतनशंकाया अत्रैनिरस्तत्वादिति भावः ॥ तथा पृथिवी विश्वस्य

गो.टी.
३६

अभिलक्ष्कलशांतरे=२

16

गोलाकारदर्श

भगोलांतःस्थितभूगोलस्यैव स्वाश्रयत्वं · ~~दर्पणोदराकार~~ नाऽभावस्तत्कारणं तस्य वशादग्रे प्रतिपा
दनाद्वृत्त पृथिवी ह्याऽवस्थानेन भचक्रचलनाऽसंभवाच्च न स्वाश्रयीभूतभूमिभिन्नो किंतु भगो
लांतरगतभूमिगोलैवेति भावः ॥२॥ अथ पर्वताद्यचेतनसन्निवेशं सदृष्टांतमनुष्टुभाह ॥ मू॥
सर्वतः पर्वताराम ग्राम चैत्य चयैश्चितः ॥ कदंबकुसुमग्रंथिः केसर प्रकरैरिव ॥३॥ टी॥
आराम उद्यानानि ॥ चैत्यं बौद्धदेवायतनं ॥ टी ॥ अयं पूर्वोक्तः भूमिगोलः सर्वतः नाम समंतात्
पर्वताराम ग्राम चैत्यानां चयैः नाम समुदायैः चितः नाम व्याप्तोऽस्ति ॥ ननु चेतनपदार्थाः स्वप्रयत्नै
रपि यथा कथंचित् गोले सर्वत्राऽवस्थितिं कर्तुं समर्थाः अचेतनरूपास्तु तिर्यगधोभागे कथं
स्थिताः स्वव्यापाराऽभावात् इत्याशंकावारणाय दृष्टांतमाह ॥ क इव ॥ कदंबकुसुमग्रंथिः केसर
प्रकरैः इव ॥ यथा कदंबपुष्पग्रंथ्याबद्धास्तिर्यक् समंतात् केसराणि स्थितानि तथैवास्मिन् गोले
पर्वतादिकं तिर्यगधोभागे स्थितमस्ति ॥ अत्र शंकायाऽवकाशो नेति भावः ॥३॥ ननूक्त्वाधिकर
त= णस्याऽऽश्रयं विनाऽधः प्रयाताऽवष्टंभावा[illegible] प्रत्यक्षप्रमाणाऽवगम्यत्वात् ॥ अतएव
तेनेयं नागवर्गोपरि सा विधृ नामही त्यादिकं श्रयपादिवचनैः शेषाद्याऽऽधाराः प्रसिद्धाः ॥
कथं नान्याधारः स्वशक्त्यैवेत्युक्तं प्रयुज्यते इत्याशंकां निराकुर्वन्मालिन्याह ॥ मू ॥ मूर्तोध

ऽव=
(शेषः कूर्मीर वराहः ३=२)

शिक.
३६

(पृ॰१ ज॰२ अग्नि॰३ वायू॰४ आ॰५ सू॰६ चं॰७ यजमान॰८) = (तिसृद्दसकौ भूम्याधारको)

त्रीचेद्भूद्वि्र्याप्तेंत्तोन्यात्तस्याप्यन्योस्येवमनवस्थाः॥ अंत्ये कल्प्या चेत्स्वशक्तिः किं मौद्ये किंनी भूमेः
साष्टमूर्तेश्व मूर्तिः॥४॥टी॰॥सर्वाऽऽधारभूताया धरित्र्याः॥ इयत्ताऽवच्छिन्नपरिमाणाऽधिकर
णं मूर्त्तमिति लक्षणहेतुलक्षितः शरीरादिमान् कश्चित् धर्त्तानाम धारकश्चेदस्ति॰ ततोऽस्याप्याधा
रस्य अन्यः नाम भिन्नः धर्त्ता कल्पनीयः॥ अपिशब्दात् तस्यापि अन्यः धर्त्ता कल्प्यः॥ एवं नाम अनया
रीत्याऽऽधारपरंपराकल्पनेन अत्र क्वचिदपि अवस्थानाऽसंभवात् महान् अनवस्थादोषः स्यात्
पुनः दोषवारणाय अंत्ये नाम पुराणसंमत अंतिमाऽऽधारे वराहे सर्वअंतरिक्षाऽवस्थानरूपा स्वशक्तिः
कल्प्या इति चेद्वदसि तर्हि आद्ये भूम्याधारे शेषे सा शक्तिः किंनाम कथं न कल्प्या अग्रिमनोकारस्य
देहलीदीपकन्यायेनान्वयात्॥ शेषशक्तिकल्पनस्य लघुत्वात्॥ एवं कूर्मवराहयोः व्यर्थत्वापत्तिः॥
च= न च भूम्याऽऽधारनिर्णायकत्वेनात्पर्यशिष्टापत्तिरित्याह॥ किमिति॥ यदा अंतरिक्षावस्थानरूपा शक्तिः शे
षे कल्प्यते तर्हि भूमेः किंनाम कथं सा शक्तिः न कल्प्या अतिलाघवात् भूमेरेव शक्तिः कल्प्यतां॥ शक्तेः
प्रत्यक्षाऽवगम्यत्वाऽनियमस्य तद्वत्त्वाएव सिद्धेरित्यर्थः॥ सदाधारपृथिवीद्यामिति श्रुतिप्रामाण्येनचे
श्वरस्य जगदाधारत्वेन चाऽमूर्तेश्वराऽऽधारत्वं भूमेर्नान्याधारः॥ इत्यनेनांगीकृतं तत्तु निराधारत्वमेवेति
भावः॥ शेषादीश्वरांशत्वाशंकाऽवकाशादाह॥ चेत्कारोत्सा भूमिः अष्टमूर्तेः महेश्वरस्य मूर्तिः ना

चपुनः१ यतः१

एतेन जले भूमिगोलकं विकाऽवतरतीति यवनमतं अपास्तं ॥ पुनः सलिले विलयोऽम्बुदो भवेदिति लक्षो
केऽपि भूमावित्थं जलं इति सार्वजनीनप्रतीतेर्भूमिजलयोराधाराऽधेयभावसंबंधाः ॥ प्रसिद्धः ॥ ६ ॥ गौः ॥
17 ननु महेशाष्टमूर्तेः तन्मत्त्वं जलादीनामपि ॥ तेषु चांतरिद्वाऽवस्था न शक्तेः शंकाऽवकाश इदं शस्ये
नाह ॥ मू ॥ यद्योष्णताऽर्काऽनलयोश्च शीतता विधौ द्रुतिः के कठिनत्वमश्मनि ॥ मरुच्चलो भूरचला
स्वभावतो यतो विचित्रा वत वस्तुशक्तयः इति ॥ ७ ॥ टी ॥ एकस्मिन् पदार्थे शक्तिद्वयं लोके कुत्रापि
आचार्यः = न दृश्यते इति तात्पर्यार्थं आह ॥ यथाऽर्काऽनलयोः सूर्याग्न्योः उष्णता नाम उष्णस्पर्शाधिकरणत्वं
॥ चवार्थे ॥ यथा वादृष्टांतोत्तरं ॥ विधौ चंद्रे शीतता नाम स्पर्शस्य शीताधिकरणत्वं ॥ के नाम जले द्रु
तिः नाम द्रवत्वाधिकरणत्वं ॥ अश्मनि नाम पाषाणे कठिनत्वं नाम काठिन्यं ॥ मरुत् नाम वायुः
चलः चंचल इत्यर्थः ॥ तथा स्वभावतः नाम स्वरूपेणैव भूः अचला नाम स्थिरा इत्यर्थः ॥ ननु
स्वरूपेण एवं तत्तथात्वं कुत इत्यत आह ॥ यतः कारणात् वस्तुशक्तयः नाम पदार्थानां स्वकार्य
जननसामर्थ्यरूपाः शक्तयः वत इति खेदे विचित्राः नाम नानाविधाः संति ॥ एतेन वाय्वादेरिव चल
त्वादि स्वरूपेण तत्रास्तामिति निरस्तः ॥ कल्पनायाः दृष्टाऽनुरुद्धत्वात् ॥ तथा च वाय्वादीनां प्रत्यक्ष
चलत्वादिशक्त्या भूमेरचलत्वशक्तिरनुमीयते इति भावः ॥ विदलकभवदंगीकृताधः प्रदेशाऽभ्युपगमे
शक्तिः स्वभावो वा कल्प्यते ॥ वस्तुतोऽस्मन्मते भूमेरधः प्रदेशाऽभावात् पतनाऽसंभवः इत्यंतेन सम्बन्धः

=भूमिः स्थिरेति

=अग्रिम श्लोके = १

अगयोराशीकज्ञेप्रातिर्विदस्तु ॥ भुवः स्थैर्य्यं यदुक्तं तत्किमतिरिक्ता शक्तिः स्वभावो वा ॥ तत्राति
रिक्तशक्तौ ॥ सहजा किमागंतुका वा ॥ सहजा चेत्तदा ॥ यथा वन्ह्याऽवयवे दाहकता तथा पृथुतरपृथ्वीत्वं
५ वपि=३ डादौ स्थैर्यित्वापत्तिः ॥ द्वितीयपक्षे स्वस्वभावः स्वभावः इति व्युत्पत्तिबलेन स्थैर्यमस्य चेत्तदा भूकंपादावपि च
लनं न स्यात् ॥ इत्यलं विशेषजल्पनेन ॥ विशेषनिर्णयस्तु वृहट्टीकायां विस्तरैः प्रतिपादितं ॥ अत्रैव वि
ध्रुव स्तरभयान्नोपपादितम् ॥ ५ ॥ ननु पूर्वश्लोके वन्ह्यादिदृष्टांतानां स्वभावस्य वन्ह्याद्यवयवेपि सत्वा
त्भूमावचलस्वभावस्य भूम्याऽवयवे सत्वाद्दृष्टांतबलेन कथं भूमेरचलस्वभावो वक्तुमुचितमन्यथा
आक्षेपणेन=७ वार्धिवाचयव लोष्टादेरपि अंतरिक्षेऽवस्थानादर्शनापत्तेरिति शंकायामुत्तरं उपजातिकयाह ॥ मू॰ ॥
आकृष्टशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या ॥ आकृष्यते तत्पततीव भाति समे स
मंतात्क्व पतत्वियं खे ॥ ६ ॥ टी॰ ॥ मही नाम पृथ्वी आकृष्टशक्तिः वती अस्ति अर्थात् आकर्षणसंपादि
का शक्तिर्विद्यते यस्याः एतादृशा मही त्यनुमीयते ॥ च समुच्चये ॥ तेन भूमेरचलत्वं आकर्षणत्वं द्वयु
भयशक्त्योरधिकरणत्वं सिद्धं ॥ ननु प्रकृते किं सिद्धं तत्राह ॥ भूमिरिति ॥ तया नाम भूम्याः आ
स्वशक्त्या नाम आकर्षणरूप स्वशक्त्या यत्खस्थं गुरुः नाम आकाशस्थं आधारशून्यं यत् गुरुत्वाधि
करणीभूतं पृथिव्याऽवयव साधारणं वस्तु ॥ स्वाभिमुखं नाम स्वाभिमुखो वायुः पृथिवी प्रदेशात्तदभि
मुखाऽऽकाशमार्गेण ॥ आकृष्यते ॥ नाम प्रतिबंधाऽभावे स्वतत्प्रदेशं प्रति आनीयते इत्यर्थः ॥ तत्

तु=४ [illegible]

गो.टी. १८

18

व=२

पुनः कियद्दिगाहमानं विहंगमाद्याऽऽकर्षणं तु वाय्वादिप्रतिबंधान्न भवति॥ एतेन भूगोलस्याऽऽकर्ष
काऽप्रसिध्याऽऽकर्षणाऽसंभवान्नाधोगमनं॥ भूगोलस्याऽऽकाशस्थत्वेनाऽऽकर्षकत्वोक्त्या स्वा
ऽधिष्ठितलोकाऽऽकर्षकत्वं स्वतः सिद्धमिति॥ तिर्यगधः पतनाऽसंभव इत्यपि सूचितं॥ तथा च
चुंबकमणिना भूमेः स्थिरताशक्तिः सहजा॥ यथा चुंबकेनाऽचललोहं समाकर्ष्यते तथा भूम्याः स्वाकर्षणशक्त्या
स्थिराऽऽकाशस्थस्वाऽवयवस्याऽऽकर्षणान्न पतनाऽसिद्धिः॥ अतः भूमेरवयवानां स्थिरत्वं जातं॥
अवयवपतनप्रतीतिस्तु नीलं नभः इतिवत् भ्रान्त्या एव भवति वस्तुतः स्थिरत्वं तस्य॥ वस्तुतस्तु
पातालाऽवस्थितेन कूर्मेण स्वचरणचतुष्टये उदाकृष्टे च भूमेर्धारणाऽऽकर्षणवशादाऽऽकृष्टया
भुवाऽऽभूतान्याऽऽकृष्टानीति भावः॥ किमागमविरोधेन॥ ननु वस्तुतस्त्वाकर्षणे भूसंयोगानंतरं तद्व
स्तुनः परावर्तेन स्थलांतरगमनादनुपपत्तेः पतने चाभिघातात्तदुपपत्तेः पतनाऽनुभवाऽपलापेन
तदुच्छेदप्रसंगाच्छक्तिद्वयकल्पनागौरवाच्चेत्याऽस्वरसादाह॥ समे इति॥ इयं गोलरूपा भूमिः
समंतात् नामस्वस्थानादभितः सर्वत्र ब्रह्मांडपरिधिपर्यंतं समे नासतुल्ये एवं क्वनाम कस्मिन्नयं पततु।
न कुत्रापि॥ स्थिरा एवेत्यर्थः॥ समंताधः प्रदेशाभ्युपगमेन भूमेः निराधारत्वनिर्वाहार्थशक्तिद्वयकल्पनं
कृतं॥ वस्तुतस्तु॥ भूमिगोलस्य ब्रह्मांडगर्भाऽवस्थानेन भूमिगोलादभितो ब्रह्मांडांतर्नभसस्तुल्यत्वया

अवयव=५

शिव. १८

(१ भ्रमणाऽवलोकात् नाम=३) (२ कुः नाम=३) १ भून्या नाम आधार=३

॥ अथ बौद्धमतं विप्रतिपन्नं निराकर्तुं प्रथमं तन्मतमुपजातिकयोपपादयति ॥ भपंजरस्य भ्रमणावलो
कादाधारशून्या कुरिति प्रतीतिः ॥ स्वस्थं न दृष्टं च गुरुत्वमातः क्षेपः प्रयातीति वदंति बौद्धाः ॥ ७ ॥ श्रीः
टी० ॥ भपंजरस्य नाम नक्षत्राऽधिष्ठितगोलस्य ग्रहाणां च भूमेरभितो भ्रमणाऽदर्शनाद्भूमिराधाररहि
ता इति नाम एवमस्माकं प्रतीतिः नाम अनुभवो जातः ॥ अन्यथा दृष्टान्तसिद्धभ्रमणं माधारसत्वेऽ
नुपपन्नः स्यात् ॥ पुनः गुरुः नाम गुरुत्वाऽधिकरणीभूतं वस्तु ॥ स्वस्थं नाम आकाशस्थं न दृष्ट
म् चेतनं किमपि न दृष्टमित्यर्थः ॥ चकारादिदमप्यऽनुभवसिद्धं ॥ अतः नाम अनुभवसिद्धत्वात्
क्षेपो नाम ब्रह्मांडमध्याकाशे स्थापिताऽपि क्षमा नाम भूमिः ॥ आकाशे एव अधो गच्छति प्रतिक्ष
१ प्रतीयते = णं ॥ नोर्ध्वगमनं नहि दृश्यते ॥ इति नाम एवं बौद्धाः नाम वेदानंगीकारकाः पापिष्ठाः वदंति.
नाम अंगीकुर्वन्ति ॥ ७ ॥ ननु भूमेराधारकल्पने भपंजरभ्रमणाऽनुपपत्तिर्न ॥ भपंजरभ्रमणस्य
मेरुपर्वतप्रदक्षिणत्वेन पुराणादिषु भूमेरूर्ध्वगतिसिद्धत्वात् भपंजरस्याधःगमने भूमेः निराधारत्वं २ नु =
जैन = सिध्यति. अतः भूमेः समंतात् भ्रमणं तन्मतेन उपपादयन् तन्निराकरणं उपजातिकयासंगत्यर्थं
प्रतिजानीते ॥ मू० ॥ द्वौ द्वौ रवीन्दू भगणौ च तद्वदेकान्तरौ तावुदयं व्रजेतां ॥ यदब्रुवन्नेवमनंबराद्या
ब्रवीम्यतस्तान् प्रति युक्तियुक्तमिति ॥ ८ ॥ टी० ॥ द्वौ द्वौ रवीन्दू ॥ द्वौ सूर्यौ द्वौ चंद्रमसौ तद्वत् भगणौ.

१

नाम अश्विन्यादि नक्षत्राणि भोमादयश्च तदंत नाम प्रत्येकं द्वेधा ॥ वसमुच्चये ॥ तौ द्विधास्त
कौ ॥ एकांतरौ नाम एकं अहोरात्रं अन्तरं ययोः एतादृशौ तौ । उदयं नाम सुदर्शनयोग्यतां । व्रजेतां
नाम प्राप्नुतः ॥ एतदुक्तं भवति ॥ यस्मिन्दिने यः सूर्यादिकः अस्तस्तद्द्वितीयदिनेऽन्यः सूर्या सा = ३
दिकः उदेति ॥ तृतीयदिने तदेव प्रथमसूर्यादिक उदेति चतुर्थदिने द्वितीयः एवं पुनः पुनरित्यर्थः ॥
एवमुक्तप्रकारेण । अनंबराद्याः । नविद्यते अंबरं नाम वस्त्रं येषां तेऽनंबराः । दिगंबरेत्यर्थः । दिगंबरभेद
स्य बौद्धेषु मुख्यत्वात् । दिगंबराद्याः बौद्धाः स्वग्रंथे । दो चंदो दो सुज्जा इत्यादिवाक्येन । यत् । गोलस्व
रूपं अब्रुवन् । नाम अंगीकुर्युः ॥ ननु युक्त्याऽनुभवसिद्धबौद्धमतात् समे समंतात्कपतत्वियंखेट्र
तिभवन्मतं अनुभवविरोधात् अयुक्तमित्यत आह ॥ अतः नाम अनुभवविरोधात् । तान् । ना
म बौद्धान् । प्रति । युक्तियुक्तं । दूषणं । समनंतरमेवाऽहं ब्रवीमि । नाम वदामि ॥ तेषां मते अनुभव
विरोधादयुक्तं अस्मन्मतं अनुभवाऽविरुद्धं उक्तरीत्या युक्तमेवेति भावः ॥ ८ ॥ एषां मते भूभागाः
प्रत्यक्षसमत्वोपलब्ध्या समचतुरस्राः समकर्णाः अभितः संतीत्यादि दृष्टीकायामुद्घाटितमा
द्यायस्तेषां ॥ ९ ॥ अधः पतंत्याः क्षितिरस्तिनोऽध्या नभस्यऽनंते प्रवदंति जैनाः ॥ द्वौ द्वौ रवीन्दू द्विगुणं
भसंस्याच्चतुर्थं जं स्तंभनिभं च मेरुमिति श्रीयत्युक्त्यावलीयं ति । ते ॥ तन्न ॥ पूर्वबौद्धनक्षत्रतिवाद
ने । भपंजरस्य भ्रमणावलोकादित्याद्यध स्वविरोधापत्तेः ॥ न च मतद्वयं बौद्धभेदादिति वाच्यं ॥

[illegible]

॥अथ वृत्तिज्ञातं विवक्षुस्तावत्पूर्वं प्रतिपादितं भूम्यधोगमनात्मकं वौद्धमतमनुष्टुभा खंडयति॥

मू॰॥ भूरधः खलु यातीति बुद्धिर्बौद्ध मुधा कथं॥ जाता यातं तु दृष्ट्वापि खे यत्क्षिप्तं गुरु क्षितिम्॥१५॥

टी॰॥ हे बौद्ध॥ नाम हे स्याऽरुतत्रात्यत्त॥ खे आकाशे क्षिप्तं यत् गुरु नाम गुरुवस्तु एतत् क्षितिं प्रतियातं नाम गतं दृष्ट्वा भूः आकाशेऽधः खलु नाम नियतं याति नाम गच्छति इति प्रागुक्ताऽबुद्धिस्तव मुधा नाम व्यर्था निर्हेतुका कथं जाता नाम उत्पन्ना॥ अपि शब्दात् उत्क्षिप्तगुरुवस्तुनो भूमिसंयोगात् निश्चये भूम्याऽधोगमनं वक्तुं तव उचितं॥ तन्निश्चयेऽधोगमस्येदं प्रत्यक्षप्रमाणं बाधकमित्यर्थः॥ येन च भूमौ आकृष्टशक्त्या संयोगो भवति॥ इति वाच्यं॥ भूमेरधोगमनेनानुदिनं मधः ऊर्ध्वस्य भचक्रस्याधर्योः निकट दूरत्वाऽऽपत्तेः॥ न च सदा दिनरात्र्योर्महल्लघुत्वादिष्टापत्तिः भचक्रस्याप्यर्धस्य नियतयोजनमानज्ञानात्॥ किंच अधोगमनात् कदाचित् भूम्याः भचक्राधःस्यत्वापत्त्या उदयास्ताऽसंभवेन सदा सूर्यदर्शनं स्यात्॥ न च॥ ब्रह्मांडगोलादियावत्पदार्थैः सह भूमिरधोगच्छति इति वाच्यं सर्वेषां चलने गौरवात् किंच गुरुलघ्वोः तुल्याधोगमनस्य प्रत्यक्षविरोधात्॥ ब्रह्मांडगोलचलनस्य क्वाप्यऽश्रुतत्वाच्च॥ एतेन गुरुवस्तुनः संयोगस्याऽन्यथानुपपत्त्याऽऽकाशे भूस्थित्याऽननुभवेन भूचलनकल्पनात् भूरूर्ध्वं गच्छतीति परास्तं ऊर्ध्वभचक्रस्य निकटत्वापत्तेः॥ कदाचित् भचक्रादूर्ध्वगमनप्रसंगात्सूर्याउदर्शनं स्यात्॥ ननु स्थिरं प्रत्यक्षं चलं

किंच

भूमावलितत्वात् =५


गो.टी.
२०

ऽस्ता=२

२० अथ सूर्यादिग्रहाणां द्वैगुण्यनिरासं कथयन् ध्रुवेन भुवः स्तोतुं कं दृष्टान्तमनु दृष्टमी
पयादयन्ति ॥ मू० ॥ किं गाण्यं तव वैगुण्यं द्वैगुण्यं योऽरुध्याकथ्याः ॥ भार्केन्दूनां विलोक्या ध्रु पि=२
ध्रुवमत्स्यपरिभ्रमम् ॥ १ ॥ टी० ॥ हे दिगंबर ॥ तव वैगुण्यं नाम (त्रिगुणता) प्रज्ञानं किं नाम कथं ग
ण्यं ॥ तव अज्ञानसंख्यागणयितुं अशक्या ॥ दिगंबरत्वेन निर्लज्जत्वात् ॥ त्वं मंगुण्णनामा
कैरः प्रतीयते ॥ ननु वैबुद्धे यदुच्यते तत्स्वस्यन्त्राऽनुभवसिद्धं अतः वैबुद्धेषु अज्ञानं कथं अत आह ॥
यत्त्वं प्रत्यहैक प्रमाणं ध्रुवमत्स्यपरिभ्रमं ॥ उत्तरध्रुवासन्नाऽनेक पूर्वापरतारासन्निवेशेन
विलोक्य = नाम मत्स्याकारः कश्चन नक्षत्रगणोऽभासते ॥ तस्य परिभ्रमणं दृष्ट्वा अपिशब्दात्तत्स्वीकरणं
पठतः भार्केन्द्वादीनां द्वैगुण्यं नाम द्विगुणता रुध्या नाम निर्हेतुकं ऽरुध्याः नाम अकरोत् ॥
वैगुण्यं नाम विगुणतां अज्ञानमित्यर्थः ॥ ध्रुवमत्स्यपरिभ्रमं दृष्ट्वा अपिशब्दात् ध्रुवमत्स्यपरिभ्रमं
पठतश्च ॥ यदा भरण्यीस्थो रविर्भवति तदा तस्यास्तमयकाले चोत्तरध्रुवस्य उत्तरतारासूत्रे भरण्य
ऽस्ति तत्रस्थः सूर्योऽस्तं याति तदा उत्तरतारा पश्चिमतः मुखतारा पूर्वतः रात्र्यारंभे तदासन्नोत्तरकाले वा भव
ति ॥ अथ रात्र्यवसाने तदासन्नपूर्वकाले वा उत्तरतारा परिवृत्त्या पूर्वतः मुखतारा पश्चिमतः ॥ इति सूर्या
स्तोदयकालयोरकस्य उ[illegible] ध्रुवतारासूत्रविच्छेदाऽदर्शनादेक एव सूर्यः न तद्द्वयं एवमन्येषामपि ॥

शिव.
२०

अन्यथा भवन्मतेपि मत्स्यवदि भ्रमात् भचक्रसंपूर्णस्य भ्रमणांगीकारात्॥ संपूर्णभचक्रभ्रमणस्याऽ
होरात्रद्वयेन विद्यमानत्वात्॥ द्वितीयरात्र्यंते पुच्छतारायाः पूर्वदिगवस्थानसंभवेन पूर्वरात्र्यंते पू
र्वदिगाऽवस्थानाऽनुपपत्तेः॥ अतएवाऽपिशब्दस्थानेऽन्द्वा इति पाठः क्वाचित्कः सूपपन्नः॥ एवं च
स=४ [illegible]र्वत्र सदा दिनरात्र्योरेकत्वाऽऽपत्त्या सूर्यद्वयाऽसंभवेन॥ एकसूर्यत्वे
[illegible]तु भूमेः सर्वतः समकर्णसमचतुर्भुजाकारत्वेन सर्वत्र त्रिगुणदि
नमानस्याऽरात्रित्वाऽऽपत्त्याः प्रतिदिनं प्रतिदेशं दिनरात्र्योः भिन्नत्व
कंदुकाकारत्वाऽभावे=१ दर्शनाऽन्यथाऽनुपपत्त्या च भूमेः प्रागुक्तं कंदुकाकारत्वं सूपप
न्नं इति द्योतितमनेन पद्येनेति सिद्धं॥ ९॥ चतुरस्रा भूमिः सूर्य एकः
१भूमेः= इति वदेऽभितः भ्रमणे त्रिगुणसूर्यदिन॥ कुतः भागे [illegible]स्य मेरुणाऽ
न=१ च्छादितत्वात्॥ एकस्मिन्भागे रात्रिः॥ सूर्ये कं मेरोरभितः भ्रमणे त्रिगुण
रात्रिमानं भवति॥ द्वाभ्यां सूर्याभ्यां मेरोरभितः भ्रमणे दिनरात्र्योरेक
त्वं स्यात्॥ एवं नष्टस्तेऽ अतः भूमेः कंदुकाकारत्वं सिद्धम्॥ १०॥ ननु प्रतिदिनं प्रतिदेशं दि
ध्रुवः गोलाकारत्वाऽभावे=२ नरात्रिमानयोर्भेदस्याऽन्यथाऽनुपपत्त्या भूमेः चक्राकारत्वं पुष्करं भगवत्पुराणसम्मतं समीची
चीनं स्यात्॥ दिनरात्रिमानभेदस्य तेनैवोपपादितत्वात्॥ गोलाकारत्वं च प्रत्यक्षविरुद्धं इत्याऽऽशंक्य



(भागवतादिग्रंथेषु=१)

२१

द्रुतविलंबितवृत्तेन खंडयति ॥ मू ॥ यदिसमा मुकुरोदरसन्निभा भगवती धरणी तरणिः क्षितेः । उ
परि दूरगतोपि परिभ्रमन्किमु नरैरमरैरिव नेक्ष्यते इति ॥११॥ टी ॥ धरणी पृथ्वी मुकुरोदरस
३ सीसा= न्निभा आदर्शितलोपमा समानगोलाकाराऽस्ति ॥ समा इत्यनेन कूर्म्मपृष्ठसदृशा प्रफुल्लकम
लसदृशा इति मतद्वयं संगृहीतं ॥ आदर्शोदरसन्निभा भगवती विश्वंभरा कीर्तिता कैश्चित्कैश्च
न कूर्म्मपृष्ठसदृशी कैश्चित्सरोजाकृतिरिति श्रीपत्युक्तेः ॥ ननु भूमेर्भचक्रगोलमध्यस्थत्वा
दादर्शाकारत्वेन गौभेलस्यामध्यपरिधिः तस्मिन्संलग्नभूस्थाया एव भगोलस्यप्रतिबद्धत्वात् भग
ह भ्रमणाऽनुपपत्तिरतः भूविशेषणेन उत्तरमाह ॥ किंभूता धरणी भगवती ॥ गमनं गः
॥ गम्लृ गतौ ॥ अन्येष्वपि दृश्यते ॥ अनेन पाणिनीये न सूत्रेण भावे ड प्रत्ययः ॥ चुटू ॥ गम् अ ॥ डि
त्वाद्भस्यापि टेर्लोपः ॥ ग् अ । अ ऊनं ॥ ग ॥ सु प्रत्ययः ॥ गः सिद्धं ॥ अतः । गमनं गः । भग्रहाणां च
गः इति भगः ॥ ग्रहसहं प्रदक्षिणं तया भगो यस्मात् इति व्युत्पत्त्या भगो मेरुपर्वतः ॥ पुराणमते
मेरोरभितः भचक्रभ्रमणं तु ॥ भगो मेरुः इति सिद्धं ॥ भगो विद्यते यस्यां सा भगवती ॥ मेरुपर्वत
वतीत्यर्थः ॥ तथा च यन्मते आदर्शाकारत्वं भूमेः तन्मते भगस्य प्रदक्षिणतया भूवलयोपरि भगोल
स्य भ्रमणांगीकारान्न क्षतिरिति भावः ॥ ननु सर्वासां दिशां सर्वदेशेषु कस्या नस्य नियमाऽभावात् मेरुः

[illegible]

^४ भूमेरादर्शाकारत्वे =१

मेरुका जो अधःप्रदेश याताल विशेष सोहि दक्षिण
अर्थात् मेरुसे दक्षिण दिक्ऊध:२

प्रस्तुत सर्वावरस्यानस्यैकत्वाऽभावेन मेरोर्नियतत्वाच्चाऽधःप्रदेशो मेरोर्दक्षिणत्वाऽऽपत्तेः॥ यदि

भवतां=२ एवं सैपुराणमतं अङ्गीकृत्य अस्मद्ऽभिमतं गोलाकारत्वं नाऽऽद्रियते तर्हि तरणिः सूर्यः नरैः

भूपृष्ठस्यैरस्मदादिभिः॥ अमरैः मेरुपृष्ठस्थैः इव किमु कथं न दृश्यते दृश्यते॥ तथा

च॥ यथा देवानां मेरुस्थानां सदा सूर्यदर्शनं तथाऽस्मदादीनां दर्शनाऽऽपत्त्या रात्र्यऽनुपपत्तिः॥ नमा

ननु नृणां मस्मदादीनां भूसंलग्नतया सूर्योदयास्तयोर्दर्शनात्तदऽवगतदिनरात्र्योः अत्य

रात्रे:=६ न्तत्वाच्चाऽनुपपत्तिरित्यत आह॥ तरणिः किं कुर्वन् सन्॥ दितेः नाम पृथिव्याः सकाशात्

उपरि नाम ऊर्ध्वपरिभ्रमन् सन्॥ अर्थात् प्रवहानिलेन भ्रममाणः सन्॥ तथा च तन्मते

भूमेः सकाशात् सूर्यस्याधोभ्रमणाऽभावात्सदासूर्यदर्शनेनरात्र्यनुपपत्तिः एवमधोभ्रमण

ऽभावेनभूसंलग्नताऽनुपपत्त्योदयास्तयोरेवाऽसंभवप्रसंगः॥ ननु मेरोरुच्चत्वात्तत्स्थानां

व्यवधायकाऽभावात्सदासूर्यदर्शनं भूपृष्ठस्थानां तु भूमेरूर्ध्वे सूर्यभ्रमणेपि पर्वतान्तर

य्यवधानसंभवात् पर्वतान्तरकृताऽऽविर्भावतिरोभावरूपसूर्यस्योदयास्तोपपत्यारात्र्युपपत्तिः॥

न चैवमुदयास्तयोर्भूसंलग्नतया सूर्यदर्शनाऽनुपपत्तिरितिवाच्यं दूरत्वदोषात् दर्शनस्याऽ

॰अपि=३ त्यंगीकारात्॥ इत्यत आह॥ किंभूतां स्तरणिः॥ दूरगतः अपि॥ पोराणिकरीत्या मानसोत्तरपर्वत

समसूत्रेण मेरोरप्यूर्ध्वंगतः॥ अर्थात् मेरोरप्यूर्ध्वं मेरोः समं तात्स्थितः अर्थात्सूर्यः॥ अपि शब्दो

सूर्यस्याऽतिदूरस्थत्वेनाऽदर्शनयोग्यताया अपि दर्शनमुद्घाटयति तेजसांगोलकः सूर्य इ

गो.टी.
२२

मेरु=१

(छायादीनां छाया उपपत्तिर्न सूर्यस्य मेरुणाऽऽच्छादितत्वात्)

ननु तावत्स्य यदि तं पर्वतादेरुच्चत्वाऽभावेपि व्यवधाने सति. समाधानस्याऽप्रयोजकत्वात्. अन्यथा
छायाऽनुपपत्त्याऽऽपत्तेरित्यऽप्रमाणं.॥ तद्रूछायां तर्गतद्रूपस्य यथा सूर्यो न दृश्यते. तथाऽस्मदा
दीनां मेरुच्छायांतर्गतत्वात् राज्युत्पत्तौ न काचित्क्षतिः तत एव उत्तरगोले सूर्यस्याऽधिकोच्चस्य
त्वेन मेरोरूर्ध्वमधिकांतरात् सूर्यस्य बहुकालपर्यंतदर्शनात्. महल्लघु दिनरात्री भवतः॥
दक्षिणगोले सूर्यस्य मेर्वाऽऽसन्नत्वादऽल्पकालपर्यंतदर्शनात्. लघुमहत्त्वे दिनरात्री विषुव
दिने नाममेष तुलादौ तु तुल्यदिनरात्री कुतः सूर्यस्य भूमेः सकाशात् लक्षयोजनांतरेणसत्वा
त्. अतः पुराणमतं सम्यगेव प्रतिभाति॥ मेरुस्थानां तु सूर्याऽदर्शनरूपरात्रेरभावः॥ कांचन
भूम्युत्तरदलेमेरोः छायाऽभावात्. क्वचित्सदा नरात्रिरित्याशंक्य दुत्तविलंबितेन निषेधय
ति॥ यदि निशाजनकः कनकाचलः किमु तदंतरगः स न दृश्यते॥ उदगयं ननु मेरुरथां
शुमान्कथमुदेति च दक्षिणभागके॥ १२॥ टी॥ ननु. निशाजनकः नामरात्र्युत्पादकः
यदि. कनकाचलः नाम मेरुपर्वतोऽस्ति चेत्तदा. तदंतरगः नाम. द्रष्टृसूर्ययोः अंतरगः
नाम द्वयोर्मध्ये व्यवधाने नस्थितः स. नाम. मेरुः. किमु. नाम कथं. न दृश्यते॥ दर्शने
यः प्रतिबंधकः तदऽवश्यदर्शननियमान्मेरुदर्शनापत्तेरन्यथा॥ मेरुः सूर्यदर्शनप्रति

॥ श्रीकृष्ण ॥ ॐ ॥ [illegible]

22

मेरोः प्रत्यक्षं तस्या दर्शनं स्यात्: ३

॥ अथ ॥ १

अथाऽतिदूरत्वात्सुमेरुः न दृश्यते ॥ इति चेत्: तत्ताभ्रवादीनामप्यऽनुपलंभापत्तेः ॥ निःप्रभत्वान्मेरुः न दृश्यते इति चेत्: तदाकनकरत्नमयत्वेनाऽर्ककिरणप्रतिफलनात् मेरुः दर्शनप्रसंगो ॥ भवितुमर्हतीति ॥ अथ व्यवहितत्वान्न दृश्यते ॥ तदा मेरुप्रमाणेनाऽन्यपर्वतो न दृश्यते लोके शास्त्रे च ॥ अन्यथा मेरुव्यवधायकस्यैव रात्रिजनकत्वापत्तेः ॥ तदऽनिर्वचनात् ॥ अथ दिने सूर्यतेज आधिक्यात् रात्रौ अंधकारादिप्राबल्यात् मेरुदर्शनं न भवति चेत्तदा उदयास्तयोः रुच्चत्वेनोपलंभापत्तेः न भूः संलग्नतया ॥ उदयास्तसमये मेरुदर्शनापत्तेश्च ॥ अथोच्यते ॥ महाप्रमाणोऽपि मेरुस्तथापि दूरत्वात् भूमौ निमग्नः इति चेत्तर्हि तस्याऽऽच्छादकत्वाऽनुपपत्तेः एवमत्रत्यानां सदादिनप्रसंगः स्यात् ॥ सूर्यभ्रमणस्य उच्चैर्दृग्विषयत्वात् ॥ चेद्यदि मेरुदर्शने मेरोः छाया एव कारणं ॥ तदा उत्तरदिग्गस्माभिः घनतिमिराच्छन्नः कथं न दृश्यते ॥ ध्रुवोत्तरस्थितताराणां क्षितिजस्याऽदर्शनापत्तेश्च ॥ ननु ताराणां सूर्यापेक्षयाऽतिदूरस्थत्वेन मेरोः व्यवधानाऽसंभवात् प्रकाशे न एव उत्तरदिशा घनांधकाराऽनुत्पत्तेः क्षितिजस्थाऽमेरुत्तरत्वेनोपलंभाच्च ॥ मेरोर्निशोत्पादकत्वांगीकारे न कापि क्षतिः इत्यऽस्वरसात् दूषणांतरमाह ॥ उदगिति ॥ अयं ॥ अत्युत्पादकत्वेन प्रसिद्धो मेरुपर्वतः यस्मात्कारणात् उदक् स्वस्थानादुत्तरस्थितः अथाऽमुमानुनाम सूर्यः दक्षिणभागके नामस्वाभिमतदक्षिणस्मिन् तत्र देशे कथमुदेति ॥ अस्मात्कारणात् सूर्यस्य

यदि मेरुतया निशः स तस्याऽर्कस्योदयस्तर्हि प्राच्यां उत्तरस्यां ॥ नाम=२ यतः मेरुउत्तरतः स्थितः ॥=२
अस्योदये न भवितव्यं

दर्शनापत्तेः ६

मेरोरपि=८ मेरुसंबंधिसंनिधौ

मेरोः

23

॥ प्रत्यक्षोपलब्धः ॥

२४

शान्त्यैऽक्षांशाश्वधिदेशेसूर्यस्य खमध्यस्थत्वाऽनुपपत्याततर्गच्छायाऽभाव देशेऽस्याऽनुपपत्तिप्र
संगस्यादित्यादि दूषणगणैः पुराणमतस्यायुक्तत्वात्॥ एवं पक्षिशेषतः भूमेर्गोलाकारत्वं सिद्धं॥
तेन च भूमिप्रदेशा एव सूर्यस्य व्यवधायकः मेरोश्चापि॥ भूम्याभितो भ्रमणाद्दिनरात्रिभेदो पपत्तिसिद्धे
तिन किंचित् गणितजातमनुपपन्नमितिध्येयम्॥ १२॥ ननु एकयोजन परिभ्रमतः पुरुषस्य कुत्रा
पि भूमेर्गोलाऽवयवस्याऽनुपलंभात्सर्वत्राऽऽदर्शोदराकार प्रतीतेश्च गोलाकारत्वं प्रत्यक्षोपलब्ध्याऽनु
पपन्नमित्याह उपजातिकयाह॥ इयमेव प्रत्यक्षविरोधशंका॥ मू॥ समो यतः स्यात्परिधेः शतांशः पृ
थ्वी च पृथ्वी नितरां तनीयान्॥ नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा॥ १३॥ श्री·
टी॥ यतो यस्मात्कारणात् तत्पृष्ठगतस्य नाम भूगोलपृष्ठे ~~स्थितस्य~~ गतत्राऽवस्थितस्य तस्य पु
रुषस्य॥ सा भूमिर्गोलरूपापि॥ कृत्स्ना नाम संपूर्णाः समा नाम आदर्शोदराद्दिव प्रतिभाति॥
इवेत्यनेन यथार्थतः स्वरूपाऽभावात्प्रतिभाति॥ इयं भूः यथार्थस्वरूपाऽभावत्ती आद
र्शोदराद्दियंइति प्रतीतिर्भवतीत्यर्थः॥ कुतः इत्यत आह॥ समयति॥ यतो यस्मात्कारणात्
परिधेः नाम वृत्तपरिधेः॥ शतांशः नाम शतभागतुल्यः प्रदेशः॥ समः नाम यष्टिवत् स्यात्॥ न
तिरश्चीनः॥ यथा कंदुकादुपरितन प्रदेशे तत्परिधेः शतभाग प्रमितं यत्सर्षपादि॥ स्थापितं स न पत
ति॥ तद्वधिकमामलकादिपतत्येव॥ अतो ज्ञातं॥ वृत्तस्य वर्तुलवस्तुनो यत्किंचिन्नपि प्रदेशः समो हीति॥

च १

Margin notes (left): गोलत्वं=६; वस्तुतः=५

Margin notes (right): सूर्यादीनां ३; दर्शोदराकारया=५; व=५

लघ्वं=१ तिरश्चीनत्वेन=२

दंडवत्त्वेन=३

पल्लवत्वं दृश्य स्यज्या २२५ ए तत्तुल्यानअसा दृधिकाँशस्थूलांशः इति

॥ असमस्य तिरश्चीनत्वेन स्थापितवल्कनः प्रपातसंभावनात् ॥ अत उपपन्नं शतभागस्य समत्वं ॥
१ तस्य तिरश्चीनत्वेन सर्वेऽवयवास्तिरश्चीनाः संति तथापि कश्चन परिधिअंशः सूक्ष्म तिरश्चीनोपि तत्वेतया
नभासते ॥ किंतु समत्वेन भासते ॥ स तु कतमोऽवयव ॥ अत आह ॥ १ तस्य पल्लवत्वं शोऽदृश्यदंडवद्दृश्य
ते तु स इति शाकल्येन तया ॥ अयमपि प्रथमज्यायाः सूक्ष्मरीत्या तत्वाष्वितुल्यत्वोनु २२५ पपत्यां स्थू
ल इति मत्वा लघार्यभट्टेन तत्तोऽप्यतिसूक्ष्मांशज्ञानार्थं दशाधिकशतभागः ११० परिधेः समत्वमुक्तं ॥
तत्राचार्यैः आर्षपौरुषसम्मतां श्रियोर्योगाधीऽसन्नः शतभागो लाघवादंगीकृत इति ॥ तथा च
गोलत्वे पयंशे समत्वभानात् समसंडलाकारदर्शने न क्षतिरितिभावः ॥ नन्वेवं कंदुकस्यापि समतया
दर्शनापत्तिरित्यत आह ॥ पृथ्वीति ॥ पृथ्वी नाम भूमिः नितरां नाम अतिशयेन पृथ्वीः नाम म
योजन=६ हती किंचिदूनपंचसहस्रप्रमाणा ॥ तेन कंदुकांशेऽतिसूक्ष्मतयाऽयासमत्वेसत्यपि समत्वेन भासते ॥
स्य=५ भूगोलस्य तु किंचिदूनपंचाशत् ५० योजनभागैः समत्वात् समता प्रतीयते इतिभावः ॥ अस्माद् ५०
ऽधिकांशे तु समता न भासते ऽपि तु गोलाकारत्वमेव प्रतीयते ऽत आह ॥ तनीयानिति ॥ च पुनः
नरः नाम मनुष्यः यतस्तनीयान् नाम अतिशयेन लघुत्वः भूः अतः भूगोलरूपा न प्रतीयते ॥
तत्पृष्ठगतस्येत्यनेन उच्चस्थानो भूपृष्ठस्य दर्शनभागोऽधिकभागदर्शनात् पातिराजस्य ब्रह्मणो
वा गोलाकारप्रतीतिरसीति सूचितम् ॥ एवं च ॥ मंडलाकारदर्शनेन गोलत्वं विरुद्धमिति भावः ॥ ५२ ॥
१ ९ सूर्यसिद्धांते ॥ अ[illegible]वृत्तो मरवं पश्यंपति व त्तामध्येनांचक्राकारां

४८

गो॰ टी॰ २४

यथार्थकरणाय ते सर्वः॥

॥ अथ कियन्मानेति प्रश्नस्योत्तरं प्रोक्तो योजनसंख्यया इत्यनेन एवोक्तं तत्तु राणविरुद्ध
मतः उपपत्त्या तत्समंजसं करणाय उपजातिकयाह्वै उपपत्तिमाह॥ मू॰॥ पुरोत्तरं चेदिदमु
त्तरं स्यात्तदा हि विश्लेषलवैस्तदा किं॥ चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः
प्रमाणमिति॥ १४॥ टी॰॥ कयोश्चित्तु दक्षिणोत्तरसूत्रस्थयोर्नगरयोः वक्ष्यमाणरीत्या ज्ञातध्रु
वोन्नतिरूपा ऽक्षांशमानयोर्विश्लेषे नाम अंतरे ये लवाः॥ तैस्तदक्षविश्लेषलवाः तैरक्षविश्लेषल
वैश्चेद्यदि इदं चतुःक्रोशात्मकयोजनमानेन मापितं पुरांतरं उत्तरं एतन्मितं लभ्यते तदा च
क्रांशैः १२×३०=३६०॰ एतन्मितैः किं स्यात्॥ एतादृशया ऽनुपातयुक्त्या प्राग्युक्तं मध्याधिकारो
क्तं परिधेः नाम भूपरिधेः प्रमाणं युक्तं नाम वास्तवं [illegible] असन्नेत्यर्थः॥ अनुपात्यते नाम प्र
माणसंबंधिफलं इच्छासंबंधेन क्रियते इत्यनुपातः॥ न्यूनाक्षदेशादधिकाक्षदेश उत्तर एवेति
नियमद्योतकः उत्तरमिति पदे॥ अन्यथा दक्षिणमिति निवेशः कथं न कृतः॥ पूर्वापरांतरे ऽन्यत्र वा
तत्समसूत्रेण भगोले नियततस्यानवयं जकतारादीनामभावात्तदंतरेण तदज्ञानमसुलभं॥ भूमेः
गोलत्वेन सर्वत एकरूपपरिधित्वात् दक्षिणोत्तरभूपरिधिमानं भूमेर्भचक्रांतः स्थितं इति॥ अंशा
ऽनुपातः स्थूलः परंतु अपरमतापेक्षया स्वमतं युक्तिसिद्धं इत्युक्तौ तात्पर्यात् स्वल्पांतराच्च न दो

निरन्तरेशः स्वदेशाद्यथा यथा दक्षिणे लोमवति तथा २
विश्लेषकाद्विषुवद्वृत्तं नतं तयोरंतरे ऽप्रोशाः ते च
निरक्षदेशादपसारयोजनैः अनुपातेनोत्पद्यन्ते इत्यभिप्रायः॥

अमुकसंख्याकं
१ इति नाम २
२ निरुक्तं इति नाम

॥ पठितमानं॥

(१८)

शिव॰ २४

॥ नमुरुत्यं सिद्धांते पुराणादिषु च षोडशकोटिविस्तारे पंचाशत्कोटिमितं भूवलयं प्रतिपादितं इति च हस्तटीकायां सविस्तरं विश्वरूपैः संगृहीतं तत्कथं त्वदुक्तं भूपरिधिमानं युक्तियुक्तम पि संगतमित्यतः पूर्वोक्तस्यायुक्तत्वं तत्प्रतिपादनच्छलेन टीकर्तुरुपजातिकया पुराणोक्तं निराकरो

नि=४ ति ॥ मू॰॥ निरक्षदेशात् क्षितिषोडशांशे भवेदवंती गणितेन यस्मात् । तदंतरं षोडशसंगुणं स्याद् भूमानमस्माद्बहु किं तदुक्तम् इति ॥ १५॥ टी॰॥ यस्मात्कारणात् अवंती नाम उज्जयिनी निरक्ष देशात् धृवोन्नतिरूपाऽक्षाऽभाववद्देशात् स्वदक्षिणोत्तरवृत्तस्था रासन्नात् ॥ यद्वा॰ निरः स्वरशास्त्र रीत्या खं विंशतिसंख्यावाचकः ॥ तन्मितानि अक्षीणि यस्य असौ दशमुखत्वात् रावणस्तद्देशात् लंका ख्यात् क्षितिषोडशांशे नाम भूगोलपरिधेः षोडशभागे ॥ गणितेन नाम पूर्वोक्तरीत्याऽवगतगणितवि चारेण भवेत् ॥ अयं भावः यतः निरक्षदेशादवंतीपुरी पूर्वोक्तरीतिगणितेन क्षितिषोडशांशे दृष्टपत्ते लोक सिद्धं अन्तरदेशगणनया वा सिद्धं भूपरिधेः षोडशांशपरिमितं तयोरंतरं लंकोज्जयिन्योरंतरं इत्यर्थः ॥ अ त्र ॥ भगोलवृत्ते षष्ठ्यधिकशतत्रय ३६० अंशाः ध्रुवः समंताच्च समांतरे ब्रह्मणा विभक्ताः तैरंशैः भूप रिधेः पूर्वयुक्त्या संभवात् ॥ उज्जयिन्यां अवंतीष्वपि सार्धद्वाविंशति २२ ॥ रक्षांशाः सन्ति॰ तेषां चक्रांशस्य ३६० षोडशभागत्वात् ज्ञाताः स्माभिः लंकातोऽवंती भूपरिधेः षोडशांशोऽस्ति एवं अंतरदेशगणनया पि परिधेः षोडशांशमितांतरं तयोः । अथाशक्यसापि षोडशांशमितांतरं तयोः ॥ तदंतरं नाम तयो रंतरं लोकसिद्धमध्ययोजनसंख्यामानं षोडशसंगुणं यत्तत्परिमितं भूमानं नाम भूपरिधिमानं स्यात् । तदस्म

४ नराणां=४

३१०६ ... योजनं ...

भुवः =२

(२५) उज्जयिन्याः अन्यस्मिन् निरक्षदेशे परिधौ तत्स्थानीयत्वेऽपि दक्षिणोत्तरसंयोगो न भवति ॥ मेरुं न स्पृशतीत्यर्थः ॥ मेरुः उज्जयिनी लंका ॥ कुरुः दक्षिणोत्तरस्थानापरपर्यायपतितः ॥=२

उज्जयिन्याः =१

उज्जयिन्याः =१

स्वदेशनिरक्षदेशयोः

लंकादेशादन्यनिरक्षदेशानां तद्दक्षिणस्थस्यत्वाऽभावात् स्वत्वाऽभावाच्च तेभ्यः परिधिबोडशांशेऽन्तरे नवतिस्थितिरिति तात्पर्यम् ॥ संदेहात् ॥ तथा च पूर्वोक्तानुपातार्थं दक्षिणोत्तरतुरयोः दृक्षांशदर्शने कश्चित् स्वदक्षिणस्थस्य देशेषु यत्र वशाद्दक्षांशाऽभावोऽस्तीत्यनुमितं ॥ एतेन स्वदेशाऽक्षांशैः भक्ता चक्रांशाः ३६० यत्फलं तन्मितभूपरिधिभागो निरक्षदेशात्स्वदेशोऽस्ति ॥ लोकसिद्धं तयोर्योजनेमानं अन्तरस्थं यत्र तेन गुणितं पूर्वं लब्धरूपफलं यत्तत् भूपरिधिः स्यात् ॥ एतेन अनन्तयोजनाभूदित्यपास्तं ॥ यत्तु कोटिशब्दस्याऽनेकार्थत्वात्कोटिशब्दः शत १०० वाचि ॥ तेन पंचाशत् शत ५००० भूवित्ती ...त्य विरोधः ॥ तन्न ॥ पुराणोक्तद्वीपसमुद्रादीनां मानानामनुपपत्तेः ॥ इत्यलं विस्तरेण ॥ इति सिद्धान्तशिरोमणौ परिधिकाकारे रुक्तम् ॥ १५ ॥ ननु मध्यमाधिकारे याम्योदक्कुरयोरित्यनेन परस्परविरुद्धाऽनेकपरिधिमानानामऽभेदप्रतिपादनात्पुराणोक्तभूपरिधिः पंचाशत्कोटिमितो युक्तः ॥ स्वाभिमतयोजने तन्मतयोजनानि स्वपरिधिभक्तानि तत्परिधिमितानीत्यऽभेदाद्योजनभेदस्य नानात्वात् ॥ अतः पूर्वोक्तयुक्त्यायवोदरैरंगुलमष्टसंख्यैरित्यादिना यद् तद्योजनानि गणितानि तान्येव लक्षगुणितानि तन्मते तद्योजनानि तेभ्य उक्तयुक्त्या पंचाशत्कोटिमितभूपरिधिरुपपन्नः ॥ इति तन्मतेऽप्युपपत्तिरस्तीत्यतो वृत्तसंदीत्युक्त्याह ॥ मू ॥ अंगोन्नतिग्रहसुतिग्रहणोदयास्त छायादिकं परिधिना घटते मुनाहि ॥ नान्येन तेन जगुरुक्तमहीप्रमाणं प्रामाण्यमन्वययुजा व्यतिरेककेण इति ॥ १६ ॥ टी ॥ हि यस्मात्कारणात् अमुना

१ नान्येन =२

टी =८

शिव ·
२५

25

१ नामव्यतिरेक=२

नहस्युतिग्रहणेदयास्तच्छायादिकं घटते· तेनकारणेन उक्तमहीप्रमाणं· प्रमाणं नामयथार्थोऽनु
भवस्तं व्यतिरेककेण सहचारेण पूर्वाचार्याः जगुः नाम आहुः॥ अर्थाद् उक्तमहीप्रमाणस्य प्रमाणतां व्य
तिरेकसहचारेण पूर्वाचार्याः जगुरित्यर्थः॥ किंभूतेनव्यतिरेककेण· अन्वययुजा नाम अन्वयसहचारयु
क्तव्यतिरेकसहचारेण इत्यर्थः॥ नान्येन· नाम उक्तप्रमाणसंमतपरिधिमानेन शृंगोन्नत्यादिकं न घटते इत्यर्थः॥
यत्सत्वे यत्सत्वं सोऽन्वयः॥ यद्भावे यदभावे यदभावः सव्यतिरेकः इति लक्षणं सहचारस्य॥१६॥ श्रीः॥

अन्येऽपि निरक्ष
देशाः संति ते
षां कुतः ग्रहणं
न कृतमिति भावः॥

स्यादेतत्॥ परं तु· निरक्षदेशादित्यनेन लंकादेशः कथमवगतः तत्राऽन्यदेशाऽनुत्पत्तेः कारणाऽभा
वादित्यतो व्यक्तमात्रस्य मध्यपूर्वापराधः पार्श्वद्वयेति षड्भागसद्भावनियमात् भूगोलस्य षड्भागाः
केन प्रकारेण इत्याशंकोत्तरभूतं षट्स्थानसन्निवेशकथनच्छलेन उत्तरमुपजातिकयाह॥ मू·॥
लंका कुमध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनं च॥ अधस्ततः सिद्धपुरं सुमेरुः सौ
म्ये च याम्ये वडवानलश्च· इति॥१७॥ टी·॥ कुमध्ये नाम भूगोलमध्यभागे लंका॥ अस्याः लं

४ चकारात् लंका
देशादेवेत्यर्थः॥४


कायाः सकाशात् प्राक् नाम पूर्वदिग्भागे यमकोटिसंज्ञं नगरमस्ति॥ च पुनः लंकायाः सका
शात् पश्चिमे नाम पश्चिमदिग्भागे रोमकपत्तनं नाम रोमकाख्यनगरमस्ति॥ ततः नाम लंकातः
देशात्· अधः नाम अधःप्रदेशे सिद्धपुरं अस्ति· अथाऽनंतरं सौम्ये· नाम उक्तनगरेभ्यः उत्तरदिग्भा
गे मेरुः हेमाद्रिः॥ चकारात् नाम नगरचतुष्टयात् लंकायमकोटिरोमकसिद्धपुरेभ्यः याम्ये नाम दक्षि

णदिग्भागे वड़वानलः नाम वड़वाख्योऽग्निः॥ त
स्यानमस्तीत्यर्थः॥ तथा चोज्जयिनीसंबंधिदैत्यस्सू
त्रो निरक्षदेशः लंकाएव अतः निरक्षदेशेन लंकायाः ए

उक्त=१

यद्यपि =१

ननु गोलवल्लन: यत्र तत्रापि मध्यत्वसंभवात् लंका कुमध्ये इत्ययुक्तं तथापि लोकव्यवहारा
र्थं कश्चित्तद्देशस्य मध्यत्वकल्पनाऽवश्यकत्तया स्वतंत्रस्य नियोगानर्हत्वात् ब्रह्मणा लंकैव
भूपृष्ठे मध्यत्वेन कल्पिता इति ध्येयम् ॥१७॥ ननु लंकादेशात् यत्र पूर्वापरसू
त्रं ...समेरुं वडवानलं च न स्पृशति अतः लंकास्थानात् कियत्यंतरेण मेरुव
डवानलयोरवस्थानं इत्यत: तदुत्तरं तत्प्रसंगात् पूर्वापरसूत्रस्य लंकादि
उत्तरचतुष्के मनुष्यागम्यत्वेन दशशिरःपुरीत्यादिना राक्षसनिवाससूचनसा...
नात्वाऽवशिष्ट मेरुवडवानलयोः मनुष्यगोचराऽभावात् तयोः केषामव
स्थानं इत्याशंकायां उत्तरं च उपजातिकयाह ॥ मू. ॥ कुवृत्तपादांतरितानि तानि
स्थानानि षट् गोलविदो वदंति ॥ वसंति मेरौ सुरसिद्धसंघा और्वे च सर्वे नरकाः सदैत्याः ॥१८॥ टी. ॥
गोलविदः नाम भूगोलस्वरूपतत्त्वज्ञाः पूर्वाचार्याः तानि नाम पूर्वोक्तानि षट्संख्याकानि स्थानानि.
लं. यम. सि. रोम. ४ मेरु. ५ वडवा. ६ यानि परस्परं कुवृत्तपादांतरितानि नाम भूगोलस्य परि
धेः चतुर्थांशमितांतरं येषां तानि कुवृत्तपादांतरितानि सन्ति एवं गोलविदः वदंति ॥
तथा च पूर्वापरसूत्रे दक्षिणोत्तरसूत्रे च पूर्वोक्तस्य चैव नगरचतुष्टयस्य सिद्धत्वात् तेषां च भूपरिस्थत्वेन
विशेषतोऽनुक्तेश्च कथं चतुर्थांशांतरेऽवस्थानमुक्तमिति चेत् सत्यं स्यादुक्तत्वादितिन्या



मेरु उभयत्र विनि
गतिः उपरिस्थः मे
रुसंज्ञः अधःस्थः
कुमेरुसं
ज्ञः कुमेरुरे
व वडवानलस्था
नम् इति भावः

पूर्वापरदक्षिणोत्तरवत्त्रिधिसूत्रेणेषा
मवस्थानं इति स्पष्टतया नोक्तं =१

तेषां =१

अथ च॰ भूवृत्तपादविवरााणीत्यादि सूर्यसिद्धांतोक्तं वर्णयंति इति तत्त्वं॰ ॥ एतेन॰ प्रतिस्पर्धिनगरयोः
नैमैरेकरेषास्थयोरेकेनयुग्मवहितयोः परस्परं परिध्यर्धमितमंतरं उक्तं पूर्वचक्रे स्पष्टतया प्र
तीयते॰ ॥ द्रष्टव्यम्॰ ॥ इति संचितं॰ मेरुवडवाग्न्योः गोलार्धमितांतरं ॥ मेरौ सुरसिद्धसंघाः वसंति॰ ॥ अ
धितिष्ठंति इत्यर्थः ॥ अत्र बहुवचनं अनंतसंख्याद्योतकः ॥ अथो वै नाम वडवानलस्थाने सर्वे दैत्याः
नरकाः अष्टाविंशति संख्याकाः पुराणप्रसिद्धाः चकाराद्व संतीत्यर्थः ॥ वडवानलस्यातिदाहकत्वेन
याातनार्थं नरकाणाम् वैपीतत्राऽवस्थानं युक्तं तत्संसर्गी त्वेषामति दाहकत्वसंभवात्॰ देवविरोधि
५ वाऽ=६ त्वात् दैत्यानामपि तत्रैवस्थानं युक्तमितिभावः ॥ सूर्यवचनाच्चाधः स्थितास्तादसुरास्तद्वद्दिवंतो न्योन्य
माश्रिता इत्यादि सूर्यसिद्धांतवचनैश्च॰ ॥ इत्यलं विस्तरतः ॥ ८ ॥ ननु एवं लंकातः भूपरिधिच
तुर्थांशांतरस्थितनगराणां परमतिर्यक्त्वेन अधःस्थः सिद्धपुरस्यापि च पतनसंभवात्॰ समे समं
तात्कपतत्वियं खे इति पूर्वोक्तस्याभिप्रायमुपजातिकाभ्यां स्फुटयति॰ ॥ मू॰ ॥ यो यत्र तिष्ठत्यवनीं
तलस्थामात्मानमस्या उपरिस्थितं च॰ ॥ स मन्यतेतः कुचतुर्थसंस्थामिथश्च ते तिर्यगिवाऽऽमनं
ति॰ ॥ ११ ॥ अधः शिरस्कं कुदलांतरस्थाः छायामनुष्या इव नीरतीरे ॥ अनाकुलास्तिर्यगधःस्थि
ताश्च तिष्ठंति ते तत्र वयं यथात्र इति॰ ॥ १२ ॥ टी॰ ॥ यः जंतुः यत्र नाम यस्मिन्भागे तिष्ठति स जीवः अ
वनीं नाम पृथ्वीं स्वाऽधःस्थितां मन्यते अस्याः भूमेः उपरिस्थितं स्वम् आत्मानं मन्यते॰ तेन भूगोलदृष्टे

गो॰टी॰ ३७

27

ॆनाम=३.

तिर्यक्त्वास्या ऽभावः पूर्वमनेकधा निर्णीतः तेनाधः स्थितानामधः प्रदेशाऽभावात्पतनाऽभावः॥
ननु लंकादेशात्तन्नगराणां तिर्यक्तया तत्रस्थाः लोकाः प्रत्यक्षतिरश्चीनाः ते तु पतनीया एव इत्य
तआह॥ अतइति॥ अतः ते लंकादिदेशस्थाः लोकाः मिथः नाम परस्परं कुचतुर्थसंस्थाः नाम
भूपरिधिचतुर्थांशांतरे एवस्थिताः संतः तिर्यक्रूद्र न आमनंति वदंतीत्यर्थः॥ इव इत्यनेन न तिर्यक्
त्वस्याऽभावेपि मिथः तिर्यक्त्वं आमनंति॥ वस्तुतः तदऽभावं आमनंतीत्यर्थः॥ १९॥ ननु त
था प्यऽधः स्थितानां अवश्यं पतनाऽऽपत्तिरत आह॥ अधः इत्यादि॥ कुदलांतरस्थाः नाम भूपरि
ध्यर्द्धांतरे एवस्थिताः मिथः अधः शिरस्काः नाम अधोमुखाः वदंति॥ एवं चेत्तदा पतनाऽभावस्य
व्याघातोऽऽपत्तिस्तोहदृष्टांतद्वारा तत्पतनं निवारयति॥ कइवाधः शिरस्कास्ते॥ नीरतीरे नाम त
डागनदीजलोपकंठे छायामनुष्या नाम प्रतिबिंबमनुष्या इव॥ यथा प्रतिबिंबरूपो मनुष्यः अधः
शिरस्को भवति तथाधः शिरस्कास्ते इति भावः॥ भ्रमेण तथाऽऽभानं वस्तुतः भूमेरधोभागाऽभावेना
ऽधोमुखत्वं असंभाव्यमेवेति प्रपतनाऽभाव इति भावः॥ ननु तत्रस्थाः लोकाः पतनशंकयाऽऽकुलाः भ
वंति कथं च व्यवहरंति ते इति मंदाशंकायां उपसंहारव्याजेनोत्तरमाह॥ चपुनः ते तिर्यगधः स्थिताः लो
काः तत्र अनाकुलाः नाम अव्याकुलाः निःशंकतया एव तिष्ठंति यथा अत्र वयं तिष्ठामः तद्वत्ते

पतनाभावाभावा ऽऽपत्तिलव॥ ८ =

भूःप्रदेशादन्यत्र कस्यापि प्रदेशोऽनघ ॥
॥ भूपते यत्र ते पांवतनं भवेत् ॥ ईश्वरशक्तिवशात् ॥
॥ स्यतनाऽभावोऽस्मन्मते ॥ [illegible] ॥ श्रीरस्तु ॥

शिव॰ ३७

ननु कीदृक् द्वीपेत्यादि प्रश्नोत्तरं सामान्यतो भूगोलविभागाभ्यां शालिन्याह ॥ मू० ॥ भूमेरर्धं क्षारसिंधोरुद
क्स्थं जंबूद्वीपं प्राहुराचार्यवर्याः ॥ अर्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यंबुधीनां निवेश इति ॥ २१ ॥
टी० ॥ क्षारसिंधोः तीरात् उदक्स्थं यत् भूमेरर्धं तत् जंबूद्वीपं आचार्यवर्याः सूर्यादयः प्राहुः नामप्र
कर्षेण वदंतीत्यर्थः ॥ एतेन क्षारसमुद्रवलनमध्ये मंडलाकारं जंबूद्वीपं प्रसाल सिद्धं ॥ तथाऽस्म
न्मतेपि भूगोलार्धरूपं क्षारसमुद्रवलनवे[ष्टि]ष्टितं सूचितं विरोधो न ॥ अन्यस्मिन् याम्ये अर्धे
नामभूगोलार्धे अर्थात् जंबूद्वीपसकाशात् क्षारसमुद्रस्थानात् दक्षिणदिक्स्थभूगोलार्धे द्वीपषट्कस्य
भिन्नभिन्न = क्षारक्षीराद्यंबुधीनां च निवेशोऽस्ति असंकीर्णसमावेशोऽस्तीत्यर्थः ॥ एवं सप्तद्वीपाः सप्तसमुद्राश्च सि
द्धाः ॥ ननु क्षारसमुद्रः अथ च जंबूद्वीपः अनयोर्यत्र संधिः ॥ सैव भूमध्यत्वं सिद्धं ॥ एतेन प्रागुक्त लंका
उक्तं = त् कुमध्यत्वं यत् तस्याऽनुपपत्तिः ॥ क्षारसमुद्र जंबूद्वीपयोः संधौ तस्याऽभावात् ॥ संधौ चेदऽवस्थानं लंकायाः =
तस्याः तदा सेतुबंधाऽनुपपत्तिः ॥ तथा च सगरसुतैः अश्वाऽन्वेषणे महीं खनद्भिः जंबूद्वीपस्याऽष्टौ उप (५
द्वीपाः कल्पिता इति भागवते प्रसिद्धत्वात् लंकायाः उत्तरभागे खननेन लवणसमुद्रप्रवाहस्याऽऽगतत्वात्
तस्य प्रवाहस्य जंबूद्वीपांतर्गतत्वेन प्रसिद्धेः सेतुबंधोपपत्तेः ॥ लंकैव भूमध्यमिति ॥ अत एवाऽभितः
समुद्रसंबंधात् लंकाया उपद्वीपत्वं युक्तं ॥ लंकादिपुरचतुष्कं क्षारोदधिमध्यसंस्थितं ज्ञेयं इत्यार्य

गो॰टी॰
मयूखमाला॰
२८

जनशंकितनामवर्णा×२ ९ बांधुतिजनसंख्याभक्ता
नाम्नां स्वरा×समुद्रसंख्या जे ९ तर॰चोर॰
ए १ लोना त्यं चांगसवुनां भानो योग ∴ जने॰८ तः स्वदक्षात्
शेषमितःतुरुकर॰॥

28

अन्यसिद्धांताऽनुयायिनस्तु॰॥ लवणसमुद्रमध्ये यत्परिधिवृत्तं तस्मिन्वृत्ते लंकादिपुरचतुष्टयं अंगीकृत्य
तदऽवधिभूगोलार्धयोरुत्तरदक्षिणयोर्जंबूद्वीपं ग्रंथार्धे षट्समुद्रसहितद्वीपषट्कयोरवस्थानं इत्यनोक्तस्या
ऽनुपपत्तिरित्याकूतम्॥ समुद्रे द्वीपत्वाऽनंगीकारात्॰ अन्यथा सर्वगजंबूद्वीपत्वाऽऽपत्तेः॥ अथ च॥ क्षा
राब्धेः संपूर्णस्याऽभावादाचार्यैः क्षाराद्यंबुधीनामित्युक्तिं परित्यज्य क्षारक्षीराद्यंबुधीनामित्युक्तं ख
ननसिद्धलवणसमुद्रपवाहस्य जंबूद्वीपत्वोक्तितात्पर्यात्॰॥ ऋद्धवसिष्ठसिद्धांतेपि॥ भूगोलमध्यवलया
द्याम्यस्यां लवणार्णवः॥ लवणाब्धितटे सौम्ये नगरी देवनिर्मिता॥ लंकेत्यादिना॥ लक्षेनाप्युक्तं॥ क्षा
तंकास्या रांभोधिदक्षिणे व्यक्तगानां जंबूद्वीपं तस्य सौम्ये महीपद्रत्य लं विस्तरभयात्॰॥२१॥ अथ द्वीपसमुद्राणां
नाम=१ विशेषतो ज्ञानार्थं क्रमेण क्षारादिसमुद्राणां स्थितिं विवक्षुः प्रथमं समुद्रद्वयं मालिन्याह॥ मू॰॥ लवणज
लधिरादौ दुग्धसिंधुश्च तस्मादमृतममृतरश्मिः श्रीश्च यस्मादभूव॥ महितचरणपद्मः पद्मजन्मादिदे
वैः वसति सकलवासो वासुदेवश्च यत्रेति॥२२॥ टी॰॥ आदौ नाम भूगोले समुद्रावस्थानोपक्रमे प्रथमं॰ ल
वणजलधिः नाम॰ लवणसमुद्रः अस्ति॥ तस्मात्॰ नाम लवणसमुद्रोत्तरवर्ति द्वीपादऽनंतरं॰ दुग्धसिंधुः
पुराणेषूद्घोषित इत्यर्थः॥ चकारस्तु॰ द्वयोर्मध्ये द्वीपाऽवस्थानसूचनार्थं॥ अन्यथा तदैक्यापत्तेः॥ तत्स
त्वे प्रमाणमाह॥ यस्मात्समुद्रात् अमृतं देवानां भक्ष्यत्वेन प्रसिद्धं॰ अमृतरश्मिः नाम चंद्रः श्रीर्नाम लक्ष्मीः

दुग्ध=१ अंतरालदेशाऽभावे समुद्रयोरैक्यं स्यादित्यर्थः॥

क्षारसमुद्रस्य

प्रमाणांतरेण सद्भावमाह॥ चेत्पुनः यत्र नाम्न्यस्मिन् क्षीरसमुद्रे च पुनः वासुदेवः वसति॥ अत्र पुराणमेव प्रमाणं॥ पुराणादीनां वेदमूलकत्वात्॥ ननु वसुदेवस्याऽपत्यं वासुदेवस्तस्यापत्यमित्यनेनाऽण्प्रत्ययः॥ अस्य मनुष्यत्वे नु॥ समुद्रस्य का महिमा॥ अतः विशेषणेन परमेश्वरत्वं तस्य स्थापयति॥ किंभूतः वासुदेवः॥ सकलवासः॥ सकलेनाम स्थावरजंगमात्मके जगति वासः यस्य॥ अयमेव व्यापकः॥ अतः व्यापकत्वात्परमेश्वरत्वं तस्य जातं॥ ननु अयं मनुष्यपुत्रः परमेश्वर एव इति कथमवगतमित्यत आह॥ पुनः किंभूतः॥ पद्मजन्मादिदेवैः महितचरणपद्मः॥ नाम ब्रह्मादिदेवैः पूजितं चरणपद्मं यस्य इत्यर्थः॥ न च परमेश्वरस्याऽमूर्तत्वात् शरीरादिमूर्तिमत्वं तनयत्वादिकं चाऽनुपपन्नमिति वाच्यं॥ लीलाविग्रहधारिणस्य परमेश्वरेणाऽहंतत्वात्॥ अतएव परिच्छिन्नस्य क्षीराब्धौ अवस्थानसंभवः॥ इतिभावः॥२२॥ अथाऽवशिष्टसमुद्रान् क्रमेण विशेषणांतरं चान्यद्वीपेन्द्रवज्रयाह॥ दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चांत्यः॥ स्वादूदकांतर्वडवानलोऽसौ पाताललोकाः पृथिवीपुरानीति॥२३॥ टीका॥ तस्मात् नाम दुग्धसमुद्रांतरवर्तिद्वीपादनंतरं दध्नः समुद्रो वर्तते॥ पुनः तस्मात् दधिसमुद्राग्रिमवर्तिद्वीपादनंतरं घृतस्य समुद्रो वर्तते॥ तस्माद्द्वीपः॥ पुनः तस्मात् घृतसमुद्रोऽनंतरं इक्षुरसस्य समुद्रो वर्तते॥ ततो द्वीपः॥ तस्मादिक्षुरसोत्तरवर्तिद्वीपादनंतरं मद्यस्य समुद्रो वर्तते॥ ततो द्वीपः॥ पुनः तस्मान्मद्यसमुद्रोत्तरवर्तिद्वीपादनंतरं स्वादुजलस्य समुद्रो वर्तते॥ अंते मध्ये अंत्यः॥ इति पदात्॥ समुद्रांतरं नास्तीति सूचितं॥ एवंभूतो यस्तस्य

उत्तरवर्तिद्वीपा=३

अंत्यः=१

ईश्वरस्य सूतत्वे

सर्वत्रव्यापकस्य=८

सर्वेषु=४

स=६ [illegible]

गोटी·
२९

५ सौ=२

कश्चिन्मते स्वादूदकसमुद्रकूमाकारेणास्तीत्यर्थः दक्षिणभागे·

नन्वेवं चेत्तर्हि मेरुसंमुखभूगोलदक्षिणप्रांतभागे वडवानलस्यानं समुद्रावस्थानेन बाधितं स्यादित्यत आह·॥
असौ प्रागुक्तया प्रसिद्धः वैवडवानलः स्वादूदकांतर्वर्तते·॥नाम स्वादूदकसमुद्रमध्येऽस्तीत्यर्थः॥तथाग्नि
जलयोर्विरोधेऽप्यग्निविशेषस्य वडवाख्यस्य जलेऽवस्थानं अविरुद्धं अतएव वडवात्वं·जलात्तः क्षिप्तित्वेनाऽग्ने
रितिभावः॥नन्वेवं भूपृष्ठे सप्तकलद्वीपादिसन्निवेशात्तु पातालादीनामवस्थानाऽपलापापत्तिः॥पुराणे भूमेर
धः सप्तपातालसद्भावप्रसिद्धेः त्वन्मते भूगोलादभितः सर्वत्राऽऽकाशेऽस्यूर्ध्वत्वांऽगीकारेणाऽधः प्रदेशाऽसिद्धे
रित्यत आह·॥ पृथिवीपुटानि·पातालं लोकाः संतीत्यर्थः॥एतदुक्तं भवति·॥पृथिव्यं तोयानि पुटानि गोलाका
राणि भूगर्भाऽऽवरणरूपाणि तान्येवस्थाऽवांतरभेदैः सप्तपाताललोकाः संतीतिभावः॥एतेन तेषामऽपलापा
ऽभावोऽपि सूचितः॥२३॥ ननु पातालेषु सूर्यादीनां संचाराऽभावात्कथं तत्रत्यानां व्यवहारो भवति·अंधका
रत्वात्·अतो वसंतीति लक्ष्यया ह·॥मू·॥ चंचत्फणामणिगणांशुकृतप्रकाशा एतेषु सासुरगणाः फणिनो
वसंति·॥दीव्यंति दिव्यरमणीरमणीयदेहैः सिद्धाश्च तत्र चलसत्कनकावभासैरिति·॥२४॥ टी·॥एतेषु
पातालप्रदेशेषु फणिनो नाम वासुकिप्रमुखादयः सर्पाः वसंति·॥किंभूताः॥सासुरगणाः॥असुराः दैत्यदान
वाः एषां समुदायैः सह वर्तमानाः॥पुराणोक्तरीत्या यथायोग्यं अधोधः तिष्ठंति॥एतेषु वसंतीति इतिपरंपरा ए
तेषु बिलस्वर्गेषु स्वर्गादप्यधिकात्मभोगैश्वर्यानंदविभूतिभिः इत्यादि भागवतं प्रमाणं सूचितं॥ननु पाताले सू
र्यकिरणाऽसंसर्गादंधकारे तत्रस्थानां व्यवहारः कथमत आह·॥पुनः किंभूताः॥चंचत्फणामणिगणांशुकृत
प्रकाशाः॥चंचतो देदीप्यमानाः ये फणानां मणयः नाम सर्पसंबन्धिमणयस्तेषां गणाः समूहास्तेषां येऽशवः

शिव·
२९

समुद्र- क्षार १ क्षीर २ दधि ३ घृत ४ इक्षु ५ मद्य ६ स्वादु ७
द्वी- शा- शल्मली कौशं क्रौं- गो- पुष्क-

पृ=१

सर्ग=१

तत्र च नाम तत्रैव पाताल प्रदेशे एव सिद्धाः च कारात् देवाः॥ दिविभवं दिव्यं॥ दिव्य रमणीनां नाम स्वर्गोद्भवानां स्त्री
णां ये रमणीयदेहाः नाम मनोहर सुकुमार मूर्तयस्तैः सह वर्तमानाः संतः आगत्य दीव्यंति क्रीडंतीत्यर्थः॥
ननु देहस्य रमणीयत्वं कुतः अतो देहविशेषणं॥ किंभूतैः देहैः॥ लसत्कनकावभासैः॥ लसत् नाम दीप्य
मानं यत् कनकं सुवर्णं तस्य योऽवभासः कांतिस्तद्वत् प्रकाशो येषां एतादृशैर्देहैः॥ सुवर्णकांति सदृशैरित्यर्थः॥ पुरा
णमतेऽमरेषां सूर्याऽभावात् दिने प्रकाशाभावत्वेन सिद्धादीनां यदा संभोगेच्छा जायते तदा तत्र विहर्तुमशक्ताः॥ पा
ताले आगत्य क्रीडंति॥ पाताले स्वल्प प्रकाशात् देवादीनां लोकांतर संचाराऽभावाच्च॥ २४॥ ननु यास्ये
प्रथमं द्वीपाऽवस्थान कथनं युक्तं कथं समुद्रावस्थानं मुक्तमित्यत उपजातिकयाह॥ मू॥ शाकं ततः शाल्म
लमत्र कौशं क्रौंचं च गोमेदक पुष्करे च॥ द्वयोर्द्वयोरंतरमेकमेकं समुद्रयोर्द्वीपमुदाहरंतीति॥ २५॥
टी॥ अत्र नाम भूगोलस्य दक्षिणार्धभागे द्वयोर्द्वयोः समुद्रयोः अंतरं नाम अंतरालं एकं एकं द्वीपं पूर्वाचार्याः
उदाहरंति वदंतीत्यर्थः॥ अत्र वीप्सया प्रत्येक समुद्रयोरंतरेण एकं द्वीपमिति सप्त समुद्रांतरतः षट् द्वीपानि
अन्यथा समुद्रयवति तत् समुद्रयोरंतरस्य द्वीपत्वाऽऽपत्तिरिति ज्ञेयम्॥ जलेपि द्वीपत्वव्यवहारस्यादिति भावः॥
तथा च। समुद्राऽवस्थानं विना द्वीपाऽवस्थानं वक्तुमशक्यमतः प्रथमं समुद्रावस्थानमुक्त्वा द्वीपावस्थानमुक्तं॥
तेषां नामान्याह॥ क्षार क्षीर समुद्रयोरंतरालभूमिर्वलयाकारं शाक संज्ञं द्वीपं ततः नाम तदनंतरं क्षीर
दध्यंतरं शाल्मलं द्वीपं ज्ञेयं॥ दधि घृतांतरं कौशं॥ घृत इक्षुरसांतरं क्रौंचं॥ चकारः क्रमार्थः॥ इक्षु मद्यांतरं गोमेद
कं॥ मधुस्वादु जलांतरं पुष्करद्वीपं॥ चकारात् स्वादूदकं॥
॥ इति द्वीपाब्धि समावस्थानमुक्तम्॥ २५॥

गो॰टी॰ ३०

लवण॰	१	९०।००
शाकं॰	१	८६।००
दुग्धम्॰	२	८१।२०
शाल्मलं॰	२	७७।००
दधिः	३	७२।००
कौशम्॰	३	६७।३०
घृतं॰	४	६२।३०
क्रौंचम्॰	४	५७।३०
इक्षुः	५	५२।००
गोमेदं॰	५	४६।००
मद्यः	६	४०।००
पुष्करं॰	६	३२।००
स्वादुजं॰	७	सार्धाकृति

वृत्तं पंचभिरंशैश्च वडवानलतोलि खेवृ॰॥ तावत्स्यानंतु देस्यानां जलधेरन्तरक्षिप्तम्॰॥ इत्यादिरोमकसिद्धान्तात् समुद्रद्वीपमानं शालिग्रामेण चक्रेस्मिन् प्रकाशितं॰ सिद्धांतजिज्ञासुभिः द्रष्टव्यम्॰ ॥७ अथ कुलाद्रीन्द्र इत्यवान्तर प्रश्नस्योत्तरदानार्थं जंबूद्वीपे वर्षविभागं विवक्षुः प्रथमं तद्देशविभागरूपं पर्वतावलिमेवादौ तयाह॰॥ मू॰॥ लंकादेशाद्धिमगिरिरुदग्धेमकूटोथतस्मात्तस्माच्चान्यो निषिध इति ते सिंधुपर्यंत दैर्घ्याः॥ एवं सिद्धादुदगपि पुराच्छृंगवच्छुक्लनीला वर्षाण्येषां जगुरिह बुधा अंतरे द्रोणिदेशानिति॰॥२६॥ टी॰॥ अथ द्वीपाऽवस्थानकथनाऽनंतरं॰ लंकादेशात् उदक् नाम उत्तरदिग्भागे मेर्वभिमुखे हिमगिरिः॰ नाम हिमालयः पर्वतोस्ति॰ तस्माद्धिमालयादुदक् मेर्वभिमुखे हेमकूटः॰ अन्यः नाम द्वितीयः॰ पर्वतोस्ति॰॥ तस्माच्च हेमकूटादुदक् अन्यस्तृतीयः निषिध पर्वतोस्ति॰॥ चकारस्तदुत्तरदेशसूचकः॰॥ अन्यथा त्रयाणामेवाप [illegible]॥ इति वदेत्॰ समाप्तिद्योतकः॰ तेन मेर्वभिमुखे एतादृशोऽन्यः पर्वतो नास्तीति सूचितं॰॥ ते किमाकारा इत्यत आह ते नाम उक्ता ये पर्वतास्ते सिंधुपर्यंतदैर्घ्याः॥ नाम लवणसमुद्रोत्तरतटावधि दीर्घतायेषां॰॥ पुनरेतेषां मानं तु उत्तरपृष्ठस्य चक्रे द्रष्टव्यं॰॥ अथ जंबूद्वीपे पर्वताऽवस्थानमाह॰॥ सिद्धानाम लंकाधःस्थलेन सिद्धसिद्धपुरात्॰ उदक् मेर्वभिमुखे क्रमेण शृंगवत् शुक्ल नीलाख्यास्त्रयः पर्वताः संति॰ अपि शब्दात्परस्परव्यवहिताः॰

अथाऽन्यस्मिन् जंबूद्वीपार्धे=२ [illegible] एवं=१


प्रि॰व॰ ३०

पर्वताः

एवं नाम सिंधुपर्यंतदैर्घ्याः॥ लवणसमुद्रोत्तरतटस्था॥ [illegible] कारा:॥

वडवानलस्यानंतं क्रमकल्पतरभितः चतुर्दिक्षु पंचभिरंशैः दैत्यस्यानं स्वादुजलाब्धिमध्ये विहितं ततः साधीऽस्कृतिभिर्लवैः स्वादुजलनिधेर्विस्तारः॥ ततो द्वात्रिंशद्भिरंशैः पुष्करद्वीपविस्तृतिः॥ इत्यादि चक्रे द्रष्टव्यम्॥ व्यासार्धमानमिदम्॥


॥ जंबूद्वीपस्य चित्रमिदम् ॥



अथ पर्वतविशेषप्रयोजनमाह ॥ एषामुक्तपर्वतानामंतरे नाममध्ये द्रोणिदेशान् तानेव द्रोणिदेशान् बुधाः व्यासादयः ॥ इह जंबूद्वीपसंबंधिशकलयोर्मध्ये प्रत्येकं वर्षाणि जगुः नाम आहुः ॥ तानेव द्रोणिदेशान् वर्षाणि जगुरित्यर्थः ॥ अतः स्थितप्रदेशास्य व्यवहारार्थं संज्ञार्थं द्रोणिदेशाः इत्युक्तं ॥ एतेन नीलनिषधांतरे एकं वर्षं न भवतीति सूचितं ॥ बुधा इत्यनेन पुराणस्य प्रमाणं सूचितं ॥ यतः भूगोलार्धे जंबूद्वीपमध्ये मेरुः स्थापनेन आदर्शाकारं जंबूद्वीपमुत्पद्यते ॥ अतः पुराणमतं सूचितं बुधानेन ॥ २८ ॥

अथैतेषां वर्षाणां नामान्याह—दोधकवृत्तेन ॥ मू. ॥

भारतवर्षमिदं ह्युदगस्मात्किन्नरवर्षमतो हरिवर्षम् ॥ सिद्धपुराच्च तथा कुरुतस्माद्धि हिरण्यमयं रम्यकवर्षं इति ॥ २९ ॥ टी. ॥ इदमस्मदधिष्ठितं हिनिश्चयेन पुराणप्रामाण्यात् भारताख्यवर्षं अस्ति ॥ अस्मादुदक् मेरुं अभिमुखे यत् द्वितीयं तत् किन्नरवर्षं अतः उत्तरतः तृतीयं हरिवर्षं ॥ तथा एवमेव सिद्धपुरात् लंकातः सिद्धपुराधिष्ठितजंबूद्वीपशकले प्रथमं कुरुसंज्ञं वर्षं त्वं विद्धि जानीहि ॥ त



नववर्षात्मकं प्रसिद्धं =१

ननु पुराणे जंबूद्वीपस्य नववर्षाणि प्रसिद्धानि त्वया षट्वर्षात्मकं कथमुक्तं पुराणप्रमाणस्य कैर्थमित्यत्रोत्तरं श्लोकद्वयेनाह॥ मू॥ माल्यवांश्च यमकोटिपत्तनात् प्रोमका(?)च्च किल गंधमादनः॥ नीलशैलनिषधावधी च तावंतरालमनयोरिलावृतम्॥२८॥ टी॥ यमकोटिपत्तनात् वडवा(?)कारात् उत्तरभागे ८॰।४५ एतन्मितेंतरदेशे माल्यवान्पर्वतः अस्ति॥ रोमकाच्च समुच्चये उत्तरभागे ८॰।४५ एतैर्भागैः गंधमादनपर्वतः किलेति आगमे॥ नाम आगमप्रामाण्यं दंगीक्रियते इत्यर्थः॥ नन्वनयोः माल्यगंधयोः पर्वतयोः स्थानं लंकासिद्धपुराभ्यां पूर्वमेव प्रत्येकं पर्वतचतुष्टयं किं नोक्तं पृथगुक्तौ गौरवादित्याह॥ तौ माल्यगंधौ पर्वतौ नीलशैलनिषधावधी॥ अत्रैव मध्यशैलाख्यं उभयत्र संबंधात् नीलपर्वतात् निषधपर्वतावधीयौ स्तः एताद्देशो॥

॰रवेस्थानं=१
॰दैत्याकारस्य भूप्रदेशस्य=२

नकारात् द्वयोः क्रमेण नान्वयः किंतु एकैकस्य मेरु पृथग्धानेन [illegible] द्वाभ्यां सहान्वयः॥ विस्तारे भागैः॥ एवं गंधपर्वतस्य पश्चिमे माल्य॥ नगरात्॥ युग्मेनेति रोमको तथा ज्ञेयं॥ पर्वतस्य पूर्वे चिह्नस्य तथा ॥ इत्यर्थे॥

रत्नस्य द्वन्तरेभ्योऽतिशायित्वादेतन्नामकं एतद्द्वीपमितिभावः ॥ अन्तः नाम तद्रससंयोगान्मृत्तिकास्वर्ण
रूपपरिणाममाप्नाद्यति ज्ञानात् सुरसिद्धसंघाः श्रुअत् नामनित्यं तं जंबूफलाम्लरसं पिबंति ॥ ननु अ
मृतं कथमुत्तमं न पिबंति ॥ अत आह ॥ ते सुरसिद्धसंघाः किंभूताः संतः ॥ अमृतपानपराङ्मुखाः संतः ॥ कथं
यथा मृत्तिका स्वर्णरूपपरिणाममाप्ता तथाऽस्माकं शरीरमपि स्वर्णमेव भवतीति मत्वाऽमृतपाने विगत
इक्षा=५ स्पृहाः संतः ॥ पराङ्मुखा नाम विगतेच्छा इत्यर्थः ॥ तत्पानात्सिद्धांते ॥ न खेदो न च रोगो न च स्वेदो न ज्वरा
नेंद्रियक्षयः ॥ तत्पानस्वर्ण मनसां भूतानां तत्र जायते ॥ महागजप्रमाणानि जंबास्तस्याः फलानि वै ॥
इत्यादि ॥ ३३ ॥ अथ रत्नानां वनांतरगतत्वेन वनान्युपजातिकयाह ॥ वनं तथा चैत्ररथं विचित्रं ते
ऽप्सरो नंदन नंदनं च ॥ धृत्याकयं यद् धृतिकृत्सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धं ॥ ३३ ॥ टी० ॥ तेषु आ
धार पर्वतेषु इति नाम पुराणेषु प्रसिद्धं वनं उद्यानं उत्कर्षेणाश्रयीभूतं क्रमेणाह ॥ तत्र मंदरपर्वते
चैत्ररथं वनं किंभूतं विचित्रं आश्चर्यकारकं पूर्वे ॥ दक्षिणभागे गंधमादने अप्सरोनंदननंदनं वनं अस्ति ॥
नंदनेन नाम =४ अप्सरसां देवांगनानां क्रीडाविहाराऽवलोकादिना नंदयतीत्यप्सरोनंदनं नंदनं ॥ चाद्रन्यान्यपि विविधा
नि उद्यानानि संति ॥ विपुलपर्वते धृत्याकयं नाम धृतिसंज्ञं वनं ॥ ननु भागवते सर्वतोभद्रसंज्ञास्य त्व
या धृतिसंज्ञं कथमुक्तं ॥ अत आह ॥ यत्तु इदं वनं सर्वतोभद्राख्यं सुराणां धृतिकृत् धैर्यकारकं ॥
दैत्यकृतोपद्रवत्रस्तानां देवानां ॥ अतः मया धृतिसंज्ञं उक्तं ॥ सुपार्श्वे वैभ्राजसंज्ञं ॥ अनेकमय
रत्नसादिरवैः भ्राजिष्णुः ॥ भ्राजते प्रकाशते इति भ्राजिष्णुः ॥ अर्थात् नानापक्षिरवैः भ्राजिष्णुः

॰ नामशोभायमानं=१

नामशोभायमानं वैभ्राजं नामकं वनं प्रसिद्धं ॥

धसुमाल्यकैरिलमिलावृतमावृतमावभौ ॥ अमरकेलिकुलायसमाकुलंरुचिरकांचनचित्रमहीतलं
इति ॥३०॥ टी ॥ निषध १ नील २ सुगंधनाम गंधमादन ३ सुमाल्य नाममाल्यवान् ४ एतैश्चतुर्भिः
पर्वतैः चतुर्दिक्षु आवृतं नाम आवरणं संजातं यस्य एतादृशमिलावृतं अलंनाम अतिशयेन आवभौ नाम
अशोभत् ॥ आसमंतात् शोभया युक्तो बभूव ॥ वभौ इति भूतकालं एकभूतकालसंबंधात् उक्तः ॥ ननु
पर्वताऽऽवरणेनइलावृतस्य का वा शोभा इत्यत आह ॥ किंभूतं इलावृतं ॥ अमरकेलिकुलायसमा
कुलं ॥ अमराः देवाः केलिः इत्यर्थः यानि कुलायानि नाम गृहाणि तैः समाकुलं नाम व्याप्तं ॥ अमराः देवाः । के
लिः क्रीडा रहः क्रीडा इत्यर्थः ॥ तथा च अनेकरत्नखचितत्वात् देवगृहत्वात् स्वत एव शोभा ॥ ननु देवैरपि तत्र
क्रीडागृहाणि कुतः कृतानि इत्यत आह ॥ पुनः किंभूतं इलावृतं ॥ रुचिरकांचनचित्रमहीतलं ॥ रुचिरं शो
भूप्रदेशो = भायमानं यत्कांचनं तेन विचित्रं महीतलं नाम भूतलो यस्य एतादृशं इलावृतं ॥ तथान्यत्र सुवर्णभूमित्वा
ऽभावादत्रैव देवगृहाणीति भावः ॥३०॥ ननु देवाः स्वर्गे वसंति भूमौ तेषां वासः कुत्रापि न श्रुतं कथं तत्र देव
इत्थं उक्तं = गृहाणीत्यत आह ॥ मू ॥ इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः ॥ द्रुहि
णजन्मकुपन्नजकर्णिकेति च पुराणविदोऽनुमवर्णयन् ॥३१॥ टी ॥ इह हि नाम इलावृतवर्षे किल ना
म निश्चयेन मेरुगिरिः नाम मेरुपर्वतः मध्यगः नाम भूमध्यकेंद्रे स्थितः यतोऽतः भूमौ देवानामपि वस्था
नं न विरुद्धमिति भावः ॥ ननु मेरोः इलावृतस्य मध्येऽवस्थानमत्र किं मानं अत आह ॥ किंभूतः मेरुगिरिः ॥
कनकरत्नमयः ॥ सुवर्णमय इत्यर्थः ॥ इलावृतस्यापि सुवर्णमयत्वात् तत्रैव मेरोः अवस्थानं इतिभावः ॥ ननु तथा

ये कुलायाः अथवा = केलि
प्रयोगः ४
इलावृते

३५ नचैते मे देवाः सर्ववासिनः। न इति सिद्धं
मेरौ देवावस्थानात्-३ वोच्यं

पिसर्वाऽवस्थानात्कथं देवानामवस्थानं सिद्धमत आह॥ पुनः किंभूतः मेरुगिरिः॥ त्रिदशालयः॥ तृतीयादशा
युवत्वं येषां॥ अर्थात्तद्युवत्वं सदास्तीति॥ त्रिदशाः देवाः॥ तेषां आलयः गृहरूपः॥ तथा च मेरौ देवावस्थानप्र
सिद्धद्वारा इलावृते पि देवावस्थानं नाशंक्यं अर्थात् अवस्थानं ज्ञेयं कुतः देवानां इच्छा गतित्वात्॥ कर्मक्षेत्रम तत्=२
न्यान्यष्टवर्षाणि स्वर्गाणां पुण्यशेषोपभोगस्थानानि इत्यादि भागवतोक्त्या मेरौ देवाऽवस्थाने पि सर्ववासित्वम
विरुद्धमिति भावः॥ ननु देवानां सर्ववासित्वात् इलावृते मेरोरवस्थानं नेत्याशंक्य पुराणोक्तमेरुवर्णनं निवध्ना
ति॥ पुराणविदः व्यासादयः अमुं मेरुपर्वतं द्रुहिणजन्मकुपद्मजकर्णिकारूपः इति अवर्णयन् वर्णयं
तिस्म॥ द्रुहिणस्य नाम ब्रह्मणः जन्म नाम उत्पत्तिर्यस्मात् तद्विष्णुनाभिकमलं तद्वत् कुपद्मजकर्णि
उत्पन्ना= का॥ कुरेव पद्मः कुपद्मः। पृथिवीरूपपद्माज्जाता या कर्णिका॥ केसरादिना पीतवर्णा प्रसिद्धा॥ तथा
चोत्पत्तिकाले यथा विष्णुनाभिकमलस्थो ब्रह्मा तथा सृष्टिकाले कुपद्मजकर्णिकाधिष्ठितो ब्रह्मा इति एव=१
द्योतितः॥ इत्येवं कर्णिकात्वेन मेरुं अवर्णयन्॥ चकारात् कुरंग-मुकुर-कुसुंभ-त्रिकूट-इत्यादि भा
गवतप्रसिद्धा गिरयः मेरोः मूलप्रदेशोपरितः क्लृप्ताः केशररूपाः॥ अर्थात् सकेशराया कर्णिका
तद्रूपः मेरुपर्वतः॥ इति चकारेण द्योतितः॥ ३१॥ ननु मेरोः कर्णिकाकारत्वेन अत्युच्चत्वात् मूलप्र
देशभाराक्रान्ततया भग्नत्वापत्तिरित्यत आधारविष्कम्भ जातिकयाह॥ मू॥ विष्कम्भशैलाः खलु मंदरोस्य सुगंध
शैलो विपुलः सुपार्श्वः॥ तेषु क्रमात्सन्ति च केतुवृक्षाः कदंबजंबूवटपिप्पलाख्याः॥ ३२॥ टी॥ अ
स्य नाम मेरोः चतुर्दिक्षु खलु नाम निश्चयेन विष्कंभशैलाः नाम आधारपर्वताः वर्तते इति शेषः॥

गो·टी·
३३

33

यो·२···· १···· १····

तेके·इत्यत आह·॥मंदरः पूर्वदिशि १ सुगंधशैलः दक्षिणे·गंधमादनाति दिक्तः॥विपुलः पश्चिमे ३
सुपार्श्वः उत्तरे॥ते षुभेदज्ञानाय ध्वजवृक्षानाह॥ते षु पर्वतेषु केतुवृक्षाः नाम ध्वजरूप वृक्षाः
क्रमात् नाम पर्वतादि क्रमात्· कदंब १ जंबू २ वट ३ पिप्पलाख्याः ४ संति·॥मंदराख्ये कदंबः१ सुगं
धे जंबू वृक्षः २ विपुले वटः ३ सुपार्श्वे पिप्पलः ४॥चकारात् अन्योदयो ध्यन्ये संतीत्यर्थः॥पर्वताना
मयुतयोजनोच्छ्रायः यासमित्रि ज्ञातात् ज्ञेयं·॥वृक्षा विल्लित्य एकादशशतयोजनानि·॥३२॥
स्मादेतत्·॥परंतु इलावृतः स्वर्णभूमिकः कुतः॥अस्योत्तरं वसंततिलकयाह·॥जंबूफला,
ता=१ अमलगलद्रसतः प्रवृत्ता जंबूनदीरसयुतैर्मृद ऽभूत्सुवर्णं॥जांबूनदं हितदतः सुरसिद्धसंघाः
शश्वत्पिबन्त्यमृतपानपराङ्मुखा हि·॥३३॥टी·॥जंबूवृक्षस्य सुपक्कानि यानि फलानि
स्रवत=१ तेभ्यः अमलः नाम स्वच्छः यः गलत् नाम प्रच्यवत् रसः तस्मादेकीभावापन्नरसात् जंबूनदी
प्रवृत्ता ऽभूत्·॥मृत् नाम इलावृतवर्षस्य भू संबंधिनी मृत्तिका रसयुता नाम नदीरसयुता·सुवर्णं
अभूत्·॥अथवा·॥मृत् रसयुतैः सुवर्णमभूत्·॥पंचम्यंतपाठः क्वाचित्कः॥इदं कुतो ऽवग
तमित्यत आह·॥हि यस्मात् कारणात्·तत् सुवर्णं जांबूनदं इति नाम्ना प्रसिद्धं·अभिधानग्रंथेषु·॥
जंबूनदस्य इदं जांबूनदं व्युत्पत्त्या च ज्ञातं॥तथा च·महागजप्रमाणक जंबूफलानामितस्ततः पत

नक्षंभवात्तः तन्नामकसंभूतनद्याः ... भः सत्त्वा
त तद्रससंबन्धेनारक्ता इलावृतभूः स्वर्णमयीति·

शि·वं·
३३

रत्नस्य ब्रह्मनदेभ्योऽभिधायित्वादेतन्नामकं एतं द्वीपमितिभावः ॥ अत्र तः नाम तद्रससंयोगात्ममतिका स्वर्ण
रूपपरिणामं प्राप्ताद्वितत्तानात् सुरसिद्धसंघाः शश्वत् नामनित्यं तं जंबूफलाम लरसंपिबंति ॥ ननु अ
मरं कथमुक्तमंनपिबंति ॥ अत आह ॥ ते सुरसिद्धसंघाः किंभूतासंतः ॥ अमरतपानपराङ्मुखाः संतः ॥ कथं
यथाम्मतिकास्वर्णरूपपरिणामंप्राप्ता तथाऽस्माकं शरीरमपि स्वर्णमेवभवतीतिमत्वाऽमृतपाने विगत
इक्का=५ स्पृहाः संतः ॥ पराङ्मुखाः नामविगतेच्छाइत्यर्थः ॥ तथाचात्र सिद्धांते ॥ नस्वेदोनचदौर्गन्ध्यंनज्वरा
नेंद्रियः क्षयः ॥ तत्यानस्वच्छमनसांभूतानांतत्रजायते ॥ महागजप्रमाणानितिजंबाल्लस्याः फलानिवै ॥
इत्यादि ॥ ३३ ॥ अथरत्नानांवनांतरगतत्वेनवनान्युपजातिकयाह ॥ वनं तथा चैत्ररथं विचित्रं ते
ऽप्सरोनंदननंदनंच ॥ इत्याकयंयइतिकत्सुराणांभ्राजिष्णुवैभ्राजमितिप्रसिद्धं ॥ ३४ ॥ टी० ॥ तेषु च्या
धारपर्वतेषु इतिनामपुराणेत्त्वप्रसिद्धं वनं उद्यानं उक्तरत्नाश्रयीभूतंक्रमेणाह ॥ तत्रमंदरपर्वते
चैत्ररथंवनं किंभूतं विचित्रं आश्चर्यकारकं पूर्वे ॥ दक्षिणभागेगंधमादने अप्सरोनंदननंदनंवनं अलि
नंदनेननाम =४ अप्सरसां देवांगनानां क्रीडाविहाराऽवलोकादिनानंदयतीत्यप्सरोनंदनं नंदनं ॥ चादन्यान्यपि विविधा
नि उद्यानानि संति ॥ विपुलपर्वते इत्याकयं नामधतिसंज्ञंवनं ॥ ननु भागवते सर्वतोभद्रसंज्ञास्य त्व
याधतिसंज्ञंकथमुक्तं अत आह ॥ यत्तइदंवनंसर्वतोभद्राख्यंसुराणांधतिकारत् धैर्यकारकं ॥
दैत्यकलोपद्रवत्रस्तानांदेवानां ॥ अतः मयाधतिसंज्ञंउक्तं ॥ सुपार्श्वे वैभ्राजसंज्ञं ॥ अनेकमयू
रहंसादिरवैः भ्राजिष्णुः ॥ भ्राजते प्रकाशते इतिभ्राजिष्णुः ॥ अर्थात् नानापक्षिरवैः भ्राजिष्णुः

^ नामशोभायमानं =१

नामशोभायमानं वैभ्राजं वनं ... ॥

वर्तमानश्लोकोक्तक्रमेण =३

34

॥ननु स्वर्गादिसरोवरं विना न भातीत्यतः सरोवराणि वर्णयन्नाह ॥ सरांस्यथैलेय रुणं च मानसं महाह्रदं श्वेतजलं यथाक्रमं ॥सरः॥ सुरा रामारमणश्रमालसाः सुरा रमंते जलकेलिलाल सा ॥३५॥ टी॰ ॥ अथानंतरं एतेषु उपवनेषु सरांसि नाम सरोवराणि यथाक्रमं नाम उक्तक्रमेण अरुण दीनि संतीत्यर्थः ॥ चकारादन्यान्यपि वर्तंते इति भावः ॥ सरोवरसुज्ञाने सुरालमेव प्रमाणं ॥ देवस्थान त्वादाह ॥ उक्तसरःसु नाम स्तेषु सरोवरेषु सुराः नाम देवाः रमंते जलक्रीडां कुर्वन्ति इत्यर्थः ॥ कुतः क्री डाविकारस्तेषां अत आह ॥ किंभूताः देवाः ॥ जलकेलिलालसाः ॥ जले केलि जलकेलि ॥ जलकेल्यां लालसा नाम इच्छा येषां ते जलकेलिलालसाः ॥ तदिच्छावंत इत्यर्थः ॥ इच्छापि कुतः अत आह ॥ पुनः किंभूताः देवाः ॥ रामारमणश्रमालसाः ॥ रामाः स्वांगनाः ताभिः सह रमणं क्रीडनं सुरतादि कं तेन संजातो यः श्रमः तेन आलसाः नाम व्यापारांतरकरणेऽसमर्थाः इत्यर्थः ॥ तदपनोदनार्थं जलक्रीडया भवति अतस्तदिच्छा जायते ॥ अत्रापि भागवतप्रमाणं ॥ येत्वमरावदिह इत्यादि ॥३५॥

अथ प्रसंगात् वसंति मेरौ सुरसिद्धसंघा इत्यादि साधारणोक्तत्वात् विशेषवसंतस्तिलकया विशद यति ॥ मू॰ ॥ सद्रत्नकांचनमयं शिखरत्रयं च मेरौ सुरादिकपुराणि पुराणि तेषु ॥ तेषामधःशतम ख्विज्वलनां तकानां नैरृत्यां वपानिलशशीशपुराणि चाष्टौ इति ॥३६॥ टी॰ ॥ मेरौ सद्रत्नकांचनम यं नाम समीचीनं कांचनाभ्यां च घटनं तन्मयं शिखरत्रयमस्ति ॥ चकारादन्यान्यपि संति ॥ अत

॥ एवाकाशगंगादिष्वपि [illegible] ॥

भागवत =

५ वं =५

५ रत्न =१

पुनः तेषु पृथ्वी एवरेषु अधः सुमुरादिवि षाः कब्रह्मा पुरादिः शिव ॥ एतेषां क्रमेण पुराणि संति ॥ अर्थात् प्रथमे धिराएवरे
वैकुंठं द्वितीये ब्रह्मणः श्यात कुंभाख्यं ॥ तृतीये शिवलोकाख्यं ॥ पुनः तेषां नाम उक्त पुराणां अधः नाम अधोभागे
मेरोरेवाष्ट दिशासु प्रभितः अष्टौ पुराणि संति ॥ केषाम तत्राह ॥ पूर्वे शतमाव इंद्रस्य अमरावती ॥ अग्निकोणे ज्वलनना
म वह्नेः तेतोजोवती ॥ दक्षिणे अंतक नामयमस्य संयमिनी ॥ निरृतिकोणे रक्षः नामराक्षसस्य कृष्णांगना नामकं ॥
पुरं ॥ पश्चिमे अंबुप नाम वरुणस्य श्रद्धावती ॥ वायव्ये अनिल नाम वायोः गंधवती ॥ उत्तरे शशी नामकुवेरस्य म
हादयानामकं पुरं ॥ ईशान्ये ॥ ईश नाम महेश्वरस्य वांतरभेदस्य यशोवती नामा पुरी ॥ वेदे सोमपदेन कुवेरः गृह्यते
इति निघंटुः द्रष्टव्यः प्रसिद्धतरं च ॥ अर्थात् तेषां अधः अष्टदिक् पालानां स्वस्वदिशि अष्टौ पुराणि संतीति तात्पर्यार्थः ॥
चकारात् मध्यभागे सिद्धानां स्थितिरित्यर्थः ॥ ३६ ॥ अथ प्रसंगात् भगवच्चरणारविंदस्मरणपूर्वकं प्रथमं आधारपर्वतेषु गंगा
गमनं उद्दीत्याह ॥ विष्णुपदी विष्णुपदात्पतिता मेरो चतुर्धा स्मात् ॥ विष्कंभाचलमस्तकशात्सरः संगतांऽऽगता वियत्तः ॥ ३७ ॥ श्रीः ॥
विष्णुपदी विष्णोश्चतुर्भुजस्य वैकुंठाधिवासपत्तिनः पदं चरणारविंदं तस्येयं नाम तत्संबंधिनी गंगा विष्णुपदी ॥ वि
ष्णोः पदात् नाम वैकुंठस्थानात् मेरो उपरितनभागे मंडलाकारे मध्ये प्रवाहरूपेण पतिता ॥ अर्थात् विष्णुपदात्पतिताया
पुनः सा विष्णुपद्याख्या गंगा = १२ गंगा सा विष्णुपदीत्युच्यते ॥ अस्मान्मेरोः सकाशात् तु चतुर्धा ऽऽत्मानं प्रवाहरूपेण संपाद्य वियत्तः नाम आकाशमार्गेण आ
गता सती ॥ विष्कंभाचलमस्तकेषु नाम आधारपर्वतोपरिभागेषु स्थितानि यानि शास्तनाम श्रेष्ठशरांसि नाम सरोवराणि आकाशात्
अरुणादीनि तेषु सरोवरेषु संगता नाम संलग्ना ~~सा विष्णुपदी~~ अभूत् ॥ क्रियाऽध्याहारः भूतकालिका ॥ ऊर्ध्वाय तु वि
ष्णुपदं आकाशं तत्र स्था वियत् गंगा मंदाकिनी विष्णुपदात् आकाशात् पतिता इति तन्त्र ॥ पूर्वापरग्रंथ संगत्या नुपप
त्तेः इति मुनीश्वरः ॥ ३७ ॥ अथ आर्यजंबूद्वीपप्रविगतासंपादनार्थं भिवजंबूद्वीपेऽभिगता आगतारूतिगीत्याह ॥ श्रीः ॥

35 मू॰ सीताख्या भद्राश्वं सालकनंदा च भारतं वर्षं ॥ चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून् याता ॥ ३८ ॥
टी॰ ॥ सा पुराणादिषु कथितमहिमा गंगा मेरुपर्वतभागस्य प्रवाहरूपेणाऽरुणसरोवरमिलनद्वारा सी-
ताख्या मेरोः पूर्वभागस्य भिलाचलतत्प्रदेशं पवित्रीकृत्य भद्राश्ववर्षं प्रतियाता॰ तन्मार्गेण लवणसमु-
द्रं गतेत्यर्थः ॥ मेरोः दक्षिणभागगतप्रवाहात्मकगंगा मानसरोवरसंगता सती या भारतं वर्षं प्रतियाता सा
अलकनंदा इत्यभिधीयते ॥ चकारात् दक्षिणभागस्थैलाचलतत्प्रदेशहरिवर्षकिन्नरवर्षाणि संयातेत्यर्थः ॥
पश्चिमभागप्रवाहात्मकं गंगा महाह्रदसंलग्ना चक्षुराख्या केतुमालं चकारात् पश्चिमभागस्थ इलाचलतत्प्रदे-
शमार्गेण लवणसमुद्रं प्रतियाता ॥ मिलितेत्यर्थः ॥ उत्तरप्रवाहात्मकं गंगैकदेशरूपा श्वेतजलसंयुक्ता भ-
द्राख्या मेरोः सकाशात् उत्तरान् नाम उत्तरस्थितान् कुरून् देशान् संयाता समुद्रं प्रतियाता गतेत्यर्थः ॥
चकारेण समुद्रस्यानुकर्षणं ज्ञेयः ॥ कुरूनिति बहुवचननिर्देशात् इलाचलरम्यकहिरण्मयकुरुवर्षमार्गे-
ण समुद्रं गतेत्यर्थः ॥ ३८ ॥ अथ सेत्यनेन सूचितं महिमानं गंगाया आह ॥ अथ नीत्न गंगायाः स्तुतिं गीत्याह ॥
मू॰ ॥ याकर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ॥ उक्ता स्मृता स्तुता वा पुनाति बहुधापि पापि-
नः पुरुषानिति ॥ ३९ ॥ टी॰ ॥ या गंगा विष्णुपदारविंदमकरंदरूपा॰ आकर्णिता नाम श्रुता॰ अभिलषि-
ता नाम निखिलशरीरावयवैर्गंगाजलस्याऽऽलोडनं विषयीकृता ॥ पीता नाम॰ जलपानेन सदा विषयी-
कृता॰ ॥ दृष्टाऽथ स्पृष्टा नाम स्पर्शनेन विषयीकृता ॥ अवगाहिता नाम जलेऽवलोडिता ॥ गाढविलोडनेन॰
उक्ता नाम गंगेति तालोष्ठपुटाभ्यामुच्चारिता ॥ स्मृता नाम ध्यानविषयीकृता ॥ स्तुता नाम स्तु-

२वी = १

अग्रगाकर्णनाद्युक्तक्रमेण तरजवर्वोक्तस्वोपजीव्यत्वं॥ यथा अवणानंतरं तदभिलाषस्तदनंतरं दर्शने चे
त्यादि सूचितं॥ अर्थांतरमस्य॥ या कांता मुखचंद्राध:कृतपूर्णशरच्चंद्रा॥ उक्तक्रमेण विषयीकृता
वशीकृता त्वं तं पाथिनः नाम कामाभिततप्तान् ऽनुरागिणः पुरुषान् पुनाति तद्विरहाऽनलजनित
दुःखापनोदनद्वारा सुखयतीत्यर्थः॥३९॥ अथाऽत्युत्कटमहिमांतरं दोधकवृत्तेनाह॥ मू॥ यां चलि
ते दलिताखिलबंधो गच्छति वल्गति तत्पितृसंघः॥ प्राप्ततटे विजितांतकदूतो याति नरे निरयात्सुरलोकं॥४०॥
टी॥ नरे नाम मनुष्ये यां नाम गंगां प्रति चलिते सति। गंगायामीत्युपक्रमं कुर्वति सति। तत्पितृसंघः नाम
तस्य नरस्य पितृगणः दलिताऽखिलबंधो भवति॥ दलिताः खंडिताः अखिलबंधाः संपूर्णयमपाशाः
येषां एतादृशास्तस्य पितृसंघाः भवंति। गच्छति नाम मार्गसंलग्ने सति तत्पितृसंघः वल्गति नाम अ
स्मत्कुलजः नरः गंगां गच्छति अतोऽस्माकं अपि सुरलोकवासोऽविलंबेन भवतीति मत्वानंदयति॥ एते
न मार्गोत्यपरावर्तनेन पुनस्तेषामतिदुःखं भवतीत्यधिकं पापं सूचितं॥ प्राप्ततटे॥ प्राप्तं गंगातीरं येन
एतादृशे नरे कुलजे। तत्पितृसंघः विजितांतकदूतः सं~~...~~ विजिताः पलायिताः गंगाबलेन मुष्टिघा
तादिभिः अंतकदूताः यमकिंकराः येन संघेन एतादृशः पितृगणः सन् निरयात् नाम नरकलोकात्
सुरलोकं नाम देवलोकं प्रतियाति नाम गच्छतीत्यर्थः॥ मज्जनादेरत्युत्कटफलं तदऽनिर्वचनीयमित्यपि सू
चितम्॥४०॥ अथ भारतवर्षस्य नवखंडानि वसंततिलकयाह॥ मू॥ ऐंद्रं कसेरु शकलं किल ता
म्रपर्णमन्यद्गभस्तिमदतश्च कुमारिकाख्यं नागं च सौम्यमिह वारुणमंत्यखंडं गंधर्वसंज्ञमिहं

उपक्रमसंगेषु नलान्निबंधनं चलतीतिपावंसू चितम्॥ =८१=

तिभगवत्क्रमःच्छे॥ ६ ॥ श्रीगणेशाय नमः॥

॥टी॰॥ इह नाम अस्मद्ऽधिष्ठिते भारतवर्षमध्ये लवणसमुद्रोत्तरतट हिमाद्र्योरंतरालप्रदेशे कि
लनिश्चयेन इति उक्तक्रमेण यम्मकोत्यभिमुखहिमाद्रयन्तरात्पूर्वप्रदेशाद्रोमकाभिमुखहिमाद्र्यन्तप
श्चिमभागपर्यंतं दक्षिणोत्तराणि तिर्यग्रूपाणि खंडानि भवंति॥ तत्र प्रथममैंद्रं खंडं॥ द्वितीयं क
सेरुनामकं शाकलं नाम खंडं ज्ञेयं॥ ताम्रपर्णं नाम तृतीयं ताम्रपर्णीशाकलं बोध्यं॥ अतोऽनंतरं चतु
र्थं गभस्तिमत्खंडं॥ चात्र कुमारिकाख्यं खंडं पंचमं॥ च पुनः नाम अपरं षष्ठं नागं नाम नागाख्यं शा
कलं बोध्यं॥ अनंतरं सौम्यं खंडं सप्तमं॥ अनंतरं अष्टमं वारुणं खंडं॥ अंत्यं नाम नवमं खंडं गांध
संज्ञकं=१ र्वं ज्ञेयं॥ अंत्यमित्यनेन दशमं नास्तीति सूचितम्॥ ननु व्याससिद्धांते गांधर्वं त्वथ वारुणमिति वचनेन वा
रुणखंडो नवमः॥ एवं आचार्योक्तक्रमः कथं प्रमाणं स्यात्॥ कुमारिकाख्यं नागं च सौम्यं वारुणसं
ज्ञकं गांधर्वमिति खंडानि नव तेषां भारते॥ इति वृद्धवसिष्ठोक्तेः॥ आचार्योक्तक्रमः प्रामाण्यं
प्रमाणभूतमित्यर्थः॥ इमानि नव खंडानि दिक्चक्रक्रमावस्थितानि॥ अस्योद्धारं उत्तरत्र ऐंद्र
यम्॥४१॥ अथ वर्णस्थितिः॥ नवखंडकारककुलपर्वतांश्च वसंततिलकयाह॥ मू॰॥ वर्णव्य
वस्थितिरिहैव कुमारिकाख्ये शेषेषु चांत्यजजनानि वसंति सर्वे॥ माहेंद्रशुक्तिमलयर्क्षकपा
रियात्राः सह्यः सविंध्य इह सप्तकुलाचलाख्याः॥४२॥ इति॥ टी॰॥ इह भारतवर्षे यत्पंचमं
मध्यभूतं कुमारिकाखंडं तस्मिन्नेव ब्राह्मणादिवर्णानां व्यवस्थितिः॥ भेदोऽस्तीत्यर्थः॥ एवकारोऽन्य

वं धस्सर्व
चलचेष्टः

॥श्रीः॥

× ऽपि=१ | अ०॥ऽऽ =३


चकारात्‌ कुमारिकाखंडे केचन यवनादयः संति॥ चतुनः इह भारतवर्षे सप्तकुलाचलाः संति
ते के॥ अत आह॥ माहेंद्रः १ शुक्तिः अत्र नामैकदेशेन नामग्रहणं इति॥ शुक्तिमान्‌ २ मलयः ३
ऋक्षकः ४ पारियात्रः ५ सह्यः ६ विंध्य ७ पर्वतेन सप्तमेन सह वर्त्तमानः॥ आचार्योक्तक्र
मः व्यासोक्तक्रमाद्भिन्नोपि उद्भवसिद्धसिद्धांतरीत्या प्रमाणभूत एव ज्ञेयः॥ ४२॥ इति॥
॥अथ सप्तलोककथनच्छलेनोपसंहारं शालिन्याह॥ मू॥ भूर्लोकाख्यो दक्षिणे व्यक्षदेशात्‌
तस्मात्सौम्योयं भुवः स्वश्च मेरुः॥ लभ्यः पुण्यैः खे महः स्यात्‌ जनोतोऽनल्पोऽनल्पैः स्वैः
स्तपः सत्यमंत्यः॥ ४३॥ इति॥ टी॥ व्यक्षदेशात्‌ नामनिरक्षदेशात्‌ दक्षिणे अर्थात्‌ तद्वार
समुद्रोत्तरतटमारभ्य दक्षिणभूगोलार्धे भूर्लोकाख्यः॥ भूर्लोको ज्ञेयः॥ भूर्लोकः आ
ख्या नाम संज्ञा यस्य॥ तस्मात्‌ व्यक्षदेशात्‌ सौम्यः नाम उत्तरभूगोलार्धरूपः अयं ज
बूद्वीपः भुवः नाम भुवर्लोकः ~~स्यात्‌~~॥ चतुनः मेरुः स्वं नाम स्वर्लोको ज्ञेयः॥ व
कारः आकाशस्य स्वर्गलोकप्रतिपादकवाक्यस्य खंडनार्थो॥ स्वर्लोको मेरुरेव
स्यादिति लघुवशिष्ठसिद्धांतोक्तेः॥ पुराणेपि मेरो देवस्थानोक्तेः तदतिरिक्तकल्पनेमानाऽभावात्‌॥

शोधनीयः =३

गो. टी.
३६

नाम=२ × त्र=१

नाम=२ अवशिष्टलोकानाह ॥ वे आकाशे नक्षत्रगोलादूर्ध्वं महर्लोकः गोलाकारोस्ति ॥ अतः महर्लोकात्
उपरि जनः ॥ जनलोकोस्ति ॥ अतः जनलोकादुपरि तपः तपलोकोस्तीत्यर्थः ॥ अन्ते भवः अन्त्यः
सत्यं ॥ सत्यलोकोन्त्ये ज्ञेय इत्यर्थः ॥ एषां यथोत्तरमुत्कर्षतामाह ॥ स्वैः पुण्यैः अनल्पानल्पैः
37 अर्थात् अधिकाऽधिकैः स्वैः कृतैः पुण्यैः मनुष्याणां उत्तरोत्तरलोकप्राप्तिः स्यादित्यर्थः ॥ ए
वं भूर्लोकाद्धः पाताललोकाः सप्तैव ॥ इति चतुर्दशभुवनान्युक्तानीत्युपसंहृतमितिभावः
॥४३॥ ~~ननु लंकाकुमध्ये यमकोटिरस्यादित्युक्तेन लंकातो मेरोरुन्नतत्वात् लंका~~ पू. देशाद्धिमगिरि
~~रुद्रक इत्यादिनामेर्वभिमुखत्वेन गिरिद्वयसन्निवेशात् भारतवर्षमिदं~~
~~हुद्यस्मादित्यादिना भारतादिवर्षत्रयसन्निवेशो मेर्वभिमुखं सम्प्र~~
~~युक्तं परं तु एवं सिद्धान्तदर्पणापि पुरा कूर्मवत् कुलकोलाद्रयः अनेन च~~
~~वर्षत्रयसन्निवेशस्य मेर्वभिमुखत्वसिद्धिः लंकातः सिद्धपुरस्य~~
~~अधः स्थत्वेन तत्स्थलोकानां लंकादेशस्थलोकाभिमुख~~
~~त्वेन सव्यासव्ययोस्तद्वैपरीत्येन संभवात् सिद्धपुरदक्षिणोत्तर~~
~~योः क्रमेण मेरुवडवास्थानयोः संभवात् पूर्वादिदिशां सव्या~~
~~न्तक्रमेण सद्भावनिश्चयात् । एवं भिन्नौ वै तैस्यै स्तदेशा इति~~
~~लंकाकनकाद्रि~~



शिव
३६

ˇ ननु=१ ˇ सिद्धपुरस्यापि निरक्षदेशत्वात् =२

~~ऽथो~~ पूर्वं लंकातः दिशामवस्थानमुक्तं। यक्षदेशात् भूर्भुवर्लोकादेरवस्थानं च प्रतिपादितं। एवं दिगवस्थानं लोकानां चावस्थानं सिद्धपुराद्यैरपीत्यंदभ्युपेतं ऽत उपजातिकयाह ॥ मू ॥ लंकापुरेर्कस्य यदोदयः स्यात्तदा दिनार्धं यमकोटिपुर्यां ॥ अधस्तदा सिद्धपुरेस्तकालः स्याद्रोमके रात्रिदलं तदैव ॥ ४४ ॥ टी ॥ लंकापुरे नाम लंकादेशावच्छिन्नभूगर्भे ऽर्कस्य सूर्यस्य यदा नाम यस्मिन्काले उदयः स्यात्। नाम उदयो भवति ॥ तदा नाम तस्मिन्नेव काले यमकोटिपुर्यां यमकोटिदेशावच्छिन्नभूगर्भे दिनार्धं स्यात्। मध्याह्नो भवतीत्यर्थः ॥ पुनः ~~तदा~~ लंकापुरे यदा यस्मिन्काले ऽर्कस्योदयः स्यात् तदा नाम तस्मिन्नेव काले अधः नाम लंकाऽपेक्षयाऽधः सिद्धपुरे सिद्धपुरावच्छिन्नभूगर्भे ऽस्तकालः स्यात् ॥ पुनस्तदैव नाम तस्मिन्नेव काले रोमके रोमकदेशावच्छिन्नभूगर्भे रात्रिदलं नाम अर्धरात्रं स्यात् ॥ अत्र कालपदोपादानादेकएवकालस्तत्तद्देशावच्छेदेन ~~स्वाधिभेदात्~~ उदयादिसंज्ञां लभते ॥ लंकाउपलक्षणं किंतु स्वस्वभूपरिधिसूत्रस्थदेशानां चतुर्थांशान्तरितानां मध्ये एवं सर्वत्रोदयादिवोध्यम् ॥ एतेन भूमेः गोलाकारत्वं सिद्धं ॥ तथा च सर्वदेशसूर्योदयास्तयोरैक्यनिरासात्प्रतिदेशं पूर्वापरयोरैक्याऽभावात् अधःस्थ सिद्धपुरे पूर्वापरयोर्व्यत्यासात्सव्यानुक्रमेण तत्रापि दिशामवगमाद्दक्षिणोत्तरयोरभिन्नत्वादुक्तार्थे न काचित्क्षतिरितिभावः ॥ ४४ ॥ ननु सूर्योदयास्तयोरेककालेऽसंभवेपि पूर्वापरयोरैक्यमस्तु। अन्यथा उदयास्तयोरेकदेशेपि कालतः स्या

ˇ रूपोपाधिना =३

ˇ तर्हि पूर्वापरयोः नास्तित्वमेव प्रसज्येत् ॥
ˇ पूर्वापरव्यवस्था कथं ज्ञायतेऽत आह ॥ =४ ॥

उपजातिकयाह ॥ मू॰ ॥ यत्रोदितोर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठां ॥ तन्मत्स्य-
तोन्ये च ततोखिलानामुदक् स्थितो मेरुरिति प्रसिद्धम् ॥ ४ ॥ पू॰ टी॰ ॥ यत्र नाम यस्मिन्प्रदे-
शे उदितोर्कः नाम निशावसाने दर्शनयोग्यतां गतः सूर्यः तत्र नाम तस्मिन्भागे किल
इत्यागमे पूर्वा नाम पूर्वदिक् ज्ञेया ॥ सूर्यः यत्र नाम यस्मिन्प्रदेशे प्रतिष्ठां गतः नाम दिनावसा-
ने दर्शनस्याऽभावं प्राप्तः तत्र तस्मिन्भागेऽपरा नाम प्रतीची दिक् बोधनीया ॥ एतेन एकप-
रिधिस्थयोर्नगरयोः प्राचीप्रतीच्योर्भेदोऽवश्यं भवति ॥ यत्र लंकास्थानां उदयेन प्राची तत्र सि-
द्धपुरस्थानां अस्तत्वेन प्रतीची यत्र च लंकास्थानां अस्तत्वेन प्रतीची तत्र सिद्धपुरस्थानां उद-
यत्वेन प्राचीति सिद्धपुरप्राच्यपरयोर्विपर्यस्तासाधुक्तार्थः समंजसः ॥ ननु चैवं प्राचीप्रतीच्योर्व्यत्या-
सेऽवश्यं दक्षिणोत्तरयोर्व्यत्यासः स्यादित्यत आह ॥ तन्मत्स्यतः इति ॥ तत् नाम ताभ्यां पूर्वापरस्या-
नाभ्यां वृत्तद्वयसंजातमत्स्यात् अन्ये नाम दक्षिणोत्तरे चकारात् स्वतः सिद्धे ॥ तथा च ॥ वृ-
त्तेः सव्यासव्ययोर्दक्षिणोत्तरनियमात् ॥ सिद्धपुरपूर्वतोपि सव्यासव्ययोर्दक्षिणोत्तरे ज्ञातव्ये इ-
ति भावः ॥ ततश्च दोषाऽभावः कथं अतोपसंहारव्याजेनोत्तरमाह ॥ ततः नाम उक्तप्रकारात् अ-
खिलानां नाम सर्वेषां मेरुः उदक् स्थितोस्ति इति प्रसिद्धम् ॥ उराणजनसिद्धैर्मिलित्वार्थः ॥ त-
योच ॥ यथा लंकास्थानां पूर्वादिविभागस्तथैव सिद्धपुरस्थानां पूर्वादिविभागः कुमध्यपरिधि

रोमकस्यजनः सिद्धपुरा भद्राश्वः स... तस्य सस्य ... महसेवड्वा सदक्षिणदिक् असे दक्षिण ... मेरुः सउत्तर ... दक्षिण और असे उत्तर दिक् जाणना ॥

ननु मेरोः सर्वदेशेभ्य उत्तरत्वेन तस्मात् दितरसर्वदेशानां दक्षिणत्वापत्त्या तत्रस्थानां दक्षिणोत्तरदिग्
विभागानामनुपपत्तेः भद्राश्वाच्चोत्तरान् कुरून् यातादितिपूर्वोक्तमसंगतमित्यत आह उत्तरं विव
त्वेः तत्साधकं दृष्टांतं च प्रथमं सुपजातिकयाह॥ मू॰॥ अथोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि
स्याद्यमकोटिरेव॥ ततश्च पश्चान्न भवेदवंती लंकैव तस्याः ककुभि प्रतीच्यामिति॥४६॥ टी॰
यथा लंकातः भूपरिधिचतुर्थांशे प्राच्यां दिशि यमकोटिस्तथा उज्जयिन्याः सकाशात्
कुचतुर्थभागे नाम भूपरिधिचतुर्थांशे प्राच्यां दिशि यमकोटिरेव स्यात्।एवकारात् ना
न्या इत्यर्थः॥ ततः नाम यमकोटिपुरात्।चकारात् यमकोटेरवंतीकस्यां दिशि इति विप
रीतविचारे।अवंती नाम उज्जयिनी पश्चात् नाम पश्चिमायां दिशि न भवेत्।किंतु [illegible]
रात्।तस्याः यमकोटेः सकाशात् प्रतीच्यां ककुभि नाम पश्चिमदिशि कुचतुर्थभागे लंका
एव॥ एवकारात् न्यूनाधिकांतरे अन्यः निरक्षदेशविशेषः स्यात् पश्चिमदिशि स्यादेव॥
तथा च लंकोज्जयिन्योः पूर्वदिशि भूपरिधिचतुर्थांशांतरे यथा यमकोटिस्तथा यमकोटेः पश्चि
मदिशि कुचतुर्थांशांतरे लंकोज्जयिन्योः दक्षिणोत्तरांतरितो उभे न स्यातां किंतु एका लंकैव
इति श्लोकार्थः॥ अयमभिप्रायः॥ लंकादिनिरक्षदेशोपरि भूपरिधिसूत्रं भूगोले॥ तथा च॥ लं

कोज्जयिनीभ्यां स्वपरिधिवृत्तमार्गेण कुचतुर्थांशां
तरे पूर्वापरयोर्यमकोटिरोमके।यमकोटिरोमकाभ्यां
यत् पूर्वापरवृत्ताकारं भूगोलपरिधिवृत्तं तत्तु २८

लंका भूपरिधिवृत्तमेव भवतीति ताभ्यां पश्चिमपूर्वे
यौ लंका।नोज्जयिनी॥४६॥ श्रीकृष्णाय नमः॥

॥ अथ दृष्टांतबलेनोत्तरोपजीव्यां भूमिकां उपजातिकयाह ॥ मू० ॥ तथैव सर्वत्र यतो हि यस्मात् प्रा
39 च्यां ततस्तत्र भवेत्प्रतीच्यां ॥ निरक्षदेशादितरत्र तस्मात्प्राचीप्रतीच्यौ च विचित्रसंस्थे ॥ ४६ ॥
टी० ॥ तथा एव नाम पूर्वोक्तदृष्टांतरीत्या सर्वत्र भौमे भूगोलसंबंधिप्रदेशेषु हि यस्मात्कार
नाम=४ णात् यतः यस्मात्स्थानात् यत्स्थानं प्राच्यां भवति ततः नाम तस्मात्पूर्वदिक्स्थानात्तत्
त् नाम अवधिभूतं स्थानं प्रतीच्यां न भवेत् ॥ इष्टप्रदेशमध्यत्वेन यत्स्थापरानुकारं भूरेखा भूगोले
येषु प्रदेशेषु लग्नं ते प्रदेशाः इष्टप्रदेशस्थानात् अपरसूत्रे पूर्वपश्चिमविभागेन यथायोग्यं पूर्वपश्चि
मस्थाः ते याः ॥ ननु अयं नियमः निरक्षदेशादितरत्र नाम साक्षदेशावधिविषये यस्माद्धेतोः दृश्यते
हेतोः= तस्मात्कारणात् प्राचीप्रतीच्यौ विचित्रसंस्थे विचित्राः नाम आश्चर्यजनिका संस्था ययोः एता
दृशे भवतः साक्षदेशे ॥ चकारः दक्षिणोत्तरयोगव्यवच्छेदार्थकः ॥ यस्मात् यद्दक्षिणं तस्मात्तत्
उत्तरमपि स्यात् इति दक्षिणोत्तरनियमः साक्षे निरक्षे च साधारणं ज्ञेयं ॥ अर्थात् इष्टप्रदेशान्मेरोरभिमु
खी उत्तरां दिशं निश्चलां कृत्वा निरक्षाभिमुखीं दक्षिणां च निश्चलां कृत्वा तन्मत्स्यात्प्राच्यपरा साध्या ॥
एवं यत्प्राच्यग्रे चिह्नं भवति तस्मात् पुनरुत्तरां दक्षिणां च साधयित्वा यावत्प्राच्यपरा साध्यते तावत्पूर्व
रेखायां न पतति ॥ उत्तरायाश्चलितत्वात्प्राच्यपरा चलिता भवतीत्यर्थः ॥ अत्यल्पम् ॥ विस्तरस्तु मरीच्यां

[illegible] ॥ ७९ ॥ श्रीगणेशाय नमः ॥ श्रीकृष्ण ॥

॥ अथ निरक्षदेशात्तिदिक्कदेशेषु साक्षत्वं स्पष्टयन्नाह. ॥ मू. ॥ उदग्दिशं याति यथा यथा नरस्त
था तथा स्यान्नतमक्षमंडलं ॥ उदग्ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः ॥४८॥
टी. ॥ नरः निरक्षदेशात् यथा यथा नाम यथोत्तरं ॥ उदग्दिशं याति नाम उत्तरदिशं गच्छति. त
था तथा नाम उत्तरोत्तरं. स्यात्. नाम स्वाधिष्ठितभूप्रदेशसमसूत्रे गोलार्धस्य भगोलप्रदेशरूप
ऽऽकाशस्थानात् अक्षमंडलं नाम भगोलध्रुवद्वयसमांतरितमध्यवृत्तं. नतं. नम्रं दक्षिण
दिशि पश्यति. ॥ नन्वेवं तद्देशस्य निरक्षदेशभिन्नत्वेपि साक्षत्वं कथं इत्यत आह. ॥ अथ च. ॥ क्षितेः
नाम स्वदेशावच्छिन्नभूगर्भक्षितिजवृत्तात् अंतरदिक् स्थानात्. उदग्ध्रुवं उन्नतं. नाम उच्च
स्थानस्थितं पश्यति. ॥ च पुनः निरक्षदेशाद्दक्षिणदिशं गच्छति तदा दक्षिणध्रुवं क्षितिजा
दुन्नतं पश्यति. उत्तरत्तो भचक्रं नतं पश्यतीति चार्थः ॥ तथा च. ध्रुवस्य क्षितिजे लग्नतयाऽभा
वान्निरक्षदेशभिन्नत्वेन साक्षत्वमापन्नमिति भावः ॥ ननु ध्रुवस्य अक्षस्थानापन्नत्वेन प्रस्तुतनिर
क्षदेशस्य साक्षत्वं. तदितरदेशस्यैकध्रुवदर्शनेपि द्वितीयध्रुवस्य दर्शनाऽभावात् निरक्षत्वौचित्यात्.
ध्रुवोन्नत्या साक्षत्वप्रतिपादनमप्रसंगमत आह. ॥ तदंतरे नाम ध्रुवक्षितिजवृत्तप्रदेशयोरंतरे मध्ये
यान्योन्तरवृत्ते पलांशकाः संति ॥ तथा. पलांशानां अक्षांशसंज्ञत्वात् तेषां च तदुन्नतिरूपत्वात् तस्मा

२४

यत्रोदितोर्क इत्यादि पूर्वापरयंजकोत्क्रि देशसंबंधेन चद्रू चष्टाऽक्षांशावधि विषये । यगलंबजलबजिनोन
काइत्यादिनाऽऽचार्येरिव स्फुटीकृतम् ।।४७।। अथोपस्थितनिरक्षदेशानां स्वरूपज्ञानं वंशस्थेनाह ।। निर
५० क्षदेशे क्षितिमंडलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।। तदाश्रितं खेजलयंत्रवत्तथा भ्रमद्भचक्रं निजम
स्तकोपरि ।।४८।। टी० ।। यद्देशाऽवच्छिन्नभूगर्भक्षितिजात् ध्रुवौ च्याऽभावत्तद्देशो निरक्षपदवाच्यः ।।
स्वाधिष्ठितभूप्रदेशे भूगर्भावच्छेदेन यत् भूगोलार्धं दृश्यं अदृश्यं तत्संधिस्थं वयत् भूपरिधिवृत्तं
तत् क्षितिजमंडलम् ।। अस्मिन्भूप्रदेशे दक्षिणोत्तरौ ध्रुवौ नक्षत्रगोलाधिष्ठितौ क्षितिजमंडलोपगौ
भवतस्तस्मिन्निरक्षदेशे तदाश्रितं । तत् नाम ताभ्यां दक्षिणोत्तराभ्यां ध्रुवाभ्यां आश्रितं नामस्थिरीभू
तम् । खे आकाशे जलयंत्रवत् । नाम उद्यानादि जलसेकार्थं कूपोदकोद्धारहेतुकं सुप्रसिद्धं काष्टघटि
तं मृद्भांडपंक्तिसहितं । तत् यथा भ्रमति तद्वत् अनवरतं भ्रमद्भचक्रं । पश्चिमाभिमुखभ्रमे
णयुक्तं यत् नक्षत्रगोलं तं भचक्रं निजमस्तकोपरि । निजशब्देन क्षितिजाऽऽस्पृक्तौ ध्रुवौ यस्मि
न्देशे दृश्येते तद्देशनिवासी नरः स्वमस्तकोपरि मूर्धोपरि नरः पश्यति ।। अर्थात् ध्रुवद्वय (यत्र
समानीतं भगोलमध्यवृत्तं तत् स्वपूर्वापरवृत्ताकारेण एवं भवतीत्यर्थः ।।४८।। श्रीरस्तु ।।

^ अंशयोः=२ ^ द्वादशराश्यंशैः=४

॥ उदग्दिक्क्षयात्रियथा यथा नर इत्यनेन अपसारयोजनैरनुपातः सूचित आचार्यैः ॥ अथ भायोजनज्ञानेन तद्
अंशज्ञानं कथं अतो योजनांशयोः परस्परं संबन्धं करोतीत्याह ॥ मू॰ ॥ योजनसंख्या भांशैर्गुणिता स्वपरिधिहृता
भवंत्यंशाः ॥ भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम् ॥ पू॰ ॥ टी॰ ॥ योजनसंख्याः नाम स्वदेशस्व
निरक्षदेशयोरन्तरस्थितयोजनसंख्याः भांशैर्नाम षष्ट्यधिकशतत्रयेण गुणिताः ॥ पुनः स्वपरिधि
हृता स्वपदेन भूमिः ॥ कुतः ॥ योजनानां भूमावेव ज्ञानात् ॥ तस्याः भूम्याः यः प्रागुक्तपरिधिस्तेन भ
कार्यां ^ क्ताः यल्लब्धाः ते भूमौ नाम योजनसंबंधिभूपरिधिप्रदेशैकदेशाः अंशाः योजनसंबंधेन भवन्ति ॥
ननु भूमौ योजनानां ज्ञानात् तदुत्पन्नांशा भूमावेवेति कथं तेषामक्षांशत्वं कुतः ॥ तेषामुक्तादिशाऽऽ (अक्षांशानां)
काशस्थत्वनियमादत आह ॥ ते अंशाः नाम भूमिसंबद्धांशास्ते कक्षायां नाम भाधिष्ठितगोले
अर्थात् भूम्यवधिप्रदेशद्वयसंबंधिस्वगोलानुसृतसूत्राभ्यां यत् भगोले ज्ञातं स्यान्तद्वयं तदं
तराले याभ्यां तरांतररूपे ते भूमिसंबद्धांशाः वा विकल्पेन भवंति उभयत्र भवंतीत्यर्थः ॥ न च
उरांतरं चेदिदमुत्तरं स्यादित्यत्र पूर्वोक्ते अक्षांशज्ञानावश्यकतया अत्र च परिध्याऽवश्यकतयाऽन्योन्याश्रय
इति वाच्यं पूर्वं यंत्रादिवेधेन विषुवत्प्रभातो सूर्यनतांशत्वेन अक्षांशानामाकारात् एतेन वापदेशापाद
नात्स्वपरिधीत्युक्त भूमौ चेद्योजनानि गृहीतानि तदा भूपरिधिः भगोले चेद्योजनानि गृहीतानि तदा
योजनात्मको भगोलपरिधिरिति परिधिलब्धव्यवस्थेति निरस्तं आकाशे योजनगणनाऽसंभवात् दूरत्वाच्च ॥

॥ श्रीः ॥

४२

41

॥ अथ प्रसंगादंशज्ञाने योजनज्ञानमाह· ॥ भागेभ्यः नाम अंशेभ्यो यत्तं नाम विपरीतात्ऽनुपातेन योजनानि भ
वंति· ॥ यदि भांशैः ३६० भूपरिधिर्लभ्यते तदा तदंशैः किं ॥ एतदनुपातेन योजनानि भवंति· ॥ इत्यर्थः ॥ चका
रात् अनेन प्रकारेण भूमावेव योजनज्ञानं कक्षायामित्यर्थः ॥ मतांतरोक्तरीत्या कक्षायामपि योजन
संख्याज्ञानमित्यर्थो वा· ॥ ५० ॥ अथ परमादंशविशेषोक्त्या जेनोक्तप्रकारे उपपत्त्यवगमस्तु
पजातिकयाह· ॥ मू· ॥ सौम्यं ध्रुवं मेरुगताः खमध्ये याम्यं च दैत्या निजमस्तकोर्ध्वे ॥ सव्यापसव्यं भ्र
मदृक्षचक्रं विलोकयंति क्षितिजप्रसक्तम्· ॥ ५१ ॥ टी· ॥ मेरुगताः नाम मेरुस्थाः । सौम्यध्रुवं नाम
उत्तरध्रुवं· खमध्ये नाम तत्तद्द्रष्टाऽऽकाशमध्ये प्रदेशे· विलोकयंति· ॥ पुनः दैत्याः याम्यध्रुवं
नाम दक्षिणध्रुवं खमध्ये विलोकयंति· ॥ चकारादड्वाग्निसंस्थाऽपि इत्यर्थः ॥ किंभूते खमध्ये
ज-१ निजे मस्तकोर्ध्वे ॥ नाम स्वस्वमस्तकोपरि यदाकाशस्थानं भगोले तत्र· ॥ कुतः ॥ आकाश
स्य सर्वतस्तुल्यत्वात्· ॥ उक्तमेव पुनर्द्रढयति· ॥ ते मेरुक्तमेरुस्थाः ॥ ऋक्षचक्रं नाम ध्रुव
द्वयसमांतरितभाधिष्ठितगोलमध्यवृत्तं· भ्रमत्· नाम पश्चिमाभिमुखमनवरतं भ्रममाणं·
क्षितिजप्रसक्तं· नाम तदऽवच्छिन्नभूगर्भक्षितिजवृत्ताऽनुकारं· ॥ ते मेरुवडवास्थाः विलो
कयंति· ॥ पश्यंतीत्यर्थः ॥ ननूर्ध्वाधःस्थाऽपि देवाऽसुराः कथमेकरीत्या पश्यंतीति· अतआह· ॥ किंभूतं भ्रमत्

[illegible]

ननु खमध्यं कथमवगम्यमतः खमध्य
विशेषणमाह· ॥ =६

देवाः भ्रमद्भचक्रस्य भ्रमणं सव्यमार्गेण पश्यंति ॥ असुरास्तु अपसव्यमार्गेण नाम पूर्वादिदिग्व्युत्क्र
ममार्गेण पश्यंतीत्यर्थः ॥ अर्थात् मेरौ पूर्वादिदिशः क्रमेण यमकोटि पूर्वे ॥ लंका दक्षिणे ॥ रोमक प
श्चिमे ॥ सिद्धपुर उत्तरे ॥ एतत्संबंधिनः ॥ वडवास्थाने तु ॥ यमकोटि सिद्धपुर रोमक लंका संबं
धिनः पूर्वादिदिशः भवंति ॥ भचक्रस्य भ्रमणं प्रवहवायुहेतुभूतं पश्चिमाभिमुखं सर्वगसाधा
रणमेव ॥ एवं च ॥ निरक्षदेशे यथा क्षितिजस्थ तत्र सक्तौ ध्रुवौ तथा मेरौ वडवास्थाने च क्षितिज
प्रसक्तं भचक्रं ॥ यथा च तत्र भचक्रं मध्यस्थं तथा तत्र ध्रुवयोः खमध्यस्थत्वं ॥ तेन च खमध्य
स्य भूगर्भक्षितिजस्थत्वपरिधिप्रदेशाद्भिन्नतो नवत्यंशांतरितत्वात् नवत्यंशाः ९० परमा उन्नतांशाः ॥
अथ च निरक्षदेशात् मेरुवडवास्थानयोः भूपरिधिचतुर्थांशांतरितत्वनिश्चयात् अन्यथो
क्ता ऽनुपपत्तेः ॥ भूपरिधिचतुर्थांशयोजनैर्नवत्यंशाः ९० तदेष्टयोजनैः के इत्यनुपाते प्रमा
णहरेण चतुर्भिस्तिनच्छेदं लब्धं च परिवर्त्यैत्यादिरीत्या फले गुणिते फलस्थाने भांशाः ३६० प्रमा
णस्थाने भूपरिधिस्ताभ्रांतरिच्छाहतमाघूर्ण्य इच्छाफलमिति त्रैराशिकोक्तप्रकारेण योज
नसंख्या भांशो इत्यादि प्रागुक्तमुपपन्नम् ॥ भागेभ्यो योजनज्ञानं वैपरीत्येन भवेदेवेति किंचिगमि

(स्त्री: ४२)

42

॥अथ सपरिधिरित्यनेन उपस्थितं प्रागुक्तभूपरिधिं संस्मरँस्तत्संगात्प्रागुक्तभूव्यासे विशेषं च वदन् भूगोल-
स्य स्पष्टफलं विशेषांतरं कथनोपजीव्यं शार्दूलविक्रीडितेनाह ॥मू.॥ प्रोक्तो योजनसंख्यया सपरिधिः सप्तांग-
नंदाब्धयः ॥ तद्व्यासः कुभुजंगसायकभुवः सिद्धांशकेनाधिकाः ॥ पृष्ठक्षेत्रफलं तथा युगगुणं त्रिंशा-
च्छराष्टाद्रयो भूमेः कंदुकजालवत्कुपरिधिव्याप्ताहतेः प्रस्फुटम् ॥ ५२ ॥ टी.॥ योजनसंख्यया
कुपरिधिः सप्तांगनंदाब्धयस्तुल्यः ४९६७ प्रोक्तः कथितः ॥ तद्नाम तस्य भूपरिधेः व्यासः यो-
जनसंख्यया कुभुजंगसायकभुवस्तुल्यः १५८१ प्रोक्तः ॥ ननु व्यासे भनंदाग्निहते विभक्ते खबाण-
सूर्यैः परिधिः स्यात्सुसूक्ष्म इत्यस्य व्यस्तरीत्या व्यासानयनार्थं न्यासः ॥ तत्र परिधिः ४९६७ खबाण-
सूर्यैः १२५० हतः ६२०८७५० भनंदाग्निभिः ३९२७ भक्तः लब्धं सावयवो भूव्यासः १५८१।१२।२९ ५५९/३९२७
तत्कथं अवयवो नोक्तः इत्यत आह ॥ सिद्धांशकेनाऽधिकाः नाम एकयोजनस्य चतुर्विंशत्यंशे-
नाऽवयवेन युक्ताः कुभुजंगसायकभुवः प्रोक्ताः तद्व्यासः प्रोक्तः ॥ तथा च भनंदाग्निभक्ते शेषं
१६३ अनेन हरस्य ३९२७ ÷ १६३ = २४ १५/१६३ भागे गृहीते लब्धं सावयवं चतुर्विंशति २४ १५/१६३
तत्र स्वल्पांतरात् अवयवो नोक्तः चतुर्विंशतिरेवोक्ता ॥ पुनः ॥ भूमेः यद्वत् कंदुकजालवत् ॥ तस्य.

यथा· स्फुटं नाम समकोष्टमितिरूपं सूक्ष्मं· दृष्टक्षेत्रफलं· भवेत्· तथा·कुपरिधिव्या
साहतेः नाम भूपरिधिव्यासयोर्घातात्· युगगुणत्रिंशच्छराष्टाद्रयः परिमितो गोधनीयः॥
अर्थात्भूगोलस्य युगगुणत्रिंशच्छराष्टाद्रयमित·७८५३०३४ भूपरिधिव्यासघातादुत्पन्नं·
समकोष्टमितिरूपं सूक्ष्मं दृष्टक्षेत्रफलं· ज्ञेयमित्यर्थः॥ ननु भूमिगतचतुरस्रादिक्षेत्रे समको
ष्टमितिरूपं फलं यथा भवति· तथा भूगोले तथाभूतं फलं· कथं संभवेत्· सर्वतोवृत्तत्वात्·
अत आह· ॥कंदुकजालवदिति·॥ वस्त्रखंडतूलादीनां गोलाकारादिरज्वानिबद्धो बालैः क्री
डार्थं कंदुकः क्रियते तदुपरि समंतात् यज्जालं तस्य· चतुःकोष्ठकाः समाः॥ कचित्त्रिभुज
क्षेत्राकाराः कोष्टकाः दृश्यंते·॥ इत्यर्थः॥ तथाहि॥ गोलोपरि पूर्वापरपरिधिमार्गे योजनांत
भवंति· ९ रेण याम्योत्तरानुकारेण परिधयः परिध्यर्द्धमिता ॥ तेन गोले परिधिमिताः वृत्ताः दक्षिणो
त्तराः स्युः॥ अथ च·॥ पूर्वापरपरिधेर्याम्योत्तरयोर्यासु योजनांतरेण लघुवृत्तानि पूर्वस्थ
यथोत्तरं स्वल्पपरिधिरूपाणि निरेकव्यासतुल्यानि स्युः॥ तेन गोले दक्षिणोत्तरमार्गे पूर्वापराणि व
त्तानि व्यासमितानि दृश्यंते ऽतः परिधिव्यासाहतितुल्याः कोष्टकाः उत्पन्नाः ॥ संपूर्णगोले·॥

५५=१

न च · दक्षिणोत्तरयोर्ध्रुवयोर्मार्गे लिखुस्थानानि परिधियोजनांतरेण निरेकपरिध्यर्द्धमितानि · अतः प
रिध्यर्द्धतुल्यानि पूर्वापराणि वृत्तानीति · परिधिवर्गार्द्धतुल्याः कोष्ठाः गोलोपरि सर्वतः परिधे
र्दर्शिता ध्या स्यात् · दर्शिता ह्योपपन्ना · कथं व्यासपरिधिघाततुल्यास्त इति वाच्यं ॥ याम्योत्तरवृ
त्तसंपातावधि गोलांतर्व्यासस्य प्रत्यक्षत्वात् ॥ फलज्ञानार्थं व्यासपरिध्योरावश्यकत्वात् ॥
व्याससंबंधेन फलस्य पूर्वैरुपदिष्टत्वाच्चेति भावः ॥५२॥ ननु भूपरिधिकथने विशेषाऽव
गमार्थं व्यासकथनं तु · प्रसंगात् युक्तं ॥ परं तु · प्रयोजनाऽभावात् भूपृष्ठेऽत्र फलं त
ऽनुचितं अन्यथा भूवृत्तफलभूगोलांतर्घनफलयोरुक्तत्वापत्तेरित्यतः शार्दूलवृत्तेनाह ॥
दुष्टं कंदुकपृष्ठजालवदिलागोले फलं जल्पितं लल्लेनास्य शतांशकोऽपि न भवेद्यस्मात्फलं वा
लघु ॥ तस्मात्तत्र विरुद्धमुद्धृतमिदं नैवाक्षुणावलुवा ॥ हे श्रीदागणका विचारयत तन्मध्यस्थ
बुद्ध्या भृशं ॥५३॥ टी· ॥ लल्लेन · इलागोले नाम भूगोले · कंदुकपृष्ठजालवत् · यत्फलं नाम स्व
ग्रंथे ॥ नगशिलीमुखाग्निभुजंगमन्नवकवह्निरसेषुगजाश्विनः ॥ कुवलयस्य वृतेः परियोजनान्य
थ जगुः खलु कंदुकजालवत् ॥१॥ इत्यनेन · यत्फलं · जल्पितं · नाम उक्तं · तत् दुष्टं · नाम असत् ॥

॰ लल्लोक्त=१

कुतो हेतोः यतः प्रत्यक्षविरुद्धं ॥ प्रत्यक्षबाधो हि महाद्दूषणं ॥ अत्र हेतुमाह ॥ यत्तल्लोक्तफलस्य श (यस्मात्=१

भवेत्=२ तांशकोपि वास्तवं नाम पारमार्थिकं फलं न भवति यदा वास्तवफलं शतगुणितफलत्वेनोक्तं स्यात्
तदापि समो यतः स्यात्त्वत्पद्धे शतांश इत्युक्तरीत्या तत्समीचीनत्वमभ्युपेयमिति भावः ॥ ननु
मदुक्तफलस्य वस्तुभूतत्वेन मदुक्तदूषणं स्वप्रभाल्पयोतकसमं लग्नमेवेत्यत आह ॥ इदं मदुक्तं
नैवोद्धृतं अस्तु ॥ किंतु वस्तुभूतं नाम पारमार्थिकं इत्यर्थः ॥ अथवा किं शपथपरिहारेण उद्धृतं
अस्तु वा ॥ वस्तु अस्तु वा ॥ हे धीदाः ~~[illegible]~~ नाम हे सदसत्त्वविवेचनदक्षाः ग
णकाः नाम गणिततत्त्वपारगामाः यूयं तत् नाम लल्लोक्तभूपृष्ठफलं मध्यस्थबुध्या नाम पक्षपा
तराहित्येन यथार्थतत्त्वविचारात्मकप्रज्ञया धिया नाम अत्यर्थं सूक्ष्मविचारेण विचारयत ।
नाम विचारविषयं कुरुत ॥ एतेन लल्लोक्तभूगोलफलनिरासार्थं मया भूगोलपृष्ठफलमुक्तमि
ति भावः ॥ ५३ ॥ अथ लल्लमते भूपृष्ठफलानयनार्थं न्यासः ॥ ननु भास्करमते यथा परिधिव्यासाह
चतुर्थांश= ति चतुर्भागरूपं वृत्तफलं ॥ पुनः परिधिव्यासाहति चतुर्गुणरूपं गोलपृष्ठफलं भवति ॥ कुतः ॥ वृ
त्तक्षेत्रे परिधिगुणितं व्यासपादफलं यत् तत् कन्दुकस्येव जालमिति पाठ्युक्तेः ॥
तथा लल्लमते वृत्तफलं परिधिगुणं गोलपृष्ठफलं भवति ॥ कुतः ॥ वृत्तफलं परिधिघ्नं समं ततो

भवति गोलपृष्ठफलमिति लल्लपाठ्युक्तेः ॥ तथाहि ॥ लल्लमते ॥

भास्करमते $\frac{प \cdot \times व्या}{४}$ = वृ·फ

प·× व्या·×४ = गो·पृ·फलं भास्करमते·
वृ·फ·×प·= गो·पृ·फलं लल्लमते·

६टी.३
५४

55

१०५०
भूव्यासः ॥ नभश्शरांभ्राद्रितयोस्तुयविस्लृत्तिरितिवाक्येन प्रतिपादितं · भूव्यासः १०५० अतोऽनु

पातेन परिधिः ॥ ७ : १०५० :: प २२ = $\frac{१०५० \times २२}{७}$ = $\frac{१५० \times ७ \times २२}{७}$ = १५० × २२ = भू.प ३३००

एतस्यास्थूलत्वेन व्यवहारोपयोगित्वेनांगीकारात् न क्षतिः ॥ अथवा सूक्ष्मप्रकारांगीकारे ऽल्ल

ल्लमते परिधिः सूक्ष्मः ॥ किंचिन्न्यूनखखामराः ३२९८।४०।१४८ व्यासः १०५० गुणितः ३४६३९६९४ च

तुर्भक्तो भूवृत्तफलं ८६५९०३।३० सूक्ष्मपरिधिना ३२९८।४०।१४८ गुणितं जातं भूगोलपृष्ठ

फलं नगशरशरगजगुणरामरसशरनागयमभितं किंचिदधिकत्र्यंशावयवयुतं · २८५६३३८५५७

।२२।४८ अवयवस्यार्धन्यूनत्वेन अनिबंधनं संप्रदायसिद्धं ॥ अन्यथा लल्लोक्तभूपृष्ठफला

ऽनुपपत्तिः ॥ एवं जातं लल्लमते भूपृष्ठफलं २८५६३३८५५७।२२।४८ ॥ वृत्तफलगोलांत

र्घनफलयोः प्रयोजनाभावादऽनुक्तिरितितात्पर्यम् ॥ इति ॥ ५३ ॥ अथ यदुक्तिलोत्तर वृत्ता

परकोष्ठकोपपत्त्या परिधिगुणितवृत्तफलस्य गोलपृष्ठफलत्वं खंडयति · अत्र नुभा ॥ यस्त (पृ = ६)

रिध्यर्धविष्कंभवृत्तं कृत्वा किलाभ्युक्तं ॥ तेनार्धं छाद्यते गोलः किंचिदन्यो ऽवशिष्यते ॥ ५४ ॥

गोलक्षेत्रफलात्तस्मादस्त्रक्षेत्रफलं यतः ॥ सार्धद्विगुणितासन्नं तावदेवापरे दले ॥ ५५ ॥ एवं पं

चगुणात् क्षेत्रफलात् पृष्ठक्षेत्रफलं खलु ॥ नाधिकं जायते तेन परिधिघ्नं कुतः कृतं ॥ ५६ ॥

ग्रि.व.
५५

॥टी०॥ गोलस्य यत्परिध्यर्धं तन्मितं विष्कंभोर्द्धं नाम व्यासो यथा भवति तथा अंशुकं नाम वस्त्रं
किलेति निश्चयेन वृत्तं कृत्वा ॥ अर्थात् गोलपरिध्यर्द्धमितो व्यासो यथा भवति तथा वस्त्रजनि
तमंडलं वर्तुलाकृतिं कुर्यात् ॥ एवं वस्त्रस्य तैर्कृताकारं कृत्वा ॥ तेन वृत्तवस्त्रेण छत्राकाररू
गोलस्य = ४ पेण अर्द्धगोलः छाद्यते नाम गृहीतपरिध्यर्धशकलं छाद्यते आच्छाद्यत इत्यर्थः ॥ किल
इत्यनेन गोलस्य वृत्तपरिधिव्यासाधीनत्वे इतिभागयोर्गोलपृष्ठे परिध्यर्धतुल्यमेवांतरमतः गोला
र्द्धछादनं परिध्यर्द्धमितव्याससमितवस्त्रवृत्तेन भवति । नन्यूनाधिकाभ्यां । ताभ्यां गोलार्द्ध
खंड = ६ न्यूनाधिकगोलस्यैकैकलछादन संभवादिति सूचितं ॥ अनया उक्त्या वस्त्रवृत्तफलमेव
गोलार्धपृष्ठफलत्वेन फलितं ॥ इति ॥ अथ सूक्ष्मदृष्ट्या खंडयति ॥ पुनः गोलार्धछादनेकृते
ऽपि ॥ वस्त्रे नाम गोलार्धछादकवस्त्रमंडले किंचित् अंशरूपं वस्त्रं अवशिष्यते अवशेषतां
प्राप्नोतीत्यर्थः ॥ कुतः ॥ गोलार्द्धछादने गोलपरिधितो महानपि वस्त्रवृत्तपरिधिर्भवति तथा
पिसंकोचात् गोलपरिधितुल्यो दृश्यते प्रतीयत इत्यर्थः ॥ इदमेव कारणं वस्त्रास्यशेषे ॥ अ
अतः वस्त्रवृत्तक्षेत्रफलात् न्यूनं गोलार्धपृष्ठफलं सिद्धमिति भावः ॥ ५४ ॥ ननु एतावता परि

टी॰ ॥ तस्मात् गोलक्षेत्रफलात् वस्त्रक्षेत्रफलं नाम वस्त्रवृत्तक्षेत्रफलं॰ यत॰ कारणात् सार्द्ध

द्विगुणितासन्नं भवति॰ तावदेवाऽपरे किल गोलार्धे दले नाम गोलार्धे इत्यर्थः॥

तथाहि॰ सप्तव्यासे द्वाविंशति २२ मितपरिधिर्लभ्यते तदैकमितव्यासे किं $\frac{22\times1}{7} = \frac{22}{7}$ जाता

एकमितव्यासे परिधिस्वरूपं $\frac{22}{7}$ पुनः गोलक्षेत्रे परिधिगुणितव्यासपादः फलं स्यात्॰

इत्यादिना गोलवृत्तक्षेत्रफलस्वरूपेन्यासः॥ एकव्यासे परिधिः $\frac{22}{7}\times$ व्या॰ $\frac{1}{1} = \frac{22}{7}$ अस्य

पादः $\frac{22}{7} \div \frac{4}{1} = \frac{11\times2\times1}{7\times2\times2} = \frac{11}{14}$ गोलवृत्तक्षेत्रफलं जातं $\frac{11}{14}$ अयं वस्त्रके लार्धे पू

र्वे परिध्यर्द्धरूपे यत्त तस्याऽर्धेयं॰ ॥ तत्र पूर्व परिधिः $\frac{22}{7}$ अस्यार्धः $\frac{11}{7}$ अयं परिध्यर्द्धः अ

स्यार्धेयं $\frac{11}{14}$ यत्पूर्वक्षेत्रफलं तदेवायं॰ ॥ परिध्यर्धमितं $\frac{11}{7}$ विष्कंभं यत्रांशुके भवेत्॰

अर्थात् यस्य वस्त्रस्य दीर्घता परिध्यर्द्धमिता विस्तारोपि परिध्यर्धमितः तस्य वस्त्रस्य क्षेत्रफ

लं समकोष्टमितिरूपं परिध्यर्द्धस्य वर्गपरिमितं भवति॰ ॥ यथा॰ ॥ परिध्यर्धः $\frac{11}{7}$ एतन्मितं वि

स्तारं एतन्मितं दैर्घ्यं च यत्रांशुके तस्यांशुकस्य क्षेत्रफलं $\frac{11}{7}\times\frac{11}{7} = \frac{121}{49} = 2\frac{23}{49}$ जातं क्षेत्रफलं

$2\frac{23}{49}$ अनेन वस्त्रेण ॥ गोलार्धं छाद्यते॰ ॥ यत्र गोले परिधिः $\frac{22}{7}$ व्यासः $\frac{1}{1}$ तस्य गोलस्यार्धः॥

१ घ्नं·नाम परिधि=५ १ पृष्ठफलंनाम·१ १ क्षेत्रफलान्नाम·१

अथ दूषणं स्फुटयति·॥ एवमिति·॥ एवं उक्तरीत्या गोलपृष्ठफलं· पंचगुणाद्वृत्तक्षेत्रफलात्
स्थूलदृष्ट्याप्यधिकं न जायते·॥ खलु इत्यनेन स्थूलदृष्ट्या पंचगुणं भवति· सूक्ष्मदृष्ट्या
१ मया=२ तु·तन्न्यूनमेव·॥ कुतः॥ वस्त्राऽवशेषात्·॥ अत एवाऽऽचार्यैः पाद्याभुक्तं·॥ नुसंवेदेरुप
रिपरितः कंदुकस्येव जालमिति·॥ तेन·प्रत्यक्षविरोधदूषणेन·लल्लेन वृत्तक्षेत्रफ
लं परिधिगुणितं· कुतः नाम कस्मात्कारणात्कृतं·॥ निःकारणं कृतमित्यर्थः॥ तेन·त
त्वाप्युक्तं वाक्यमिदं·॥ असंगतं प्रतिभाति·॥ तथा च तद्वाक्यं·॥ वृत्तफलं परिधिघ्नं स
मं ततो भवति गोलपृष्ठफलमिति·॥ अन्यथा·गोलपृष्ठे परितः परिधिदर्शनात्·
परिधिवर्गस्यैव त्वदुक्तरीत्या पृष्ठफलत्वापत्तिः॥५६॥ ननु एतावता नदुक्तं फलं इसकद्केवी
कथं दूषितं·। कुतः॥ लल्लोक्षिपादकै दृघातित पाटिगणितग्रंथस्याऽप्रसिद्धत्वेन परिधि
गुणितफलस्याऽन्यथैव चोपपत्त्योक्तत्वात् तदऽज्ञानात्·॥ नहि अयं स्थाणोः अपरा
धः यत् एनं अंधो न पश्यतीत्यतोऽनुष्टुभाह·॥ मू·॥ वृत्तक्षेत्रफलं यस्मात् परिधिघ्नं
नयुक्तिमत्·॥ दुष्टत्वात् गणितस्यास्य दुष्टं भूपृष्ठजं फलम्·॥ ५७॥ टी·॥ अन्यथा

॥श्री:॥
४६

46

प्रकाशितं=१

केनापि प्रकारांतरेण तदुक्तफलाऽनुपपत्त्या परिधिगुणितेतदुपपत्तेः तात्पर्यं यदुद्भावितं तत्त
युक्तमेव ॥ परंतु यस्मात्सूर्योक्तदूषणात् कुत्तद्देन फलं परिधिघ्नं एष्टफलं भवतीत्ये
तत्तात्पर्यं युक्तिमत् नाम उपपत्तिसिद्धं न ॥ अयुक्तमित्यर्थः ॥ ननु तात्पर्याऽशुध्या फलं
कुतः उक्तं इति मंदाशंकावारणाय दूषणोपसंहारमाह ॥ दुष्टत्वादिति ॥ अस्य लल्लाचार्यस्थितस्य
गणितस्य ष्टष्टफलानयनस्य दुष्टत्वात् नाम अयुक्तत्वात् मूष्टष्टजं नाम भूगोलष्टष्टसंबं
यत्=६ धि फलं लल्लोक्तं दुष्टं नाम असदित्यर्थः ॥ कुतः ॥ तत्फलस्याऽसंगतप्रकारोत्पन्नत्वा
तत्=६ दिति भावः ॥ अथ बालावबोधार्थं गोलस्योपपत्तिं दर्शयेत् ॥ भूगोलं दारुमयं विधाय त
स्य चक्रकलातुल्यं परिधिं प्रकल्प्य २१६०० पुनस्तस्य भूगोलस्य मस्तके नाम अभीष्टस्थाने
केन्द्रं प्रकल्प्य पुनस्तत्र केन्द्रे बिंदुं कृत्वा तस्मात् बिन्दोः सकाशात् गोलस्य षण्णवत्यंश ९६ भागेन
२१६०० ÷ ९६ = लब्धं २२५ शरद्विदस्रसंख्येन २२५ धनुरूपेण एव अंतरेण नाम वर्तुला
कारं रेखामुत्पादयेत् वृत्तं कुर्यादित्यर्थः ॥ पुनस्तस्मादेव बिन्दोः सकाशात् तेनैव द्विगुणसूत्रे
णाऽपरां त्रिगुणेन अन्यां एवं चतुर्विंशतिगुणं यावत् भवति तावत् चतुर्विंशतिवृत्ता
प्राप्ति=१ नि उत्पद्यंते एषां वृत्तानां वाराणाऽ द्वियमाः २२५ इत्यादीनि ज्याखंडानि व्यासार्धानि स्युः ॥

२१६०० | २२५
१९२
२४०
१९२
४८०
४८०
००

क्रियते=२ तानि एव=१

भ्राव.
४६

१ नत्रिज्या = ३ १ बाणाक्षियमाः = ४

तेभ्यः व्यासार्धेभ्यः सकाशात् अनुपातेन वृत्तप्रमाणानि साध्यानि ॥ तद्यथा ॥ तत्र तावद्
न्त्यवृत्तस्य मानं चक्रकलाः २१६०० तस्य व्यासार्धस्य मानं त्रिज्यातुल्यं ३४३८ अतोऽनु
पातः ॥ यदि त्रिज्यातुल्यव्यासार्धे ३४३८ संबंधिवृत्तस्य मानं चक्रकलामितं लभ्यते तत्
दा बाणाक्षियमाः २२५ इत्यादिव्यासार्धैः किं ॥ अतः २२५ इत्यादिज्यार्धानि चक्रकलागु
णितानि त्रिज्या ३४३८ भक्तानि वृत्तमानानि जायन्ते ॥ $\frac{225 \times 21600}{3438}$ = लब्धं वृत्तमानं
द्वयोर्द्वयोर्वृत्तयोर्मध्ये एकैकं वलयाकारं क्षेत्रं उत्पद्यते
एवं वलयाकाराणि चतुर्विंशति क्षेत्राणि भवंति ॥ बकुज्यापक्षे बहूनि स्युः ॥ तत्र महद्धो
वृत्तं २१६०० भूमिं परिकल्प्य उपरितनं लघुवृत्तं मुखं प्रकल्प्य शरादि दस्त्रमितं २२५
१ क्षेत्र = ५ लम्बं प्रकल्प्य ॥ प्रागुक्तप्रकारेण फलं साधयेत् ॥ तद्यथा ॥ चतुर्भुजेऽन्यत्र समान
लंबे ॥ लंबेन निघ्नं कुमुखैक्यखण्डम् ॥ अस्यार्थः ॥ अन्यत्र समानलंबे चतुर्भुजे क्षेत्रे ॥ कुमुखै
~~कार्य~~ क्यखंडं नाम कुमुखयोगार्धं लंबेन निघ्नं नाम लंबगुणं कृत्वा यद्भवति तत् क्षेत्रफलं स्यात् ॥
इत्यादिना पृथक् २ फलानि साधयेत् ॥ तेषां फलानां योगो गोलार्धपृष्ठफलं भवति स्यात् =
तद्द्विगुणं सकलगोलपृष्ठफलं स्यात् भवति । एवं रीत्या संपूर्णगोलस्य यत्फलमायाति

१ पृष्ठफलं = २

॥श्रीः॥ ४७

47

लगक्रमज्याः॥२२५।४४९।६७१।८९०।११०५।१३१५।१५२०।१७१९।१९१०।२०९३।२२६७।२४३१।
२५८५।२७२८।२८५९।२९७७।३०८४।३१७९।३२५६।३३२१।३३७२।३४०९।३४३१।३४३८

	॥क्षेत्रफलम्॥		वृत्तमानम्	
	प्र.क्षे.फ. १५९०३१ ७९/१९१	१	मु.वृ.श.स्त्रं.१००० क्र.प्र.वृ.१४१३ ११७/१९१ लं.२२५	१
लं.२२५	द्वि.क्षे.फ. ४७६३५ ?/१९१	२	मु.प्र.वृ.१४१३ क्र.द्वि.वृ.२८२० १८०/१९१	२
लं.२२५	त्रि.क्षे.फ. ७९१६२३ ७९/१९१	३	मु.द्वि.वृ.२८२० क्र.त्रि.वृ.४२२५	३
लं. २२५	चतु.क्षे.फ. ११०३३२४ ११६/१९१	४	चतुर्थवृत्तं. १३५/१९१ ५५९१ १२९/१९१	४
	पंच.क्षे.फ. १४१००७८।१०२/१९१	५	पं.वृ.मानं. ६९४२ ७८/१९१	५
	७१३०४७१ ३१/१९१	६	८२६१ १४९/१९१	६
१५५/१९१	२००३७९५	७	९५४९ १४१/१९१	७
१०५/१९१	२२८९३४५	८	१०८००	८
	२५६५०००	९	१२०००	९
३०५/१९१	२८२९३४५	१०	१३१४९ १४१/१९१	१०
७५/१९१	३०८१६७५	११	१४२४२ १७८/१९१	११
७५/१९१	३३२०५७५	१२	१५२७३। ५७/१९१	१२
६०/१९१	३५४५३४०	१३	१६२४०। १६०/१९१	१३
१४६/१९१	३७५५२६२	१४	१७१३९ ५२/१९१	१४
११४/१९१	३९४८९२६	१५	१७९६२ ५८/१९१	१५
११०/१९१	* ४१२४९२२	१६	१८७०३।३२७	१६

श्रीवं. ४७

क्षेत्रफलम्॥		॥वृत्तमानम्॥	
४२८३९५२ १९९/१९२	१७	१९३७५।१७५/१९१	१७
४४२५३१४।२६	१८	१९९६०।४०	१८
४५४६८८४।१५६	१९	२०४५६।१०४	१९
४६३७४१४।१७६	२०	२०८६४।१७६	२०
४७३०६५४।८६	२१	२११८५।६५	२१
४७९२८५३।७७	२२	२१४१७।१५३	२२
४८३४५५४।१८६	२३	२१५५६।०४	२३
४८५५०५२।६८	२४	२१६०।००	२४
सर्वत्रलंबः २२५		कलात्मकमानं॥	

॥चतुर्विंशतिक्षेत्रफलानामैक्यम्॥

इष्टमेव= ७४२२१७८९।१२४ अयं गोलार्धपृष्ठक्षेत्रफलम्॥ अयं व्यासार्धपरिधिघातसमम्॥ तत्र व्यासार्धः ३४३८ परिधिः २१६०० अनयोर्घातः ७४२६०८०० अस्य चतुर्विंशतिक्षेत्रफलैक्यं तुल्यं न दृश्यतेऽतः स्थूलकल्पनेयम्॥ ननु पंचगुणितवृत्तक्षेत्रफलात्गोलपृष्ठफलस्य पूर्वोक्तयुक्त्यास्तु नत्वसिद्धावपि नियतं चतुर्गुणितं पाट्याकथमुक्तं येन गुणहरयोश्चतुर्मितयोर्नाशात्परिधिव्यासाहति रूपं पृष्ठफलं युक्तं स्यात्। प॰×व्या वृत्तक्षेत्रफलस्वरूपं इदं वेदैः ४ गुणं उपरि ४ परितः कंदुकस्य जालेव फलं स्यान्न तदेव पृष्ठफलं गोलस्य। {(४/१)×(व्या×प॰/४)} इदं गोलपृष्ठफलसमकं पं॰ प्राक्तनयोश्च युक्तिसिद्धिः

(॥सर्वग्रहदः १९१ बोधनीयः॥)

नीशाघ्ना स्वपरिधेर्घातः एवाऽवशिष्टम्. गोलपृष्ठफलस्य स्वरूपं. ॥ इत्यतोऽनुष्टुप् चतु
ष्केण परिधिव्यासाहतिरूपं गोलपृष्ठफलं स्वाभिमतयुक्त्या द्रढयति. ॥ मू. ॥ गोलस्य
परिधिः कल्प्यो वेदघ्नज्यामितैर्मितः ॥ मुखबुध्नगरेखाभिर्यद्वदामलके स्थिताः ॥ ५८ ॥ इष्ट
न्तेव प्रकास्तद्वत् प्रागुक्तपरिधेर्मितान्. ॥ ऊर्ध्वाधः कृतरेखाभिर्गोले वप्रान् प्रकल्पयेत्. ॥ ५९ ॥ त
त्रैकवप्रके क्षेत्रफलं खण्डैः प्रसाध्यते ॥ सर्वज्यैक्यं त्रिभज्यार्द्धहीनं त्रिज्यार्द्धभाजितं ॥ ६० ॥ एवं
वप्रफलं तत्स्यात् गोलव्याससमं यतः ॥ परिधिव्यासघातोऽतो गोलपृष्ठफलं स्फुटं. ॥ ६१ ॥ टी. ॥
गा=८ अभीष्टे कस्मिंश्चिद् ग्रन्थे यावंति ज्याखण्डकानि कल्पितानि तेषां संख्या चतुर्गुणाः कार्याः तत्संख्या
मितो गोलस्य परिधिः कल्पनीयः ॥ कुतः ॥ जीवाग्राणां परिधिप्रांतसक्तत्वेन जीवाग्रांतरस्य परि
धिभागस्य मापकत्वसिद्धेः तस्य मापकस्य वृत्तचतुर्थांशे स्थितत्वात् ज्यामितसंख्या परिधेरवग
मात्. तत्तोनुपातः ॥ वृत्तचतुर्थांशे ज्यासंख्यातुल्य २४ परिधिः तदा संपूर्णवृत्ते किं. ॥ $\frac{१}{४}$; $\frac{१}{१}$; $\frac{२४}{१}$
हरस्य छेदलवयोः परिवर्तनात् जातं रूपं ($\frac{४}{१} \times \frac{१}{१} \times \frac{२४}{१}$) एवं रीत्या संपूर्णवृत्ते परिधिः ज्यासंख्या
चतुर्गुणतुल्यो पर्यवसितः ॥ अत उक्तं. ॥ वेदघ्नज्यामितैर्मितः गोलस्य परिधिः कल्प्य इति. ॥ विनैतत्
दाश्रयं पृष्ठफलोत्पादनस्याऽशक्यत्वात्. ॥ गोले मापकांतरेण परिधिमानांतरसंभवात्. क

= पृ: मे हि हि र्द हि

मया=२ यत्=३

इह किल धीवृद्धिदे तंत्रे ब्रह्मगुप्तैः चतुर्विंशति २४ ज्यार्द्धानि कल्पितानि अतः चतुर्गुणा ज्यासं
ख्या कृता जाता बस्रवति: २४×४=९६ ॥ अतो वै बस्रवति ९६ हस्तमितो गोले परिधिः कल्पि
तः ॥ अथ श्लोकार्थः ॥ वेद घ्न ज्यार्धमितैर्मितः नाम वेदैर्घ्नैः यैः नाम गुणितैः ज्यामितिः नाम ज्यासंख्या २४

तुल्य=४ तस्य मितः नाम तुल्यः ९६ अर्थात् तन्मितो हस्तः गोलस्य नाम अभीष्ट गोलस्य परिधिः कल्प्यः
कल्पनीय इत्यर्थः ॥ ततः अनंतरं ॥ यद्वत् नाम यथा आमलके मुखबुध्नगरेखाभिः स्वतः नाम स्व
तः सिद्धः वप्रकाः दीर्घाकाराः दृश्यन्ते तद्वत् नाम तथा गोले नाम अभीष्टगोलेपि ऊर्ध्वाधः कृत
रेखाभिः प्रागुक्त परिधेर्मितान् वप्रान् प्रकल्प्य तु पुनः तत्र एकवप्रके खंडैः क्षेत्रफलं प्रसाध्यते
मुखं अग्रभागचिन्हं ॥ बुध्नं वृत्तसक्तचिन्हं ॥ अथ खंडकल्पना ॥ अभीष्टगोले हस्तांतरे हस्तांतरे सप्त
चत्वारिंशत् ४७ वृत्तान् कुर्यात् ॥ तत्र मध्यस्थस्य चतुर्विंशत्यात्मकवृत्तस्य व्यासार्धं त्रिज्या ३४३८
एवं कृते संपूर्णे गोले बस्रवति ९६ संख्याकाः दीर्घाकाराः आमलकवत् वप्राः नाम कोष्ठकाः

सप्त=३ उत्पत्स्यंते ॥ पुनः चत्वारिंशत् ४७ वृत्तसंपादनात् एकवप्रे दीर्घाकारे यो त्रिज्यारूप व्यासार्धादु
परि [struck out] ४८ सूक्ष्मकोष्टकाः उत्पद्यंते ॥ व्यासार्धादधोभागेपि च [struck out]
कोष्टकाः ॥ एवमेकस्मिन् वप्रेऽष्टचत्वारिंशत् ४८ सूक्ष्मकोष्टका भवंति ॥ संपूर्णगोले ९६×४८

चतुर्विंशति २४ =पं.२ चतुर्विंशति २४ =पं.२

२२ : ९६ :: ७ : = ६७२/२२ = ३३६/११ = ३० ६/११ या

५ क्षेत्रफलं साधयेत् पुनरे = ३० ११ ६ =

श्रीः ४९

त्तगोलपृष्ठफलाऽवगमार्थं एकवेधे प्रतिखंडं पाठ्युक्तक्षेत्रव्यवहारोक्तरीत्या एकवेधेऽष्टचत्वारिंश
त्कोष्ठकेषु सूक्ष्मेषु यानि क्षेत्रफलानि आगतानि तेषामैक्यं· सर्वजीवानां २४ योगस्त्रिज्यार्धहीनस्त्रिज्यार्ध
भक्त इति परिणतं· तत्तु गोलव्याससमं·॥ यदा एकस्मिन् वेधे सूक्ष्मत्वेन फलं साध्यते तदा चतुर्गुणज्या
मितितुल्यं ९६ परिधेरवगतव्याससतुल्यं क्षेत्रफलं भवति·॥ तथा च संपूर्णगोले परिधितुल्यकाः ९६ वेधाः
कल्पिताः॥ पुनरेकवेधे फलं व्याससतुल्यं ३०।३३ पर्यवसितं॥ ततोनुपातः॥ यदि एकवेधे व्याससमितं ३०।३३
पृष्ठफलं तदा पसवति ९६ वेधेषु किं १ : ९६ : : ३०।३३ जातं परिधिव्यासघातसमं ९६ × ३०।३३
संपूर्णगोलस्य पृष्ठफलम्॥ कुतः॥ एकहरस्याऽविकृतत्वात् तस्य नाशाच्च·॥ अतोपपन्नमिदं
सूत्रं॥ सर्वज्यैक्यमित्यादि॥ अस्यार्थः॥ यत् सर्वज्यैक्यं ५४२३३ तत् त्रिभज्या ३४३८ र्धेन ७१९ हीनं·
कार्यं ५२५१४ पुनः यच्छेषं तत् त्रिज्यार्द्धेन ७१९ भाजितं कृत्वा ५२५१४ ÷ ७१९ = यल्लब्धं तत्
$\frac{५२५१४}{७१९}$ = ३० $\frac{६४४}{७१९}$ × ६० = ३२ $\frac{५४४}{५७३}$ एकवप्रफलं स्यात्· एवं एकवेधे जातं फलं ३०।३२ $\frac{५४४}{५७३}$ शेष
स्याऽर्धाऽधिकत्वात् पूर्णाङ्कमेव गृहीतं ३०।३३ यतः एतावानेव पसवति ९६ परिधेर्गोलस्य व्यासः॥
अतः परिधिव्यासघातः गोलपृष्ठफलं· स्पष्टं नाम कथितमित्यर्थः॥ इति श्लोकार्थः॥ अथ बालानां प्र
तीत्यर्थं एकवप्रव्यासार्धात् परिचतुर्विंशति सूक्ष्मकोष्ठकानां फलसाधनार्थं धूलीकर्म्म लिख्यते॥
तत्र प्रथमक्षेत्रे भुजाग्रयोरैक्यात् मुखाऽभावः अत एव प्रथमं क्षेत्रं त्रिभुजं· अन्या (नउंसकम् = १) नि

शिव· ४९

१स्य=२ १ चतुर्विंशति २४ =गु.३ पं.

लंबाश्च एकहस्तसंख्यामिताः॥ उक्तयुक्तेः॥ एवं प्रथमक्षेत्रस्य मुखं शून्यं भूमिस्तु प्रथमवलयाकार
वृत्तांतर्गतपरिधेरेकदेशो वप्रस्थः॥ द्वितीयक्षेत्रस्य मुखं प्रथमक्षेत्रभूमिः॥ द्वितीयक्षेत्रस्य भूमिस्तु
द्वितीयवलयाकारवृत्तस्य वप्रांतःस्थितः प्रदेशः॥ एवमुत्तरोत्तरं॥ पुनः वप्रार्धे वलयाकारवृत्तपरि १स्य=३
धेरेकदेशरूपः भूमिः चतुर्विंशति २४ क्षेत्रस्य तस्य मानं एकहस्तपरिमितं॥ कुतः॥ तद्वृत्तस्य त्रिज्या
रूपव्यासार्धोत्पन्नत्वात्॥ यतः पूर्वं षण्णवति ९६ हस्तमितो परिधिः स्वीकृतः॥ हस्तांतरे २ षण्ण
वति संख्याकाश्च गोले वप्राः स्वीकृताः॥ अतः चतुर्विंशति क्षेत्रस्य भूमिः एकहस्तपरिमिता॥ अत्र
तोनुपातः॥ त्रिज्यारूपव्यासार्धे ३४३८ एकमापकमिता भूमिस्तदा स्वस्वज्यारूपव्यासार्धवृत्ते केति॥
तथा च भूमिरेकमापकात् न्यूनैवाऽन्येषां क्षेत्राणां॥ एवं त्रिज्याभक्ताः प्रथमादिज्याक्षेत्रेषु भूमयः सि
द्धाः॥ पुनः लंबगुणं भूम्यर्धं स्पष्टं त्रिभुजे फलं भवतीत्युक्त्या प्रथमत्रिभुजक्षेत्रस्य प्रथमज्यार्धं त्रि
ज्याभक्तं क्षेत्रफलं सिद्धं॥ द्वितीयक्षेत्रे लंबेन निघ्नं कुमुखैक्यखंडमित्युक्त्या प्रथमद्वितीयज्ययोरै
क्यस्यार्धं त्रिज्याभक्तं क्षेत्रफलं सिद्धं॥ एवचार्धअर्धैक्ययोस्तुल्यत्वात् ३४३८ : २२५ : : १ भूः

क्षेत्राङ्काः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
भूमयः	२२५/३४३८	४४९/३४३८	६७१/३४३८	८९०/३४३८	११०५/३४३८	१३१५	१५२०	१७१९	१९१०	२०९३	२२६७	२४३१	२५८५	२७२८	२८५९	२९७७	३०८४	३१७७	३२५६	३३२१	३३७२	३४०९	३४३१	३४३८

सर्वग्रहः ३४३८ इति ज्ञेयं॥

(श्रीः)
पृ.

॥ अर्धविप्रेक्षु लंबेन निघ्नं कुमुखैक्य खंडं इत्युक्त्या चतुर्विंशति २४ सूक्ष्मकोष्टकानां क्षेत्रफलस्य स्वरूपं ॥ सर्वत्र लंबः १ हस्तमितः ॥

क्षेत्रफलानि	[illegible]	[illegible]	$\frac{\frac{\text{द्वि.}+\text{त्रि.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{त्रि.}+\text{च.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{च.}+\text{प.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{प.}+\text{ष.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{ष.}+\text{स.}}{2}}{\text{त्रि.}}$	[illegible]	$\frac{\frac{\text{अ.}+\text{न.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{द.}+\text{ए.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{ए.}+\text{द्वा.}}{2}}{\text{त्रि.}}$	$\frac{\frac{\text{द्वा.}+\text{त्र.}}{2}}{\text{त्रि.}}$
कोष्टाः	१	२	३	४	५	६	७	८	९	१०	११	१२
ज्याः	$\frac{\frac{१२+१३}{2}}{\text{त्रि.}}$	$\frac{\frac{१३+१४}{2}}{\text{त्रि.}}$	$\frac{\frac{१४+१५}{2}}{\text{त्रि.}}$	[illegible]	$\frac{\frac{१६+१७}{2}}{\text{त्रि.}}$	$\frac{\frac{१७+१८}{2}}{\text{त्रि.}}$	$\frac{\frac{१८+१९}{2}}{\text{त्रि.}}$	[illegible]	[illegible]	[illegible]	[illegible]	$\frac{\frac{२३+२४}{2}}{\text{त्रि.}}$
	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४

एतादृशानुयातेन सर्वदृष्टस्याः भूमयः सिद्धाः ॥ $\frac{२२५}{\text{त्रि.}}$ इत्यादयः ॥ पुनः प्रथमक्षेत्रे मुखाऽभावः ॥ लंबः सर्वत्रैकहस्तमितः ॥ अतः भूम्यर्धं लंबगुणं रूपं जातं $\frac{}{\text{त्रि.}}$ भूम्यर्धमेव लंबस्य एकमितत्वात् ॥ एकेन गुणितं तदेव ॥ अतः भूम्यर्धमेव जातं ॥ प्रथमक्षेत्रफलं तस्य स्वरूपं $\frac{\frac{२२५}{\text{त्रि.}}}{2}$ एतेन प्रथमज्यार्धं त्रिज्याभक्तं यल्लब्धं तदेव क्षेत्रफलं ॥ द्वितीयक्षेत्रे ॥ प्रथमक्षेत्रस्य भूमिर्मुखं द्वितीयवृत्तस्यैकदेशो वर्तितगतिखंडं द्वितीयक्षेत्रस्य भूमिः ॥ लंबः १ हस्तमितः ॥ द्वितीयक्षेत्रस्य मुखं $\frac{२२५}{\text{त्रि.}}$ भूः $\frac{४४९}{\text{त्रि.}}$ लं. १ कुमुखैक्यखंडं लंबेन।

शिव.
५.

निघ्नं जातं द्वितीयक्षेत्रगस्य क्षेत्रफलं ॥ तस्य स्वरूपं च ॥ (कु·४४९/त्रि· + मु·२२५/त्रि·) × लं·१ एकेन गुणितं तत्तदेव · न तु स्वरूपांतरं भवति ॥ एतेन · प्रथमद्वितीयज्यायोरैक्यं त्रिज्याभक्तं यल्लब्धं तस्यार्धं क्षेत्रफलं सिद्धमथवा प्रथमद्वितीयज्ययोरैक्यस्यार्धं त्रिज्याभक्तं लब्धं क्षेत्रफलं कुतः ॥ ऐक्या ऽर्धा ऽर्धैक्ययोस्तुल्यत्वात् ॥ यत् लब्ध्योरैक्यार्धं तदेव लब्ध्योरर्धैक्यमू ॥ इत्यादि चतुर्विंशति सूक्ष्मकोष्टकानां फलेतेयं ॥ पूर्वपत्रे तस्य स्वरूपमुद्घाटितं च मया ॥ एवं रीत्या चतुर्विंशति कलानामैक्ये क्रियमाणे ॥ संपूर्ण प्रथमज्याद्वयायुक्तं द्वितीयज्यार्धं त्रिज्याभक्तं लब्धं फलद्वयोर्योगः सिद्धः ॥ पुनः फलत्रययोगेन संपूर्ण प्रथमद्वितीयज्ये त्रिज्यार्धेन च युक्ते त्रिज्याभक्ते लब्धं प्रथमद्वितीयत्रितीयफलानां योगः सिद्धः ॥ एवं चतुः फलानां योगस्तु ॥ संपूर्ण प्रथमद्वितीयत्रितीयजीवानां योगे चतुर्थीजीवायाः अर्धयोगः त्रिज्याभक्तः लब्धं चतुः फलानां योगः एवं रीत्या त्रयोविंशतिजीवानां संपूर्णानां योगे चतुर्विंशतिके जीवायाः अर्धस्य योगः त्रिज्याभक्तः लब्धं चतुर्विंशति फलानां योगः सिद्धः ॥ ~~[illegible]~~ सर्वज्यैक्यं त्रिज्यार्धहीनं त्रिज्याभक्तं लब्धं संपूर्णफलानां योगः ॥ अथवा त्रयोविंशतिजीवानामैक्यं त्रिज्यार्धयुक्तं त्रिज्याभक्तं लब्धं संपूर्णफलानां योगः ॥ चतुर्विंशत्यात्मकजीवायाः त्रिज्यात्वात् ॥ इदं वृत्तपादार्धे क्षेत्रफलं जातं ॥ एतत् द्विगुणं संपूर्णैकवृत्ते दीर्घाकारे क्षेत्रफलं सिद्धं ॥ यदा तु एकवृत्ते संपूर्ण एककालावच्छेदेन वास्तवफलमभीप्सितं तदा त्रयोविंशतिजीवानामैक्यं त्रिज्यार्धयुक्तं यत्तद्भवेत् तस्मिन् तस्य त्रिज्याभक्तं लब्धं अर्धवृत्तफलं भवति · पुनः त्रिज्यार्ध

कृत्वायत् तत्

द्वितीय = ८

द्वितीया = ८

एतेन = ११

तत्र पूर्वोक्तस्य (margin): [illegible]

५. त्रिज्यार्धहरं = पं. २ गु.

अत्रार्धवप्रकलस्य भाज्यं सर्वज्यैक्यं त्रिज्यार्धहीनं सिद्धं ॥ भाजकं तु त्रिज्या ॥ पुनः संपूर्णवप्रफलार्थं तस्य द्विगु
णे क्रियमाणे ॥ गुणहरौ गुणेनापवर्तितौ. जातं ~~सं...~~ ॥ गुणः २ हरः त्रिज्या ॥ अर्धवप्रफलस्वरूपं ।

$\dfrac{\text{सर्वज्यैक्यं — त्रिज्यार्धं}}{\text{त्रिज्या}}$ एतत् द्विगुणं जातं संपूर्णवप्रफलस्वरूपं $\dfrac{\text{सर्वज्यैक्यं — त्रिज्यार्धं}}{\text{त्रिज्या}} \times \dfrac{2}{1}$ = ~~सर्वज्यैक~~ अत्र गुणहर

हरौ ~~...~~ द्वाभ्यामपवर्तितौ. जातं संपू

र्णवप्रस्यफलं ॥ $\dfrac{\text{सर्वज्यैक्यं — त्रिज्यार्धहीनं}}{\text{त्रिज्यार्धं}}$ अतः उक्तम्. संपूर्णवप्रफलार्थं ॥

सर्वज्यैक्यं त्रिभज्यार्धहीनं त्रिज्यार्धभाजि तं इत्युपपन्नम् ॥ तथा च ॥ सर्वज्यैक्यं

भाज्यरूपं = त्रिभज्यार्धहीने कृते यत्तद्भवति तत् चतुर्गुणज्यामिति तुल्यपरिध्यवगतयत्सूक्ष्मव्यासः तेन गुणितेन त्रि
ज्यार्धं यत्तद्भवेत्. तेन तुल्यं पूर्वोक्तभाज्यं स्यात् ॥ अर्थात् ॥ सर्वज्यैक्यं त्रिभज्यार्धेन हीनं यदंकं ॥ पुनः
व्यासगुणितं त्रिज्यार्धं युत् ॥ अनयोस्तुल्यता दृश्यते ॥ तथाहि ॥ यथाकृते ज्योत्पत्तिविधि
वगतसूक्ष्मसावयव चतुर्विंशति जीवानां योगो जिनावयवयुता षट्त्रिंशदवयवयुतं चंद्रतत्त्वाब्धि
शरमितः ५४२५१।३८।२४ अयं कलारूपपिंडः त्रिज्यार्धेन १७१९ अनेनोनः जातं ५२५३२।३८।२४
अयं ॥ चक्रकलातुल्यपरिधौ २१६०० द्विगुणत्रिज्याव्यासः ६८७६ तदा चतुर्गुणज्यामितितुल्य
परिधौ ८६ परिधौ क इत्यनुपाताद्वगत सूक्ष्मसावयवव्यासः ३०।३३।३६ अनेन त्रिज्यार्धघातः
कृतः तदा जातोऽयं ५२५३२।३८।२४ एवं जाता तुल्यता ॥ अतः पार्श्वोक्तफलं चतुर्गुणितं निःशंकमु

[illegible]

गु. रु. पं.
अनयोर्योगजातो (२९०९७ + १०५०) ३०१४७ × २२ / ७ = ९४७५४७ ५/७

वृद्धिर्भवति तत्तद्दिनांतसंबंधिभूमिगोलस्य लल्लेन स्पष्टफलमुक्तं ॥ तथाहि ॥ लल्लोक्तो
भूव्यासः १०५० अस्माद्दिनांते भूम्याः वृद्धियोजनानि सप्तशोकाक्षिभनवाब्धि २९०९७
मितानि [illegible] ब्रह्मदिनांते भूव्यासः सप्तेंद्रत्रिंशन्मितः ३०१४७ अस्मात्
द्वाविंशतिघ्न इत्यादिना विधिः किंचिदूनोंगाहीतः ९४७५४७।१।३० अनयोर्घातेकृ
ते उक्तंफलमुपपन्नम् ॥ २८५६३३…५७ तथाचलल्लमतेपि व्यासपरिधिघातात्स्म
कृष्टष्टफलांगीकारात् तदभिप्रायानभिज्ञानत्त्वया भवदुक्तदोषो भवदज्ञानं सू
चयति ॥ इत्युपतं प्रवत्त्रया ॥ मू ॥ वृद्धिर्विधेरह्नि भुवः समन्तात् ॥ स्याद्योजनं भू
भवभूतिपूर्वैः ॥ ब्राह्मेलये योजनमागवृद्धेनीशे भुवः प्राकृतिकेऽविलायाः ॥ ६२ ॥
टी ॥ विधेरह्नि नाम ब्रह्मणो दिने भुवः नाम भूगोलस्य समंतात् नाम सर्वतः चतुः
पार्श्वेषु भूपृष्ठे भूभवभूतपूर्वैः ॥ भूमौ भवतीति भूभवः ॥ भूतः जंतुः प्राणी त्यर्थः ॥
एतत्त्व सर्वे नाम आदिर्येषां ते ॥ अर्थात् भूम्युत्पन्नतृणवृक्षप्राणिपर्वतपाषाण
पत्तनादिभिः क्रमेण योजनं वृद्धिः स्यात् ॥ तथाच ॥ कल्पे प्राथमिको भूव्यासो यो

नत्र वृद्धिर्वेचिन्त्यं = ७

(९४७५४७) × ३०१४७ = २८५६३३[illegible] गु. प. पं.

(श्रीः
५२)

52

न न्वेवमपि त्वया योजनद्वयाधिकं प्राथमिकभूम्यां मत्तदवगत पदिधिभ्यां कथं भूत
ष्ट फलं नो क्रमिष्यत आह ॥ ब्राह्मे इति ॥ ब्राह्मे लये नाम ब्रह्मसंबंधि लये भुवः योजनमा
ग च ह्रे नीशः स्यात् ॥ अतस्तन्नोक्तम् ॥ अथ प्रसंगात्सर्वभूमि नाश प्रलयमाह ॥ प्रा
कृतिके इति ॥ प्राकृतिके नाम प्रकृति संबंधिनि प्रलयकाले ऽखिलायाः नाम संपूर्णायाः
भुवः नाम भूम्याः नाशः नाम नाशो भवतीत्यर्थः ॥ ६२ ॥ ननु उनभ्व नाशं समुपैति
वेधसो निशास्यये कृत्रिमम्लमय श्वयः ॥ समस्तमेतत् भुवनाद्दि वेधसः क्षये क्षयं याति
विहाय शाश्वतं इति लक्ष्णोक्त्या ब्राह्मे लये सकल भूमिनाशो ब्रह्मदिनान्ते ब्रह्मरात्र्यन्ते च
योजनमात्र वृद्धि नाश इति सिद्धेन विरोध इत्यत आह ते भेदात्मकं लयं विवक्षुः प्रथमं
लयद्वयमुपजातिकयाह ॥ मू ॥ दिने दिने यत्र म्रियते हि भूतैः दैनं दिनं तं प्रलयं वदंति ॥
ब्राह्मं लयं ब्रह्मदिनान्तकाले भूतानि यत्र ब्रह्मतनुं प्रजान्ति ॥ ६३ ॥ टी ॥ दिने दिने नाम
प्रत्यहं भूतैः प्राणिभिः यत्र म्रियते नाम देहस्त्यज्यते तं प्रलयं दैनंदिनं नामकं वदंति
ब्रह्मदिनान्तकाले ब्राह्मं लयं बुधाः वदंति ॥ ननु ब्रह्मदिनान्ते * ब्रह्मलोकनाशाऽभावात् *
ब्राह्मलयत्वं कथं अत आह ॥ भूतानीति ॥ यत्र नाम यस्मात्कारणात् भूतानि प्राणिनः

(* प्राणिविनाशो लय उच्यते न त्वसांप्रतं *
ग. प. ४)

तदेतिरै लेवयद्गतु प संहार्याजेनाह ॥ इतीति ॥ इत्युक्तप्रकारेण लयः प्राप्तिविनाशः
च चतुर्थी नाम चतुर्भेदात्मकः ॥ अथ चतनविनाशास्वकल्पत्व ॥ अथ भास्कर विरोध

अथोपजातिकया चतुर्थं लयभेदमुक्त्वायं वदन् लयमुपसंहरति ॥ मू॰ ॥ ज्ञानाग्निदग्धाऽखि
लपुण्यपापाः मनः समाधाय हरौ परेशे ॥ यद्योगिनो यांत्यनिवृत्तिमस्मादात्यंतिकं चेति ल
यश्चतुर्थः इति ॥ ६५ ॥ टी॰ ॥ यत् यस्मात्कारणात् योगिनः नाम योगाभ्यासकाः । बाह्यवि
षयेभ्यः मनः समाहृत्य हरौ नाम परमेश्वरे समाधाय नाम संलग्नेस्कृत्वा अनिवृत्तिं ना
म देहत्यजनेन परमेश्वरैकतया पुनरनुपपत्तिं यांति नाम प्राप्नुवंति ॥ अस्मात्कारणात्
तं योगीलयं अवांतरभेदेन आत्यंतिकं प्रलयं कृतीशाः वदंति ॥ ननु कर्म्मणां अनंतत्वा
त् अनिवृत्तिर्न संभवति ॥ तेषां च भोगैकनाश्यत्वेन पुनरुत्पत्तेः निरोद्धुमशक्यत्वात्
इत्यत आह ॥ ज्ञानेति ॥ किंभूताः योगिनः ॥ ज्ञानाग्निदग्धाऽखिलपुण्यपापाः ॥
ज्ञानं आत्मज्ञानं साक्षात्कारेत्यर्थः ॥ तद्रूपमग्निः ॥ तेन दग्धानि भस्मीकृतानि अखिला
नि समग्राणि पुण्यानि पापानि च यैः ते ॥ एतदुक्तं भवति ॥ ज्ञानरूपाग्निना दग्धाः
अखिलपुण्यपापा यैरेतादृशा योगिनः ॥ तथा च ॥ ज्ञानेन प्रारब्धकर्मातिरिक्तकर्म्म
णां भोगाऽभावेपि नाशसंभवादिति निवृत्तिसंभवस्तेन कारणाऽभावादेव कार्याऽनुपपत्ते
चेकारोऽन्यउक्तातिरिक्तः पंचमप्रलयो नास्तीति सूचकः ॥ महाप्रलयश्चसर्वजंतूनां मुक्तिः

x तद्रूपो योगिनः = कृ॰ ५ पं॰

83

अतः नामस्तेषां भूतानां लयेपि पूर्वार्जितसदसत्कर्मसमूहस्य संपूर्णरूपस्य सत्वात् तत्तत्कर्मभोगार्थं पृथक् प्रकृतेर्विकारैः क्रियंते इत्यर्थः = ग्रं

अथ तृतीयलयभेदं विशेषांतरं चोपजातिकयाह ॥ मू ॥ ब्राह्मात्यये यत्र प्रकृतिं प्रयांति सर्वे एवतः प्राकृतिकं कृतीन्द्राः ॥ लीनान्यतः कर्मपुटांतरत्वात् पृथक् क्रियंते प्रकृतेर्विकारैः ॥ ६४ ॥ टी ॥ ब्राह्मात्यये नाम ब्रह्मणः शतवर्षावसाने ब्रह्मणो नाशे संक्षीणभूतानि यत् यस्मात्कारणात् प्रकृतिं प्रयांति प्रकृतिं गच्छंति प्रकृतौ लीनानि भवंति ॥ इत्यर्थः ॥ अतः कारणात् ईदृशं प्रलयं अवांतरभेदेन कृतीन्द्राः तत्वाभिज्ञश्रेष्ठाः प्राकृतिकं वदंति इति पूर्वश्लोकोक्तं अन्वयनीयं ॥ ननु प्रलयानंतरं जीवानां अनैश्यत्वात् पुनः सृष्टिसंभवः कथमित्यत आह ॥ लीनानीति ॥ यदा भगवान् सिसृक्षुर्भवति ॥ तदा लीनानि यानि भूतानि तान्येव भूतानि प्रकृतेर्विकारैः कर्मपुटांतरत्वात् पृथक् क्रियंते ॥ नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ न ह्यात्मनो भवति कर्मफलोपभोगः कायादिनेत्यादि ॥ अस्मिन् प्रलयेऽपि वा लोयाः भुवो नाश इत्यर्थः ॥ ~~६४~~ ॥ एवं ब्राह्मलये यथा क्षीणपुण्यपापाः लोकाः कर्मपुटांतरत्वात् स्वतः निःसरंति ॥ तथा दैनंदिनप्रलयेपि जंतवः स्वकर्मवशेन अस्मिन् लोकेऽधितिष्ठंति ॥ तत्कर्मनाशात् ते पुनः पृथिव्यां कर्मांतरवशात् उत्पद्यंते ॥ अस्मात्पुनः

अतः प्रलयानंतरं

वाक्येः = ४

१३२९८ × १०५० ग्या = ३४६२९०० + ७१४ = ३४६३६१४ पृष्ठफलं ·
१·४० × ग्या १०५० = ४२००० + ८४० = ४२८४० ÷ ६ = ७,१४ शालिविशेषः = ३
१·४८ × ग्या १०५० = ५०४०० ÷ ६० = ८४०

? इन्द्रपदेन चतुर्दशा १४ प्रसिद्धाः ३

रसवेदगुणमितं · ३४६३६१४ पृष्ठफलमुक्तं · ॥ नत्वन्यत् ॥ तथाहि · ॥ नगेषु पर्वतेषु ·
साधकः = २ शिलीमुखः वज्रः निपततीति यस्य सः · नगशिलीमुखः · ॥ पर्वतशत्रुः इन्द्र इत्यर्थः ॥ वाणात्
भवतीति वाणभूः ॥ वाणभूश्चासौ जंगमश्च इति वाणभुजंगमः स्वामिकार्त्तिकः ॥ वाणभु
जंगमस्य ज्वलनं मुखं · इति वाणभुजंगमज्वलनं ॥ देवमुखत्वेन वन्हेः प्रसिद्धेः ॥ स्वामिकार्त्ति
कस्य देवताऽवगमार्थं मुखवाचकं ज्वलनपदं लक्षणया दत्तं · ॥ तस्य षडाननत्वेन
प्रसिद्धेः षट् संख्या · ॥ वन्हिरसेतियथाश्रुतं · ॥ इषुवत् गच्छतीति इषुगो वायुः · ॥ इषुगात्
जातः इति इषुगजः मेघः ॥ धूमज्योतिः सलिलमरुतां सन्निपातो हि मेघः इति कालीदासो
क्त्या पंचमहाभूतमयत्वेन तत्र वायोरधिकभागत्वात् ॥ मेघपदेन सप्तदशसंख्या · प्रसिद्धा ॥
तया गुणितौ अश्विनौ द्वयमिति · मध्यमपदलोपी समासः तत् इषुगजाश्विनश्चतुस्त्रिंशत् ॥
अतो दुष्टं कंदुकजाले पृष्ठं वदत्यादि लयश्च तुर्द्धे स्यतं ग्रंथो व्यर्थ इत्याकूत्तन्नः ॥ पदा
र्थानामसंगतत्वात् · वाणभू जंगमेति दीर्घत्वापत्तेश्च ॥ ६५ ॥ अथ पूर्वोक्तभावादिसंख्या
नोपसंहारव्याजेन ब्रह्मांडगोलं वसंततिलकयाह ॥ मू ॥ भूभूधरत्रिदशदानवमानवा
द्यायेयाश्च धिष्ण्यगगनेचरचक्रकक्षाः ॥ लोकत्रयं च स्थितिरूपयुपरि प्रदिष्टा ब्रह्मांडभांड
जठरे तदिदं समस्तमिति ॥ ६६ ॥ श्रीरस्तु ॥ श्रीः ॥

शाकपार्थिवादीनामु
त्तरपदलोपो वक्तव्य इति
शाकपार्थिवादीनां मध्य
स्थितगणत्वात् · गुणि
ताविति मध्यमपदस्य
~~लोपत्वात्~~
लुप्तत्वात् = गु ५ पं ·

॥टी॥ तत्र इदं प्रतिपादितं समस्तं भुवनादिकं। ब्रह्मांडभांडजठरे। नाम। ब्रह्मांडगोललक्षणं
यत् भांडं तस्योदरे। नाम। तस्य मध्येऽस्तीत्यर्थः ॥ तत्किं। इत्यपेक्षायामाह ॥ भूर्भूधरेति ॥
भूर्भूमिः ॥ भूधराः पर्वताः ॥ त्रिदशाः देवाः ॥ दानवाः ॥ मनुष्याः ॥ आद्यपदात्सिद्धोरगाः ये
उक्ताः ॥ पुनः याः धिष्ण्यगगनेचरयोश्चक कक्षाः ॥ नक्षत्राणामाश्रयभूतं चक्रं मूर्तीगोलः
गगनेचराणां ग्रहाणां कक्षा। उपर्युपर्यवस्थानमाकाशे। ॥ च समुच्चये ॥ उपर्युपरि। नक्षत्र
संस्थानोपरि। यथाक्रमं लोकव्यवस्थितिः ॥ खे महः स्या जनो तो नस्यानल्पैः स्वेस्तपैः सत्यमं
त्य ॥ इत्यनेनोक्ता। या। एतत्सर्वं समस्तं भुवनादिकं। ब्रह्मांडभांडजठरेऽस्तीत्यर्थः ॥ ६६ ॥
अथ प्रसंगात्। ब्रह्मांडगोलपरिधिमानं ग्रहार्थं मध्यमाधिकारांतर्गतकक्षाध्यायादिभूतं
शार्दूलविक्रीडितवृत्तेनैवात्राऽनुवदति ॥ मू ॥ कोटिघ्नैर्नखनंदषट्कनखभूभूभृ
द्भुजंगेन्दुभिर्ज्योतिःशास्त्रविदो वदंति नभसः कक्षामिमां योजनैः ॥ तद्ब्रह्मांडक
टाहसंपुटतटे केचिज्जगुर्वेष्टनं केचित्प्रोचुरदृश्यदृश्यककगिरिं पौराणिकाः ।
सूरयः ॥ ६७ ॥ टी ॥ अथ यन्मार्गेण एते ग्रहा गच्छंति। तन्मार्गानुमितमाकाशस्य कक्षा
नां योजनात्मकमध्यममानेयत्। तस्यैव स्वरूपं खकक्षा प्रकारांतरेण ग्रहान्तर्यनोपयो
गिकां कोटिघ्नैर्नखनन्देत्याद्युक्तं कैरेभिः १८७१२०६९२ .... योजनैः मिता इमां

ब्रह्मांडं नभसः कक्षां खवघ्नकोटि ज्योतिः शास्त्रविदोगण
काः पर्यंतं रसतत्त्वसंख्यकलकोटि उक्तं ॥ एतद्वै ॥

४ प्रदिष्टा नाम उ =

४ कल्पे = ३

५ राजा उपजीव्यः ॥ नौकर उपजीवकः ॥
भगणरूपपन्नः भगणोपपन्नः ॥ भगणोपजीवकत्वात्
५ नाम ॥ भगणोपपन्नत्वात् इत्यर्थः ॥ श्रीरङ्गः ॥ २

॥ खव्योमखत्रयखसागरषट्कनागव्योमाष्टशून्ययमरूपनगाष्टचंद्राः इति सूर्यसिद्धां
तोक्तखकक्षामानेन १८७१२०८०८६४०००००० विसंवादेपि भगणोपजीवकत्वान्न क्षतिः
तथा च ब्रह्मगुप्तोक्तवाक्यं ॥ अंबरयोजनपरिधिः शशिभगणाः शून्यखखजिनाग्निगुणा
इति ॥ सिद्धांतशेखरेपि ॥ घ्नं कर्तुं खेनागध्नतिप्रमाणः कक्षां वरस्याऽर्बुदयोजनघ्नीति
॥ ननु परममहत्त्वपरिमाणस्याऽऽकाशस्य मध्यविधमानाऽसंभवादिदमसंगतमित्य
तस्तत्समाधानरूपैर्मतांतरैः आह ॥ तदिति ॥ यदेतदाकाशपरिधिमानमुक्तं तत्
तन्मितं ब्रह्मांडमेव कटाहसंपुटं ॥ कुतः ॥ कटाहद्वितयस्यैव संपुटं गोलकाकृति
रिति सूर्यसिद्धांतोक्तेः ॥ तस्य ब्रह्मांडस्य तटे नाम संधौ वेष्टनरूपां परिधिं योगिणि
काः केचित्सूरयः जगुः ऊचुः ॥ तथा च ॥ गोलाकारब्रह्मांडाऽवच्छिन्नाऽऽकाश
परिधिमाहुः ॥ द्वितीयमतमाह ॥ केचिदिति ॥ केचित्पौराणिकाः सूरयोऽदृश्यदृश्य
कगिरिं प्रोचुः ॥ पश्चिमपूर्वदिक्स्थलोकालोकपर्वतयोर्दक्षिणोत्तरदिशि मिलनात्
तदवच्छिन्नाकाशपरिधिं लोकालोकेन वेष्टितमिति सूर्यसिद्धांतोक्तेः ॥ लोकालोकश्च
कवाल इत्यभिधानाच्चाहुः ॥ तथा च तद्वाक्यं ॥ हिरण्यगर्भाण्डकटाहसंपुटं प्रवेष्टनं तच्च वभा

शिरे बुधाः ॥ स्वदृश्यदृश्यं च कृतिं पुरातना जगुः
खकक्षामिति गोलवादिन इति ॥ एतन्मते नोक्तं
॥ षइतिभावः ॥

55

तथा च ॥ ज्योतिर्विद्ऽभिमतखकक्षैव ब्रह्मांडगोलपरिधिमानमितितात्पर्यार्थः ॥ ९७ ॥ ननु
ब्रह्मांडे लोकालोकपर्वते च वाह्यांतर्गतपरिधिद्वयसंभवात् कस्येदं मानमित्येतन्मतेपि
संशयग्रस्तत्वमित्यत एतन्मतद्वयपरिष्काररूपमतांतरमर्थयाह ॥ करतलकलिता
ऽऽमलकवदमलं सकलं विदंति ये गोलं ॥ दिनकरकरनिकरनिहततमसो नभसः स परि
धिरुदितस्तैः ॥ ९८ ॥ टी ॥ तैः पौराणिकैर्गणकैः सः उक्तांकमितः तस्य नभसः परिधिरुक्तः
तस्य कस्य ॥ दिनकरकरनिकरनिहततमसो नभसः ॥ सूर्यकिरणसमूहेन विध्वस्तां
ऽ तैर्कैः = ६ धकारस्य नभसः ॥ अत्रमानमाह ॥ करतलेऽ ग्रहस्ते कलितो गृहीतो यो आ
मलकः धात्रीफलं तद्वत् अमलं निर्दूषणं गोलं नाम ब्रह्मांडगोलं सकलं संपूर्णं
ये विदंति जानंति तैरित्यर्थः ॥ एताद्दशोक्तिरेव मानमाप्तवाक्यत्वादिति भावः ॥ त
था च ॥ सूर्यकिरणगमनविषयाकाशावछिन्नगोलस्य परिधिमंगीकुर्वंति ॥ तेन
ब्रह्मांडे लोकालोकपर्वतेपि किरणावछिन्नत्वेन नोक्तदोषः ॥ यत्तत्रतदंतर्वर्तिनिए
वार्करश्मय इति ॥ तद्वाक्यं च ॥ श्रीधीवृद्धिदे ॥ भवतियोजनमानमहर्पति ॥ द्युति
युतो नभसः परिधेरिदम् ॥ इति ॥ ब्रह्मांडकुंडमध्यगास्तिमिदमखिलं यत्कीर्तितं क्र
मशः ॥ तस्य परिधिः खकक्षा लोकालोकोपि च स उक्त इति लल्लेनापि स्पष्टमुक्तम् ॥ ९८ ॥

ᳵ तमेवमुत· = १गु· २पं·

॥ अथ ब्रह्मांड मानस्य स्वमतेनाऽनुक्ति दर्शनात्· प्रसंगात् स्वकक्षाभिप्रायं स्वमतेन पूर्वमुक्त मपि पूर्वमत दूषणपूर्वकं अत्रेन्द्रवज्रया नुवदति ॥ मू· ॥ ब्रह्मांडमेतन्मितमस्तु नोवा कल्पेग्रहः क्रामति योजनानि ॥ यावंति पूर्वै रिह तत्प्रमाणं प्रोक्तं स्वकक्षाख्य मिदं मतं नः इति ॥ ६८ ॥ टी· ॥ ब्रह्मांड मेतन्मितं· स्वकक्षायोजनमितं· अस्तु· नो वास्तु· ॥ नास्तु लोकालोक पर्वततो पेतद्युपेक्षणात् ॥ अत्रास्माकं नाऽऽग्रहः ॥ कुतः ॥ ग्रहसम्बन्धा भावेनोपपत्तिमदाऽऽगमप्रमाणाऽभावात् ॥ स्वयं उपपत्त्या स्वकक्षामाह ॥ कल्पेति ॥ ग्रहः कल्पे नाम· कल्पाऽवच्छिन्नकाले· यावंति· नाम· यन्मितानि योजनानि· क्रामति नाम· स्वशक्ति व्यापारेण पूर्व गत्या भुनक्ति· तत्प्रमाणं· ग्रहगमनेन· कल्पावच्छिन्न काले योजन भोगमाने· इह गणित स्कंधात्मक ज्योतिः शास्त्रे· स्वकक्षाख्यं· आकाश परिधि वाच्यं· पूर्वैः नाम· विष्णुधर्मोत्तर पुराणकारादिभिः प्रोक्तं· इदं मतं· नाम· युक्तियुक्तं = युक्तियुक्तमेतन्मतं· नः अस्माकं ब्रह्मगुप्तादीनां प्रतिभाति ॥ ग्रहसंबन्धोपपत्त्या प्रमाणत्वात् ॥ एवं च ॥ कल्पाऽवच्छिन्नकाले ग्रहभुक्तानि योजनानि ॥ तदवच्छिन्ना

ब्रह्मांड मितं मानं ज्ञेयं· अथवा ॥ (ब्रह्मांडमाने ऽभ्युपगम्यमाने कल्पयोजनग्रहणं युक्तं ॥)

विष्णुधर्मोत्तरांतर्गतब्रह्मसिद्धांते उक्तं ॥ अष्टशून्यानियमनवरसस्वरविमुनिवसुनिशाकराः १८७१२०६९२........ सर्वग्रहाणां भ्रमणस्य मानानां योजनात्मककल्पेति ॥ अस्योपपत्तिः मरीच्यामप्युक्तं ॥ अस्माभिर्विस्तरभयान्नोपपादिताऽतः ॥ अग्रे चन्द्रग्रहणाधिकारस्याऽवसरे वयमपि प्रतिपादयिष्यामः ॥ इत्यलम् ॥ अथ पृष्ठफलस्याऽऽनयनोपपत्तौ भास्कराचार्यैः स्वप्रतिपादितभाष्ये पाटिसूत्रं प्रतिपादितं ॥ तच्चाग्राह ॥ तथा चोक्तमस्मत्पाटीगणिते ॥ वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं यत् तुल्यं वेदैरुपरिपरितः कंदुकस्येव जालं ॥ गोलस्यैवं तदपि च फलं पृष्ठजं व्याससनिघ्नं षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यमिति ॥२॥ गोलपृष्ठफलस्य व्यासगुणितस्य षडंशो घनफलं ॥ अत्रोपपत्तिः ॥ गोलस्य व्यासार्धतुल्यानि दैर्घ्याणि सूच्याकाराणि सूच्यग्राणि चतुःकोणदैर्घ्याणि मूर्ध्नि एकहस्ततुल्यविस्तृतिदैर्घ्याणि कृतानि खंडानि पृष्ठफलसंख्यामितान्येव भवंति ॥ एवं विधैकखंडस्य मूर्ध्नि क्षेत्रफलं रूपमेव पुनः खंडस्य दैर्घ्यं व्यासार्धतुल्यं अतो व्यासार्धमितो वेधः खंडस्य वेध इति सिद्धम् ॥ खंडस्य क्षेत्रफलं मूर्ध्नि रूपमितं तदर्धेन गुणितं $\frac{१}{२} \times \frac{व्या}{२} = \frac{व्या}{२}$ जातमेकस्मि

क्षे. फ. घ. फ.

(घनफलं जातं)

अत्र हरस्य छेददलयोः परिवर्तनाज्जातं स्वरूपान्तरं ॥ (गो.) $\frac{\text{घ.फ.}\times\text{व्या}}{२}\times$ (हर.) $\frac{१}{३}=$ (गो.) $\frac{\text{घ.फ.}\times\text{व्या.}}{६}$

अतो पपन्नं गोलपृष्ठफलस्य व्यासगुणितस्य षडंशो घनं फलम् ॥ सूच्यग्राणां गोल १८ इति = २

गर्भसंपातात् ॥ व्यासार्धमितं सर्वेषां खण्डानां वेधः ॥ यत्पुनः क्षेत्रफलमूलेन क्षेत्रफलं

गुणितं घनफलं स्यादिति तत्राय श्चतुर्वेदाचार्यः परमतमुपन्यस्तवान् ॥ इत्यलम् ॥

अथ समखातस्यांशः सूचीखातफलमस्योपपत्तिसुमत्कृतपाटीगणिततोपपत्तितो द्रष्टव्यम् ॥

आसीज्ज्वालामुखीक्षेत्रे शालिग्रामेति विश्रुतः ॥ तेनापि संगृहीतेयं टीका मयूखमालिका ॥१॥

१८ सुज्जनाः = ७ मयूखमालया सार्द्धं ये पठिष्यन्ति बालकाः ॥ तेषां शिरोमणिः कंठे मुक्ताहारो भविष्यति ॥२॥

मयूखमालाप्यतिसंक्रमेण कृता मया बालहितार्थदा सा ॥ बुधाः सुधाब्धौ खलु मज्जने ये

प्रहृष्टचित्ताः पठने समर्थाः ॥३॥ ते बुधाः अस्याः पठने समर्थाः स्युरित्यर्थः ॥ द्व्यब्ध्यंकेन्दु १९४२

मिते वर्षे विक्रमादित्यसंज्ञके ॥ आश्विनस्य सिते पक्षे चाष्टम्यां बुधवासरे १ समाप्तिं गतिं गोलस्य

१ चिता = ३ टीका मयूखमालिका शालिग्रामेण विख्याता जम्बूक्षेत्रनिवासिना २ गणकानंदसंतुष्ट्यै शिष्या

णां बुद्धिवृद्धये ॥ पश्यन्तु सज्जनास्ते तु ये सिद्धान्ताभिमानिनः ३ इति श्रीवात्स्यायनमुनिकुलो


त्पन्न श्रीसारस्वतद्विजश्रीकृष्णानन्ददैवज्ञात्मजशालिग्रामविरचितायां सिद्धान्तशिरोमणि

टीका मयूखमालायां भुवनकोशाध्यायः समाप्तः ॥

॥ संवत् १९४२ आश्विन प्र॰ २ शुभमस्तु ॥ श्रीरस्तु ॥

श्रीः
५८

57


सिद्धान्तः
शिरोमणौ गोलाध्याये भुवनकोशा
ध्यायः समाप्तः ॥ शुभम् । श्रीरक्त
मयूखमालया सार्धं ये पठन्ति
शिरोमणिं ॥ ते बुधाः शिरोमणयः
सौधीर्मयूखैः सह
॥ राजते ॥१॥

शिव:
५८

श्रीगणेशायनमः ।। श्रीशारदायैनमः ।। नत्वाश्रीगुरुपादपद्मयुगलं ध्या
त्वातुवागीश्वरीं तेषांपादसरोरुहस्मरणतोलब्ध्वाचबुद्धेर्लवं ।। सत्सिद्धान्तशिरो
मणेर्लघुतरांटीकांतमध्वंसिनीम् शालिग्रामसुधीहितांप्रकुरुतेशिष्यार्थसंदी
पिकाम् ।।१।। मरीचिकाशिरोमणेरुक्ताविवृत्तायतोमुनीश्वरेरतोमयामयू
खमालिकाकृतानविलोकयिष्यतेयदाबुधस्तुमामिकांकृतिंतदानकिंप्रसन्न
चित्तलोचनोभविष्यति ।।२।। अथसंसिद्धान्तघुगणतद्युगादिभगणैःखेटानुपातेन
यःस्यात्तस्यास्फुटताकथमित्यादिप्रश्नोत्तरभूतमध्यमगतिवासनाऽध्यायोव्या
ख्यायते ।। तत्रमूलभूतभचक्रचलनकारणत्वेनवायुविशेषंविवक्षुःप्रथमंवायुभे
दान्वसंततिलकयाह ।। मू ।। भूवायुरावहइहप्रवहस्तदूर्ध्वःस्यादुद्वहस्तदनुसंवह
संज्ञकश्च ।। अन्यस्ततोपिसुवहःपरिपूर्वकोस्माद्बाह्यःपरावहइमेपवनाःप्रसिद्धाः ।।१
टी ।। इह नाम ब्रह्माण्डगोलान्तर्ब्रह्माण्डगोलमध्येइमेसप्तसंख्याकाःपवनाःनामप्रसिद्धाःगो

स्फुटा=५

।। इमेके ५ तत्राह ।।
लोकाराः प्रसिद्धाः ७ राल्लोकाः ।। भूमेरभितो भूवायुगोलः
भूवायुः ।। भूसंबन्धात् ।।
।। प्रथममरुत्स्थः ।।

१ (श्री: ५८)

यतो भूवायुः समंतादहत्यतो भूकंपोपि कदाचिन्न भवति लोके प्रतीयते॥ तल्लक्षणं च॥ भूम्यां वहन्ति प्रदेशेषु सन्ति रंध्राणि तेषु प्रविष्टात्कुवायोः॥ भूम्यां जलस्यापि संयोगहेतोः वाईत्वभावात् भवेत् भूप्रकंपः १ ज्वालामुखीनिवासी शालिग्रामाभिधानदैवज्ञः॥ कल्पितवानिममर्थं बुधाः सम्यग् विचार्य कुर्वन्तु॥

(उ॰ २ पंक्तिः॥)

ननु वायोश्चलत्वात्स वायुः कथं वातीत्यत आह॥ आ समंतात् वहतीत्यावहः॥ सर्वदिक्संचारी अनियतगतीत्यर्थः॥ केचिदाचार्यैः॥ भूमेर्द्वादशयोजनेषु वसति द्रमा वायुरंबुदास्तदावहसंज्ञका प्रवहइत्यस्मात्पश्चात्तगतिरित्यनेन भूवायुरावह इति वायुद्वयमुक्तमिति तच्चिंत्यम्॥ तदूर्ध्वं नाम भूवायोः सकाशादूर्ध्वं प्रवहः गोलरूपो द्वितीयोस्ति॥ तदनु नाम प्रवहात्तदनुपश्चात् ऊर्ध्वमित्यर्थः॥ अर्थात् प्रवहादूर्ध्वं उद्वहो गोलाकारो वायुस्तृतीयः॥ च पुनः उद्वहवायूर्ध्वं संवहसंज्ञो वायुगोलश्चतुर्थः॥ ततोपि नाम संवहादूर्ध्वं अन्यः पंचमो वायुगोलः सुवहसंज्ञः॥ अस्मात्सुवहादूर्ध्वं परिपूर्वको वहशब्दः॥ परिशब्दः पूर्वं यस्य एतादृशो वहः शब्दः संज्ञावान् तेन परिवहः षष्ठो वायुगोलः॥ परात्परं वहः सप्तमो वायुगोलः उक्तवायुभ्यो वाह्यः नाम ऊर्ध्वस्थः॥ अनेनास्मात्परं वायुगोलो नास्तीति सूचितं वाह्यशब्देन॥ स्यादावहः प्रवहउद्वहसंवहो च स्यात्सुवहः परिवहश्च परावहश्च स्कंधाः क्रमेण मरुतामिह सप्तसंख्या विश्वंभरा पवनमावहमाहुरेके॥ इति श्रीपत्युक्तेः॥ अथ द्वितीयवायोरादिज्ञानार्थं प्रथमवायुगोलस्य

५८ (१)

मू.॥ भूमेर्बहिर्द्वादशयोजनानि भूवायुरत्राम्बुदविद्युदाद्यं ॥ तदूर्ध्वगो यः प्रवहः स नि
त्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था ॥२॥ टी.॥ भूमेः नाम भूगोलादभितो बहिर्द्वादश
योजनानि नाम द्वादशयोजनपर्यंतं भूवायुरावहाख्योऽस्ति ॥ एतेन वायुगोल
स्याऽस्ति बाह्यपरिधिर्भूगर्भतो भूव्यासार्धयुतद्वादशयोजनरूपव्यासार्द्धेन रित
इति सूचितं ॥ तथोक्तं ॥ शराद्रिरामानल ३३७५ योजनानि भूवायुकक्षा कथिता
पृथिव्याः ॥ समुद्रशैलांबरशीतभासस्तदीयविष्कंभमुशंति संत इति लल्लोक्तेः ॥
अत्र नाम भूवायौ अंबुदाः मेघाः विद्युत् आद्यशब्दात् इंद्रधनुः गंधर्वनगरं क
रकादिनि ॥ गृह्यंते ॥ एषां लक्षणानि मरीचौ प्रसिद्धानि ॥ तत्र विश्वरूपैः प्रतिपादि
तानि च सम्यक् ॥ अतो मया ग्रंथविस्तरभयान्नैव संगृहीतानि ॥ अथैते मेघाद
योऽनियतगतिकाः सं॰ति ॥ भूवायावेव तिष्ठंति ॥ तदूर्ध्वं चेदेषां मेघादीनां स्थितिः स्यात्त
ग्रहनक्षत्राणां मेघाच्छन्नत्वाऽनुपपत्तिः स्यादतो भूवायौ तिष्ठंतीत्युक्तं युक्तमेव ॥ तदूर्ध्वगः
नाम भूवायोरूर्ध्वं यः गच्छति स प्रवहाख्यो द्वितीयो वायुः नित्यं अनवरतं प्रत्यग्गतिः प
श्चिमाभिमुखसंचारी ॥ सोऽनियतगतिको न भवतीत्याह ॥ तस्येति ॥ तस्य प्रवहस्य मध्य

॥अथ प्रकृतं मूलभूतभचक्रनित्यभ्रमणमुपजातिकयाह॥ मू॥ नक्षत्रकक्षाखचरैः समे
तो यस्मादतस्तेन समाहतोऽयं ॥ भपंजरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन॥ ३॥
टी॰॥ यस्मात्कारणादयं भपंजरः नक्षत्रकक्षाखचरैः समेतः नाम युक्तोस्ति॥ अतः नाम अ
स्मात्कारणात् तेन प्रवहानिलेन समाहतः सन् नाम अतिप्रदेशं प्रवहवाय्वाऽऽघातेनोव
रः सन् अयं प्रत्यक्षः भपंजरः नाम भानां नक्षत्राणां अधिष्ठानार्थं पंजरः पात्रं भौतिको गो
लाकारः मध्याकाशात्मकः नीलरूपः ब्रह्मनिर्मितः॥ अजस्रं अनवरतं भ्रमति॥
किंभूतोऽयं भपंजरः॥ खेचरचक्रयुक्तः॥ इति॥ समाहतः यस्मादत्त स्तस्य पंजरस्या
ऽऽधारोपि प्रवहवायुरित्युक्तं तद्दिनाऽवस्थानेऽप्यऽहतिः॥ ननु भपंजरस्य वोऽह्याघा
तात् भ्रमणसंभवेपि ग्रहाणां भ्रमणं कथं अत आह॥ खेचरचक्रयुक्त इति॥ खेचराणां ग्रहा
णां चक्रं समूहः सप्तग्रहाः तैर्युतः॥ तथा च॥ प्रवाहाघातेन पंजरस्य भ्रमतीति न अपि
तु ग्रहा अपि भ्रमंतीति भावः॥ ननु भपंजरेण ग्रहाणां संबन्धाऽसद्भावात् भपंजरभ्रमणेनैषां
भ्रमः॥ किंच नक्षत्रपंजरयोर्भिन्नत्वात् पंजरभ्रमणे भभ्रमणं च कथमुपपन्नं अत आ
ह॥ नक्षत्रकक्षाखचरैरिति॥ यस्मादयं पंजरः नक्षत्राणि कक्षाक्रमेण खचराश्च ऊर्ध्वो
र्ध्वक्रमेऽधोधः क्रमेण कक्षाश्रेण्यारूढैः तैः समेतः युतः॥ तथा च नक्षत्रपंजरयोराधे

के चित्तु॥ नक्षत्राश्रय मूर्तं पंजरकल्पनेनाऽभावात् गोरवाञ्चेदमुपेक्ष्यं॥ यस्मात्प्रवहा वायुर्नक्षत्रकक्षाख चरैः समेतोऽतस्तेन प्रवहानिलेन समाहतो भपंजरः खेचरचक्रयुक्तोऽजस्रं भ्रमतीत्यर्थो नक्षत्राणि तदधःस्थाग्रहाश्च प्रवहवाय्वाऽऽधाराणि प्रवायुनास्व स्वस्वमार्गे भ्रमंति॥ तदेवस्फुटं ... इत्याकृत्तन॥ स्पष्टाभ चक्रमित्यादिनाग्रन्थपूर्वोर्द्ध भचक्रस्य वायोस्थापनोक्त्या नक्षत्रकक्षाख चरैः समेतस्य अनुरक्तत्वापत्तेः॥ तदनंतरोक्तु तथा ध्रुवत्वे इति ग्रंथपूर्वार्द्धोक्तस्य यथार्थत्वापत्तेश्च॥ इत्यलं॥ विस्तरांस्तु मरीचौ द्रष्टव्यः॥ अथाश्विनीस्थग्रहस्य कालांतरे भरण्यादिस्थत्वदर्शनाऽन्यथानुपपत्त्या वैततो परा शाभिमुखं भपंजरे इत्यादिनोक्त ग्रहपूर्वगतिरसंगता प्रत्यक्षत्वाऽभावात् इत्यतस्तामुपपा तिकयाह॥ मू॥ यांतो भचक्रे लघुपूर्वगत्या खेटास्तु तस्यापरशीघ्रगत्या॥ कुलालचक्र भ्रमिवामगत्या यांतो न कीटा इव भांति यांत इति॥४॥ टी॥ खेटाः ग्रहाः तस्य भपंजरस्य अपरशीघ्रगत्या नाम पश्चिमदिगभिमुख प्रवहवायुप्रेरित द्रुततरगत्या यांतः गच्छंतः संतः ग्रहाः भचक्रे नाम भपंजरपरिधिविशेषरूपकक्षावृत्तात्मके लघुपूर्वगत्या नाम अपर गतेरतिन्यूनभूतया पूर्वगत्या कक्षावृत्तैकदेशप्रदेशेन यांतः गच्छंतोपि न भांति॥ नाम

कुलालचक्र भ्रमिवामगत्या यांतो न कीटा इव पूर्वदिगभिमुखगमनकर्माश्रया ग्रहा इति प्रतीतिः प्रत्यक्षतो लोकानां न भवतीत्यर्थः॥ तुकारान्नक्षत्राणां पूर्वगतिर्नेह वक्तास्तीति सूचितं॥ श्रीः॥ श्रीरस्तु॥ श्रीः॥

५ सौरदर्पयति=५

१ घटनिर्मापकस्य यत्न=२

ननु वस्तुतः ग्रहाः स्वशक्त्या पूर्वस्मिन्यांति· तत्र· यथा पश्चिमगमनं प्रत्यक्षतो दृश्यते तथा पूर्वगमनस्यापि प्रतीति लक्षणं दर्शनापत्तिः स्यादित्यत आह ॥ कुलालेति ॥ दृष्टान्तोऽयं दार्ष्टांतिको
तकः ॥ तेन· यथा कुलालस्य घटोत्पादकं चक्रं तस्य चक्रस्य यो दंडजनितो भ्रमः ना
म· भ्रमणं· यद्दिगभिमुखं भवति· तस्माद्वामगत्या· नाम· तस्माद्विपरीतदिगभिमुखेया गतिः
चक्रपरिध्यंशरूपा· तया· गत्या· यांतः नाम· स्वव्यापारात्गच्छंतः कीटाः पिपीलिकाद्यः
अणुरूपा जंतवः न भांति· ॥ कुलालचक्रस्य भ्रमेः सकाशात् वामगत्या· अनु पश्चात् यां
तोपि कीटाः ~~न भांति~~ तदपि· चक्रभ्रमानुकारमिव यांतः भांति· तथा ग्रहा अपि पूर्वदिशि
स्वशक्त्या गच्छंतोपि· प्रवहप्राबल्यात्पश्चिमदिश्येव गच्छंतीति भांति इत्यर्थः ॥ किमगमा
नमिति चेन्न ॥ कुलालचक्रे भ्रमप्रागभावे यत्र कीटस्थानं तत्र चिन्हं कृत्वा पुनः भ्रमवि
रतौ कीटदर्शनं तत्रैव भवतीति न· किं तु· भ्रमविपरीतदिशि तच्चिन्हात्कियता तरेण
भवतीति प्रत्यक्षप्रमाणात् ॥ चंद्रद्युति रिक्ताः सर्वे ग्रहाः तेजसाः ॥ चंद्रस्तु जलो
मयः ॥ इत्यादि निर्णयार्थं मरीचिर्द्रष्टव्या ॥ विश्वरूपकृता यत्तु विस्तरभयान्नात्र सं
गृहीतास्ते ॥ अयोजनाऽभावाच्च ॥ इत्यलं विस्तरेणेति ॥ १४ ॥ अथ ननु ग्रहाणां प्रत्यहं

॥ टी ॥ अस्मिन्क्षितिजस्थे दिने यत्र सूर्यो नक्षत्रस्यादेः स्यात्तद्दिने । भ सूर्यौ किलेति निश्चये
न । समं नाम । समकाले उदितौ । नाम । उदयं प्राप्तौ । पश्चात् । आसां घटीनां षष्ठ्या
नाम । नाक्षत्रषष्टिघटिकाभिः भं नाम । तदेव नक्षत्रं केवलं । पुनरुदितं । रविस्तदा
नीनोदितः ॥ ततः नाम । नक्षत्रद्वितीयोदयकालानंतरं । रविः स्वोदयभुक्तिघातात्
खाभ्राष्टभू १८०० लब्धसमासुभिः मिते काले चकारात् सूर्यः उदितः ॥ यदि पूर्व
तोऽर्को न गच्छेत्तदा पुनरपि भोदयकाले एव सूर्योदयापत्तेः ॥ नक्षत्रदर्शनापत्तेश्च ॥
इति प्रत्यक्षमेव सर्वं गतौ मानमुपलब्धमिति भावः ॥ स्वोदयभुक्तिघातात् नाम । सायं
नसूर्याधिष्ठितराशेः स्वोदयासुकालः । अनः सूर्यस्य तद्दिनजाः याः स्पष्टगतिः
कलाः तयोर्घातादित्यर्थः ॥ पुनरष्टादशशतेन भागहारेण यल्लब्धं तन्मितासुभिः ॥
इत्यर्थः ॥ उदयं प्राप्तौ च । किं । क्षितिजसंयोगाऽऽभासिद्ध्यर्थं न संस्थितत्वं । उदयशब्दार्थः
किलेत्यनेन युगपत् सूर्यनक्षत्रदर्शनस्याऽसंभवोपि युक्त्या तन्निश्चयोऽस्तीति सूचितं ॥
अत्रोपपत्तिः ॥ द्वितीयनक्षत्रोदयकाले सूर्यस्य पूर्वगमनेनाविलंबितत्वान्नोदयः । तदुदय
स्य अवलंबितसूर्यस्य प्रवहानिलाऽऽघातेन यत्कालेन क्षितिजस्थं तत्काले सूर्योदयः न

॥ इत्यलम् ॥ ५ ॥ श्रीकृष्णाय नमः ॥ शुभं सर्वं जगताम् इति ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

स्मिन्नपि काले सूर्यस्य पूर्वं चलनात् सूर्योदयः
दयांतरकाले संबंधि सूर्यपूर्वगति स्पष्टकला
नाम सुभिस्तस्मादुदयः स्पष्टगतेः काशादस्वा

॥ अथैतद्भुक्त्या ऽवगतं यत् सूर्यसावनमानं तमेव प्रमाणिकयन्नाह ॥ मू॰ ॥ समागतासु संयुता
र् वेक्षषष्टि नाडिकाः ॥ स्फुटं द्युरात्रमुक्रमाद्युभुक्तितश्चतच्चलम् ॥ ६ ॥ टी॰ ॥ समागतासु नाम
स्वोदयभुक्तिघातात् इति पूर्वोक्तयुक्त्याऽवगताः येऽसवः नाम स्वस्थचित्तपुरुषस्य ये स्वासाः तैः
संयुताः ये षष्टि ६० नाडिकाः घटिकाः तन्मितं रवेः स्फुटं द्युरात्रं नाम स्पष्टाहोरात्रमानं
स्यात् ॥ तु कारात्त्वंशादीनां अहोरात्रमुक्त रीत्या न भवेदिति भावः ॥ तदुक्तरीत्यवगतं स्प
ष्टाहोरात्रमानं चलं नाम प्रत्यहं विसदृशं ॥ ननु समागतासु योजने नियतत्वात् तच्चलं कुतः
अतश्चलत्वे हेतुमाह ॥ उक्रमादिति ॥ उक्रमात् नाम राश्युदयकालानां अनियतत्वात्
प्रतिदेशभिन्नत्वात् इत्यर्थः ॥ तज्जनितगत्यसवोऽपि भिन्नाः तद्योजने नियतमानं न भवेदि
ति भावः ॥ ननु तथापि निरक्षदेशे मानं त्रिधा स्यादेतु षोढेति नियतमेतन्मानं वक्तुमुचितं य
त आह ॥ द्युभुक्तित इति ॥ दिनगतेः प्रत्यहं विलक्षणत्वात् तज्जनितत्वेनापि प्रत्यहं विलक्षणं
मानं नोक्तरूपेणाऽनियुतं ॥ चकारादेकदिनेऽपि देशभेदेन मानाऽनैयत्यं सूचितं इति ॥ ६ ॥
॥ ननु अहोरात्रस्य षष्टिघटीमितत्वात् एतत्कल्पितमहोरात्रमानं तदऽधिकत्वादित्यत्तः

५ प्रतिदेशं मासं राश्युद
१ याऽनत्वाच =५

तच्छ्रद्धार्थः =५

अतः =८

॥स्तदुत्तरं प्रसंगात्क्षिशेषांतरं चइन्द्रवज्रयाह॥मू॥षष्ट्या घटीनां भदिनं सदा स्त्री
तद्भुक्तितुल्यासुयुतं खरांशोः॥स्यान्मध्यमं सावनमेवमर्के तत्संव्यकाभभ्रमतोनि
रेकाहत्ति॥७॥टी॥स्त्री नाम अत्यह घटीनां षष्ट्या ऽऽ स्त्री भदिनं नक्षत्रदिनं स्या
त्॥नक्षत्रोदयद्वयांतरकालेनाक्षत्रषष्टिघटीमितेपंजरभ्रमणस्योपपन्नत्वात्॥
सदाशब्देन नक्षत्राणां पूर्वगत्यऽभावात् नाक्षत्रमानेन अनियतं नक्षत्रदिनं न भवे
दितिसूचितं॥अतएव तत् षष्टिघटीनां गतिजास्यू ना मध्युदयाधीनत्वात् [illegible]
[illegible] नाक्षत्रषष्टिघटिकामापकेन सह रवेस्तेषांतरयुदयद्वयांतरालरूपं सावनं
दिनं भवति तत्तु षष्टिघटीभ्योधिकं भवत्येवेतिभावः॥ नन्वेवं चेत्तदा॥ नित्यं रविगति
लिप्तासमासुभिः सावनो भाह इतितिलक्ताद्युक्तमसंगतं अत आह॥ तदिति॥ तेन
भदिनं नाक्षत्रषष्टिघटीमितं यत्तत् खरांशोः सूर्यस्य भुक्तितुल्यासुभिर्युतं मध्यगतिकला
तुल्यासुभिर्युतं मध्यमं सावनं स्यात्॥ यद्यपि लक्ताद्युक्तं मध्यमं न भवति तथापि तत्समध्यगत्यु
पपन्नासुबन्धत्वात् मध्यमत्वं युक्तमेव॥ अथ यदि विषुवन्मंडले रविः स्वतोयाति तर्हि विषुवन्मं
डलस्य एका कला एकेनासुना उदेति॥ तदा रविगतिलिप्तासमासुभिरिति वक्तुं युज्यते तत्र
भुक्तं रविः क्रांतिवृत्तेनयाति॥तन्मेषराशिकलाः१८००॥ गगनभूधरषट्चंद्रमितेरसुभिरुद्गच्छंति

62

^ हि सूर्यसावनदिवसाः स्युः ते सूर्यसावनदिवसाः भदिनसंख्या ऊनिताः एकोनाः इष्यंते कृतः =२

॥ तथा च ॥ यदि पूर्वगत्या ऽ भ्रमणं भवेत् तदा न तत्र सूर्ययोः प्रत्यहं युगपत् उदयसंभवात्
यावंतो भदिवसास्तावंतो ~~एकोना सूर्यसावनदिवसाः स्युः~~ चक्रांतरेण सूर्यस्यैकभ्रम
स्या ऽ जायमानत्वात् अतः पूर्वगत्या चक्रभोगकालस्य सौरवर्षोक्त्या यदुक्तं तत्सम्य
गेव ॥ एवं यस्य ग्रहस्य पूर्वगत्या चक्रभोगकाले यावंतो भभ्रमास्तावंतो हि एकोनास्तस्य
ग्रहस्य सावनदिवसाः भवंति इति ध्येयम् ॥ चक्रभोगकाले मध्यगतिं कृत्वा सुभ्रः
स्पष्टगत्यसूनां ह्रासवृद्ध्योस्तुल्यत्वात् चक्रभोगकाले मध्याः स्पष्टाश्च सावनदिव
सास्तुल्या इत्यवधेयम् ॥ ७ ॥ अथ सौरवर्षे सूर्यसावनमासस्वरूपं चेंद्रवज्र
याह ॥ मू ॥ पंचांगरामास्तिथयः खरामाः सार्द्धद्विदस्राः कुदिनाद्यमब्दे ॥ अस्यार्कमासो
कलवः प्रदिष्टस्त्रिंशद्दिनैः सावनमास एव इति ॥ ८ ॥ टी ॥ एकस्मिन् अब्दे नाम सौरवर्षे पंचां
गरामाः नाम पंचषष्ट्यधिकत्रिशती ३६५ मिताः सावनदिवसाः तिथयः नाम पंचदश १५ घ
टिकाश्च खरामाः नाम त्रिंशत्पलानि च सार्धद्विदस्राः नाम सार्धद्वाविंशति २२।३० विपलानि
अर्थात् एतन्मितं कुदिनाद्यं नाम भूदिनाद्यं सूर्यसावनदिनघटीपलविपलात्मकं एकस्मि
न् सौरवर्षे भवंति इत्यर्थः ॥ नियतमेतन्मितं कथं ज्ञातं इति वाच्यं प्रागुक्तकल्पसूर्यसावनदिन
संख्यातोऽनुपातेन एकवर्षे तन्नियतत्वाऽवगमात् ॥ अथ वक्ष्यमाणाधिमासोपपत्त्यर्थं सौ
रमासे सूर्यसावनदिनज्ञानमाह ॥ अस्येति ॥ अस्य नाम सौरवर्षसंबंधिसावनदिनाद्यस्य

नाम द्वादशराशिभोगा
त्मके वर्षे इत्यर्थः =३

^ तच =३

४ अधिमासावमयोः=३

॥ अथ प्रसंगादृष्टमासाऽवमोपपत्त्यर्थं सावनमासे दिनसंख्यामाह॥ त्रिंशद्दिनैरिति॥ सावन
मासः त्रिंशद्दिनः एव॥ अर्थात् सावनमासस्य सावनानां त्रिंशत्ता ३० एव भवति॥ एकैवका
दयुक्तसौरसावनावधिकत्वयवच्छेदः॥ ८॥ अथोभयोरुपपत्त्यर्थं चांद्रमासस्वरूपं तन्मानं सूर्य
सावनदिनात्मकं चेन्द्रवज्रयाह॥ मू॥ कालेन येनैति पुनः शशीनं क्रामन् भचक्रं विवरेण
गत्योः॥ मासः स चान्द्रोऽङ्कयमाः कुरामाः शून्येषवस्तत्कुदिनप्रमाणम्॥ ९॥ टी॥ कालेनेति॥
दर्शान्ते किल शशी रविणा युक्तो भवति॥ ततो द्वावपि पूर्वतो गच्छतः॥ तयोर्मध्ये शशी शीघ्रगत्वात् चंद्रः
४ विवरेण नाम=१ सूर्यचंद्रगत्योरन्तरेण प्रत्यहं सूर्यादधिकगमनेन भचक्रं द्वादशराश्यात्मकं क्रामन् भ्रमन् येन
कालेन इनं प्रति नाम सूर्यं प्रति पुनः नाम द्वितीयवारं शशी नाम चंद्रः एति नाम युनक्ति
अनेन यत्कालं द्वयोर्योगः अर्थात् पूर्वयोगात् द्वितीययोगः येन कालेन भवति स कालः
चान्द्रो मासः॥ सूर्यचन्द्रयोर्भगणान्तरेण चान्द्रमासो दर्शान्तावधिरूप इत्यर्थः॥ अथ चांद्र
मासस्य सूर्यसावनदिनानि मध्यमान्याह॥ अंकयमा इति॥ तत् नाम तस्य चांद्रमासस्य कुदि
नप्रमाणं नाम कुदिनानां सावयवानां प्रमाणं संख्यामानं मध्यमेन (एकोनत्रिंशद्दिवसाः) अंक
यमाः दिवसाः २९ कुरामाः ३१ घटिकाः शून्येषवः ५० पलानीति॥ एतैरर्कसावनदिनैः एको
श्चान्द्रमासो भवति इत्यर्थः॥ अत्रोपपत्तिः॥ भ क्रामन् भचक्रं विवरेण गत्योरित्यनेन गत्यन्तरे
णैकं सूर्यसावनदिनं लभ्यते तदा चक्रांशकलाभिः किमित्यनुपातः सूचित एव॥ अत्रैकचि
द प्यवयवे निःशेषत्वाऽदर्शनादवयवैकदेशास्त्यक्ताः॥
॥ इत्यलं विस्तरेण॥ ९॥ श्रीरस्तु॥ श्रीः॥

श्रीः
६३

63

॥ अथाऽधिमासोपपत्तिमुपगीतिकयाह ॥ मू० ॥ चान्द्रान्नसौरेण हृत्तानुचान्द्राददवाप्तसौरैर्
दिग्नैर्दलाब्धैः ३२।१६ मासैर्भवेच्चान्द्रमसोऽधिमासः कल्पेऽपि कल्प्या अनुपाततोऽतः ॥१०॥
॥ टी० ॥ चान्द्रमासे कुदिनसंख्या २९।३१।५० सौरमासे कुदिनसंख्या ३०।२६।१७।३१।५२।३७
चान्द्रोनसौरेण हृतानु नाम सौरमासकुदिनेभ्यः चन्द्रमासकुदिनेषु शोधितेषु शेषं दिनाद्यं ०।५४।३७
एकस्मिन्सौरमासे इदं सौरचान्द्रान्तरं कुदिनात्मकं जातं २९।३१।५०।०।०।० ३०।२६।१७।३१।५२।३७ युगस्यादे
रुपरि एकस्मिन् दर्शान्ते प्राप्ते एकश्चान्द्रमासः पूर्णः तदन ०।५४।२७।३१।५२।३७ वृषभसंक्रा
नंतरं चतुःपंचाशत् घटिकाभिः सावयवाभिः मध्यमार्कस्य
न्तिस्तत्र द्विमासः पूर्णः ॥ एवं द्वितीयश्चान्द्रमासादनंतरं द्विगुणाभिस्ताभिरेव घटीभिः सावयवाभिः
मध्यमार्कस्य मिथुनसंक्रांतिः ॥ एवं त्रिगुण चतुर्गुणाभिः घटिभिः चांद्रमासादनंतरं कर्कटाद्याः
संक्रांतयो भवंति ॥ एवं संक्रांतिरग्रतोऽग्रतो याति याति पुनः दर्शांतं प्राप्नोति ॥ तदागत चांद्रमा
सेभ्यः सौरा एकोना भवन्ति ॥ यदा संक्रांतिर्दर्शांतमतिक्रम्याऽग्रतो याति तदाऽनुपातेन याव
सौरैः=३ न्तः सौरा भवंति तावद्भिरेकोऽधिमासः ॥ तत्रानुपातः ॥ यद्यनेन सौरचान्द्रान्तरेण कुदिना
त्मकेन ०।५४।३७।३२ एकः सौरो मासो भवति तदा चान्द्रमासान्तः पातिभिः कुदिनैः कियन्तः ॥
इति फलं सौरमासाः ३२।१५।३१।२८।४७ अथवा युगाधिमासैः युगसौरमासा लभ्यन्ते तदा

२९।३१।५० ज्यो० प० २ शिव०
६३

सौरमाससावनदिनादि ३०।२६।१७।३१।५२।३७ — चान्द्रमाससावनदिनादि २९।३१।५०।०।० = ०।५४।३७।३२ शेषं सावनम्

४ मास = ४

॥ एकेनाधिमासेन किमिति ॥ फलमेतावन्त एव सौरमासा लभ्यन्ते ॥ एतावद्भिः सौरमासैरेकश्चान्द्रमासोऽधिको भवति ॥ अर्थात् एतैः सौरैर्मासैश्चान्द्रमसः नाम चंद्रसंबन्धिः अधिमासः भवेत् चान्द्रमसश्चान्द्र इत्यर्थः अधिमासो भवेत् ॥ अतएवाधिमासस्य चान्द्रत्वं ॥ अथाक्षरार्थः ॥ चान्द्रोनसौरेण नाम चान्द्रस्येदं चान्द्रं अर्थात् चान्द्रसावनोनित सौरमाससावनेन मध्यमरूपेणायं क्षेपं ०।५४।३७।३२ तेन हृतात् चांद्रात् नाम चांद्रमाससावनात् अर्थात् चान्द्रमासान्तःपातिसावनदिनानां २९।३१।५० एतदात्मकानामनेन शेषेण ०।५४।३७।३२ हृतात् अवाप्तसौरैर्लब्धैर्दशानैस्तुल्यैः ३२।१६ मासैः सौराख्यैः चान्द्रमसोऽधिमासो भवेदित्यर्थः ॥ मध्यमरूपेणेत्यर्थः ॥ तुकारात्स्पष्टोऽधिमासोऽधिकैर्न्यूनैर्वा भवतीति सूचितम् ॥ अतः नाम उक्तरीत्या अनुपाततः कल्पे अधिमाससंख्या कल्प्या नाम ज्ञेया इत्यर्थः अपिशब्दाद्युगादावपि ॥ सौरवर्षे चान्द्रमासेभ्यः सौरमासाः न्यूनाः तत एको नाभवति अतोऽधिमासस्य चान्द्रत्वं ॥ इत्यलम् ॥ १० ॥ ननु चान्द्रमाससावनात्सौरमाससावनस्याधिकत्वदर्शनात् कथमिति विरुद्धमुक्तं चान्द्रमासोऽधिमास इति माशंकायाः उत्तरं श्लोकेनाह ॥ मू ॥ सौरान्मासादैन्दवः स्याल्लघीयान् यस्मात्तस्मात्तत्संख्ययाऽत्र तेऽधिकाः स्युः ॥ चान्द्राः कल्पे सौरचान्द्रान्तरे ये मासास्तज्ज्ञैः तेऽधिमासाः प्रदिष्टाः ॥ ११ ॥ टी ॥ यस्मात्कारणात् सौरात् मासात् नाम सौरमाससावनात् ऐन्दवः मासः ॥ नाम चांद्रमासः सावनः लघीयान् स्यात् लघुमानभूताः दृश्यन्ते ॥ तस्मात्कारणात् कल्पे ते लघुमानभूताः चांद्राः मासाः संख्यया येन्मिते काले संक्रातिर्भवति तावति २९ दिनैः दर्शान्तं प्राप्नोति तन्मिते काले ५ = ६

श्रीः
६४

^ चांद्राः नाम १

^ ता१

संख्ययोरंतरे ये^ चांद्रमासाः अधिकाः स्युः ते तस्मिन् कल्पावच्छिन्न काले ऽधिमासाः आदिष्टाः तज्ज्ञैः नाम गणितशास्त्राभिज्ञैः ता अधिमासाः कथिताः ॥ द्वयोरंतरे शेषस्य चांद्रत्वेन सिद्धे रित्यर्थः ॥ ११ ॥ अथावमोपपत्तिमुपजातिकयाह ॥ मू० ॥ शशाङ्कमासोनित सावनेन त्रिंशद्गुणात्
लब्धदिनैश्च चान्द्रैः ॥ रुद्रांशकोनाब्धिरसैः तयाह स्यात्सावनो तश्च युगेनुपातात् ॥ १२ ॥ टी० ॥
शशांकमासः नाम चांद्रमासः सावनेन नाम सावनमासेन ऊनितः कार्यः यच्छेषं ०।१२८।९ ॥
तेन शेषेण त्रिंशत्तिथ्यात्मकश्चांद्रमासः हृतः नाम भक्तः कार्यः ॥ हृतान्नाम हरणात् लब्धानि
चांद्रदिनानि रुद्रांशकोनाब्धिरसमितानि भवंति ॥ अतः ॥ लब्धदिनैश्चान्द्रैः रुद्रांशकोनाब्धि
रसैः $\frac{६४}{११}$ मितैः सावनः तयाहः स्यात् अर्थात् तैश्चान्द्रदिनैरेकदिन सावनस्यक्षयः स्या
त्^ ॥ ननु एकावमपतनज्ञानेप्यहर्गणोपजीव्य कल्पादवम संख्याज्ञानं कथं स्यादतश्चाह ॥
अतइति ॥ अतोनुपातात् ॥ एवं रीत्या ऽनुपातात् युगे नाम महायुगे चकारात्कल्पे नाम ब्रह्म
दिनेपि ॥ क्षयदिनानां संख्याज्ञानं भवति ॥ त्रिंशत् दिनात्मकश्चान्द्रमासः ॥ चांद्रमासे सा
वनदिनानितु पूर्वोद्घाटितानि २९।३१।५० अनयोरंतरे कृते जातं (३०) — (२९।३१।५०) =
शेषं ०।१२८।१० एकस्मिन्श्चांद्रमासे द्वयोरंतररूपः सावनमासः एतन्मित साव
नखंडेन ऊनो ०।१२८।१० दृश्यते अर्थादेतन्मितः ०।१२८।१० सावनमासः चान्द्रमासाद्
नः ॥ यदा सावनमासे एतन्मितः ०।१२८।१० सावनखंडः मिलिष्यति तदा चांद्रसावनमासे

न्मित सावनखंडेन ०।२८।१० सावनमासश्चान्द्रमासादूनः सर्वदा स्यात् ॥ अत एवेदं कुदि
नात्मकमवमखंडं ०।२८।१० भास्करैरेव अस्य श्लोकस्य भाष्ये लिखितमिति ॥ यदि अनेन सा
वनात्मक ०।२८।१० = $\frac{३६५}{३६०}$ खंडेन त्रिंशत् चांद्रदिनानि लभ्यंते तदा संपूर्णैकावमदिने नकि
यन्तीति त्रैराशिकेन लब्धैः रूपांशको नाधिरसैः दिनैश्चांद्रैः $\frac{६४}{११}$ एकः तयाहो लब्धः स च सा
वनः अखंडस्य रूपस्य सावनेन कल्पनात् ॥ तथानुपाते स्वरूपं च ॥ $\frac{३६५}{३६०}$ दि : $\frac{१}{१}$ दि : : $\frac{३०}{१}$ चांद्र =
हरस्य छेदलवयोः परिवर्तनात् जातं स्वरूपांतरम् ॥ $\frac{३६०}{३६५} \times \frac{३०}{१} = \frac{१०८००}{३६५}$ =
३६५)१०८००(२९।३४।१९।१०।२७। $\frac{३२७}{३६५}$
दि घ प वि प्र

तथा च कल्पे चान्द्रदिनानि ॥ १६०२९९९०००००० तथा च कल्पे क्षयदिनानि
पूर्वोक्तानि तानि एवो २ क्षिप्यत्यर्थमत्र लिखितानि ॥ २५०८२५५००० तथा सावन
दिनानि च ॥ १५७७९१६४५०००० ॥ इत्यलम् ॥ विस्तरं तु स्वकृत टीकायां विश्वरू
पैः प्रतिपादितम् ॥ तत्र द्रष्टव्यम् ॥ १२ ॥ ननु सौराश्चांद्राणामधिकत्वात्तदंतरं यथा
ऽधिमासास्तथैव तदंतरेण चांद्रात्सौराणां न्यूनत्वात् तन्मितान्न्यूनसौरमासाः भवं
तीति कथं नियतमधिमासोक्तिरतोऽनुष्टुभाह ॥ मू० ॥ सौरेभ्यः साधितास्ते चेद
धिमासाल्लदेन्दवाः ॥ चेच्चान्द्रेभ्यस्तदा सौरास्ते क्षेपं तद्दशा तथा ॥ १३ ॥ श्रीः ॥

अधिकोमासोऽधिमास इत्यर्थः ॥ अधिकोक्तिनियता कथं प्रतिपादिता इत्यर्थः २

१५५० । १५५३३ । ३६ । १२६५ । ५० । ३६५ । १३२८३ । १२० । ६६० । १५३ । ५५ । ६६५ । ३३६ । ५४ । ३२६ । ३६५ । १५५

॥ श्रीः ॥

65

४चांद्रसाधनार्थे=१

४५ अथवा कल्पचान्द्रमासाः ५३४३३३ .... ४ ... १४८४

१ अथवा कल्पसौरमासाः = १४८४

॥ टी० ॥ ते अधिमासाः चेद्यदि सौरेभ्यः नाम सौरसंबंधिवर्षमासदिनेभ्यः साधिताः स्युः तदा ऐंदवाः नाम चांद्रा भवंति ॥ पुनः चेद्यदि ते अधिमासाः अहर्गणाद्विलोमविधिना चांद्रेभ्यः साधिता भवंति तदा सौराः स्युः ॥ तथा तद्दृशात् तच्छेषमपि चांद्रं वा सौरं वा ध्रुवमित्यर्थः ॥ अथानुपातेन दर्श्यते ॥ अहर्गणानयने ॥ द्वादशगुणिताः सौरमासाः भवंति ॥ पुनः सौरमासेषु अधिमासयोगे कृते चांद्रमासगणः स्यात् ॥ अत्रानुपातः ॥ यदा कल्पसौरमासैः ५१८४ ...... एतन्मितैः कल्पाधिमासाः १५९३३ .... एतन्मिताः लभ्यन्ते तदा द्वादशगुणितसौरमासैः किं ॥ एवंरीत्या सौरेभ्यः साधिता भवंति ये तेऽधिमासाश्चांद्राः स्युः तच्छेषमपि चान्द्रं ॥ अथ सावनाहर्गणे वा मासगणे ऽवमयोगे कृते चान्द्राहर्गणो वा चान्द्रमासगणः स्यात् ॥ तत्रानुपातः ॥ यदि कल्पचान्द्रमासैः ५३४३३३ .... कल्पाधिमासाः लभ्यन्ते तदेष्टचान्द्रैः किं ॥ एवंरीत्या चान्द्रेभ्यः साधिताधिमासाः भवंति ये ते सौराः स्युः तच्छेषमपि सौरम् ॥ एतेनात्र विजातीययोः संकलने व्यवकलने च उक्त इति ध्येयं ॥ तथा चाऽहर्गणस्यावमशेषकलेन तत्साधनार्थं तदुत्तररूपाश्चान्द्रा एवाधिमासाः पूर्वग्रंथे उक्ताः ॥ पुनश्चान्द्रात्सौरसाधनस्याऽत्याऽवशेषकृत्वाऽभावात्तदऽप्रसिध्या तदुत्तरस्य न्यूनसौरसंज्ञोक्तेः स्पष्टत्वेन सर्वत्राऽधिमासत्वेन प्रसिद्धेः ॥ यदा तु तद्दिशापत्ता श्रयेण न्यूनसौरसंज्ञापि भवतु ॥ अत्र किं नः ॥ अत्राऽधिमासानां अथवा न्यूनसौरमासानां सौरचांद्रे उभे सिद्धे ॥ क० सौ० : इष्ट० सौ० : : चां०—सौ० इष्ट० सौ० × चां — सौ० क० / क० सौ०) कल्पसौरैः कल्पाऽवच्छिन्न चांद्रसौरांतररूपाधिमासा लभ्यन्ते तदेष्टसौरैः किम् ॥ अत्र कल्पसौररूपच्छेदलवयोः कल्पत्वात्राशे कृते जातं सौरेभ्यः साधिताधिमासाश्चान्द्राः

शिव०

६(क·सा·।) (इष्ट·सा·) {क·चां·—क·सा·} अनुपातेन तृतीय राशिर्जातिः कल्पचांद्राख्या ता ११न्नं सावनेभ्यः साधितानि
अनुपातेफलमन्यजातिकं भवतीति नियमात् ॥ अवमानि चांद्राणि भवंति ॥

॥ नन्वधिमासानां साध्यजातीयत्वेपि तच्छेषं चांद्रं सौरं वा कथं ज्ञेयमिति मंदाशंकयाः
श्रीत्तरमाह ॥ तच्छेषमित्यादिना ॥ अधिमासशेषस्याऽधिमासाऽवयवत्वादितिकिंचिन्नमि
तिभावः ॥१३॥ ननु क्रुरीत्यैव चांद्रेभ्यः सावनानां न्यूनत्वात् तदंतरमऽवमानीत्युक्तं पुनस्त
दंतरतुल्यसावनेभ्यश्चांद्राणाम् अधिकत्वात् अधिकचांद्रदिनानीति किं नोक्तं इत्यतोऽनुष्टु
भाह ॥मू॥ सावनान्यवमानिस्युश्चान्द्रेभ्यः साधितानि चेत् ॥ सावनेभ्यस्तु चान्द्राणि तच्छेषं
तद्वशात्तथा ॥१४॥टी॥ कल्पे चान्द्रदिनानि १६०२९९९०००० कल्पस्य सूर्यसावनदिना
नि १५७७९१६४५०००० इनोदयद्वयांतर रूपाणीत्यर्थः ॥टी॥ चेद्यदि सावनज्ञा
नार्थं चान्द्रेभ्योऽवमानि साधितानि तदा तानि सावनान्येव ज्ञेयानि ॥ अहर्गणनयने
सावनानां न्यूनत्वात् अवमशब्दस्य न्यूनवाचकत्वात् ॥ तुपुनः ॥ अहर्गणाच्चान्द्रदि
वसानयने सावनेभ्यस्तदंतरावमानि चान्द्रार्थं साधितानि चेत्तदा तानि चांद्राणि भवंति ॥
तदंतरेण चांद्राणामधिकत्वात् ॥ तथा चाऽहर्गणस्याऽत्र प्रयोजनात् अहर्गणसाधनार्थं
तदंतरमवमान्येवोक्तानि विपरीतसाधनस्यात्र प्रयोजनाऽभावात् अधिकचांद्रदिनसंज्ञा
तदंतरस्योपेक्षिता पूर्वैः ॥ यदा तादृशापेक्षा स्यात् तदा तदंतरस्य अधिकचांद्रदिनसंज्ञापि
भवतु अर्थादवमस्य चांद्रत्वमपि स्यात् ॥ अत्रापि विजातीययोः व्यवकलने संकलने उक्तेरिति
ध्येयं ॥ अधिमासादवमस्य विरुद्धरूपत्वात् अवमशेषस्य सावनत्वं वा चांद्रत्वं इति मंदाशंकयाह ॥

तथा तद्वशात् नाम लब्धावमानां सावनचांद्रत्वानुरो
धात् तथा तच्छेषं अवमशेषं अपि तथा सावनत्वं वा ॥
चान्द्रत्वं ज्ञेयं अवयवानामवयवीजा
तित्वात् ॥१४॥

॥ अथावमस्य सावनचांद्रत्वमनुपातेन प्रदर्श्यते ॥
(क·चांद्रै·) इष्टचांद्रै· (क·चां—क·सावन·) =
{(क·चां—क·सा·) × इष्टचां· / क·चांद्र·} अनुपाते तृतीयराशिर्जाति कमन्तरं भवति अत्र तृतीयराशिः कल्पसावनाख्या अतो
११न्नं चान्द्रेभ्यः साधितान्यवमानि सावनान्येव भवंति ॥
॥ अनुपातेफलमन्यजातिकं भवतीति नियमात् ॥

66

॥ मू॰॥ अथाऽहर्गणसाधनोपजीव्याऽधिमासाऽवमस्वरूपं प्रतिपाद्याऽहर्गणस्य संसिद्धत्व
स्यावस्थापनं विवक्षुः प्रथमं तत्प्रतिपादने उपजीव्यं पूर्वार्धोक्ताऽहर्गणानयनं खण्डनरूप
शिष्यप्रश्नमुपजातिकयाह ॥ मू॰॥ अहर्गणस्यानयने किमासाश्चैत्रादि चान्द्रैर्गणकान्विताः
किं ॥ कुतोऽधिमासाऽवमशेषके च त्यक्ते यतः सावयवोऽनुपातः ॥१५॥ टी॰॥ हे गणक॰ ॥ उक्ता
ऽहर्गणाऽऽनयनप्रकारस्तत्रैव॰ अस्माभिः साधुत्वेन स्वीकृतः ॥ परं तु महद्बाधकोपजीव्यभूत
स्याऽहर्गणस्याऽऽनयने ~~[illegible]~~प्रकारोक्तौ॰ कथितकल्पगतोर्कसमागणा इत्यादिश्लोकत्रये मध्याधि
कारे ~~अर्कमासाः~~। कथितकल्पगतार्कसमागणो रवि १२ गुण इत्यनेनास्माभिः अर्कमासाः नाम सौ-
रमासा ज्ञाताः ॥ परं तु ते सौरमासाः चैत्रादि चान्द्रैः नाम चान्द्रमासैः किं नाम कुतो हेतोः अन्विताः ना
म योजिताः ॥ सौरचान्द्रयोर्भिन्नजातित्वात् ॥ योगान्तरं तु समानजात्योर्विभिन्नजात्योश्च पृथ
स्यात्=१. क्स्थितिः स्यात् इत्यर्थः ॥ एवं भास्कराचार्यादिगतानि वियोजनप्रश्नोपि तदुक्त्यान्यत्र सिद्ध इति तु ध्येयं ॥
ननु सौरमासा नाम ज्ञानात्स्वल्पान्तरत्वाच्च योजिता इत्यतो दूषणान्तरमाह ॥ कुतोऽधिमासेति ॥
च पुनः हे गणक॰ अधिमासाऽवमशेषके नाम॰ अधिमासानयने॰ अधिशेषं॰ अवमानयने य
दवमशेषं॰ एतत्तद्द्वये॰ कुतः नाम॰ कस्माद्धेतोः त्यक्ते ॥ यतः सावयवोऽनुपातो भवति ॥
यत्कारणात्॰ अनुपातः नाम॰ अधिमासाऽवमानयनोपजीव्योऽनुपातः सावयवो भवति॰ ॥ त
ज्जफलं यतो निःशेषतया न लभ्यतेऽतः उक्ताऽहर्गणस्याऽसंसिद्धत्वं स्फुटमेवास्तीति भावः ॥१५॥

॥अथ तदुक्तरोपजीव्यमधिमासशेषस्वरूपमुपजातिकयाह॥ मू·॥ दर्शावधिश्चान्द्रमसोहि·
मासः सौरस्तुसंक्रांत्यवधिर्यतोतः॥ दर्शागतः संक्रमकालतः प्राक्सदैवतिष्ठत्यधिमा
सशेषं·॥१८॥ टी·॥यतः यस्मात्कारणात् हि निश्चयेन·॥ दर्शांतावधिः नाम· दर्शांतो एवाद्यं
त्ययोर्मर्यादे यस्य एतादृशोमासश्चान्द्रमसोभवति॥ तुकारात्·॥यदिदमुक्तं तदेवाहर्गणसं
संसिद्धत्वस्यापनोर्थं मध्यममानेन ज्ञेयम्·॥तस्याऽहर्गणस्यस्पष्टमानेनाऽसिद्धेरितिसूचि
तम्·॥ अतः कारणात्·। अधिशेषस्यसौरचांद्रांतररूपत्वोक्ते दर्शागतः नाम· दर्शांतादग्रे·
संक्रमकालतः प्राक्· नाम· संक्रमकालात्पूर्वं सदा· नाम· नियतं· अधिमासशेषं ~~सशि~~
तिष्ठति·। नाम· अधिशेषोऽस्तीत्यर्थः॥ ~~एवकारेणान्ययोगव्यवच्छेदः दर्शिकः॥ केवलोऽधि~~
८५=८ ~~शेषैवतिष्ठतिनत्वन्यत्~~॥ एवकारेणाऽवमशेषयोगस्यव्यवच्छेदोजातेत्यर्थः॥ अनेनैव संक्रां
तिमासस्याऽधिकत्वं सिद्धं॥तथा च· मध्यमदर्शांतकालादग्रवहितमध्यमसंक्रांतिकालोय
चांद्रकालेनांतरितस्तद्रूपमधिशेषमहर्गणदौमध्यमत्वेनफलितं॥ स्पष्टं तु स्पष्टयोर्दर्शां
तसंक्रांत्योरंतरमत्राऽप्रयोजकं॥१८॥ अथाऽहर्गणनयने चांद्रमासतिथियोजनपूर्वं।
काऽधिशेषत्यागमुपगीतिकयाव्यवस्थापयति·॥मू·॥ दर्शांततोयाततिथिः प्रमाताः सौरेस्त
सौरादिवसाः समेताः॥यतोधिशेषोत्थदिनाधिकास्ते त्यक्ते तदस्मादधिमासशेषम्·॥१९॥
॥टी·॥मध्यममानेन यावत्प्रमावास्या· तदन्ते· चान्द्रमासान्तः॥ मध्यमार्कस्य यस्मिन्दिने संक्रांतिस्त
त्रसंक्रांतिकाले रविमासान्तः तयोः रविचन्द्रमासान्तरयोर्मध्ये यावत्यः तिथयः सावयवाः ता अधि

(श्रीः)
६७
67

=अधिमाससाधनोक्ताऽनुपातेनेत्यर्थः=५

॰गतः=५

॰गत=३

पुनः अहर्गणानयने गताद्याः रवि १२ गुणाः सन्तः सौरा मासाः स्युः॥ अतस्तेषु चैत्रादि चान्द्र तुल्याः सौरा एव मासाः योजितास्ते तदा ते संक्रान्त्यवधिपर्यंतकाः जाताः॥ अत्र वस्तुतश्चान्द्राणां सौरैः सह योगो जातः॥ तथापि अत्र चैत्रादि चान्द्रमासेषु सौरत्वबुद्ध्याऽभिधाय भास्कराचार्यैः द्वादशगुणित सौरमासैः सह योगः कृतः॥ अयं योगः संक्रान्त्यवधिको जातः॥ ~~[illegible]~~ चैत्रादिगत चान्द्रमासानां मध्ये यत्स्यादिमिततोधिमासावयवमूर्वोक्तोऽनुपातेन लभ्यते तत्स्वादिमिताधिमासावयवेनायं योगोधिको जातः॥ तत्स्यादिमिताधिमासावयवे शोधिते॥ वास्तवाः संक्रान्त्यवधिकः सौरो मासगणो भवितुमर्हति॥ परं तु सोऽधिमासावयवोत्र न शोधितः॥ अतोऽयं सौरमासगणः अधिशेष तु ल्योऽधिको जात इति ध्येयं॥ अथाग्रे श्लोकार्थः॥ पुनः ~~त्रिंशत्[illegible]~~ गुणितेषु एषु सौरमासगणेषु कृतेषु सत्सु सौरदिवसाः जाताः॥ पुनरेते सौरा दिवसाः दर्शान्ततः यात तिथिप्रमाणैः नाम शुक्लप्रतिपदादितः गततिथितुल्यैः सौरैः नाम सौरदिवसैरेव योजिताः॥ अत्रापि पूर्ववत्कल्पनां कृत्वा॥ अर्थात् चान्द्रदिनेषु गततिथितुल्येषु सौरत्वबुद्धिमभिधाय सौरदिवसैः सह योगः कृतः॥ अत्रापि गततिथिषु युन्मितोधिशेषो पतति॥ तन्मितोधिशेषः शोधनीयः तदा वास्तवसौरदिवसाः भवन्ति॥ कर्मगौरवान्न शोधितः॥ अतोऽत्रापि अधिशेषोऽधिको जातः॥ पुनः सौरदिने ष्वधिमासस्य दिनाद्यानां योगे कृते चान्द्रदिवसाः भवन्ति॥ तत्राधिमासानयनेऽनुपातलब्धै रधिमासैर्दिनीकृतैः तच्छेषदिनैश्च युक्ताः सौरदिवसाश्चान्द्रदिवसा भवितुमर्हन्ति॥ एवमत्राधिमासाः शेषदिनाद्यैः सह पूर्वसिद्धैः सौरदिनेषु योजनीयाः॥ परं तु दिनादि अधिशेषफलं पूर्व

॰कुतः कर्म्मगौरवात्=६

त्रिंशत्गुण=४

साधितसौरदिनेषु स्वतः एव युक्तो ह्यपगते॥ कृतः॥ यत्तत्सौ
रदिवसाः स्वत एव अधिशेषोत्थदिनाद्यैः स[illegible]हाधिकाः॥ अस्मा
त् तदधिमासशेषं अधिमासानयने ह्यत्य[illegible] क्रमः॥ १७॥ स्फूर्तिः॥

शिवः ६७

^ साद्याऽवमाऽवशेषमेव तिष्ठति =४
^मध्यम =४

॥ नन्वेवं कल्पादिष्टचांद्राणां वास्तवत्वेनाऽवगमात् तत्साधिताऽवमानि साग्राणि भवंति पुनः सा
वनसिध्यर्थं निरग्राणि कथं हीनानि क्रियंते इत्यत उपजातिकयोत्तरमाह ॥ मू ॥ तिथ्यंतसूर्यो
दययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषं ॥ त्यक्तेन तेनोदयकालिकः स्यात् तिथ्यंतकाले द्युगणो
ऽन्यथातः ॥ इति ॥ १८ ॥ टी ॥ तिथ्यंतसूर्योदययोर्मध्ये ^नाम^ तिथ्यंतादग्रे यावती भि घटी भि
मध्यमसूर्योदयस्ताः अवमशेषघटिकाः ॥ यतः सावनचान्द्रान्तरेऽवमानि भवंति ॥ पुनः इनोदयाद
^पुनः =६ यां तदूनं तदर्कसावनं दिनं भवति ॥ सौरदिनगणेषु अधिमासानां योगे कृते चान्द्रमासगणो जातः ॥
पुनस्त्रिंशद्गुणिते चान्द्रमासगणे गततिथि (मा) थियोगे च कृते चान्द्रो ऽहर्गणो जातः अर्थात् गतति
थीनां समूहो जातः ॥ अत्रोच्यते ॥ कल्पसंबंध्यनुपातेन लब्धाऽवमादिनैः यत्त गततिथयः ताः
यदि ऊनाः क्रियंते तदा गतमध्यममानेन सूर्योदयाऽवशिष्टा भवंति ॥ लंकार्कोदयाऽऽसन्नका
लसंबंधि इत्यर्थः सूर्योदयानां समूहोऽवशिष्टो भवतीत्यर्थः ॥ अथ च तेषु अवमशेषस्यापि त्यागे कृ
ते अर्थात् अवमदिनाधोवर्ति यत् घटिपलात्मकरूपोऽवमावयवः तस्यापि त्यागे कृते गतमध्य
मसूर्योदयानां समूहः गततिथ्यंताऽवधिक घटिपलाद्याऽवयवस्त्वाऽवशिष्यते ॥ तिथ्यंते सावनो
ऽहर्गणो भवतीति तात्पर्यः ॥ सत्वऽहर्गणः सूर्योदयावधिकः करणीयः ॥ पुनः तिथ्यंतसूर्योदययो
रंतरेऽवमशेषः ॥ पूर्वं युद्धीनः कृतः घटिपलात्मकरूपः सैवावमशेषेण च्यते ॥ तस्याऽवमशेष
स्यात्र योगः प्राप्तः ॥ पूर्वं वियोगे कृते तिथ्यंते सावनो ऽहर्गणो जातः ॥ पुनः तिथ्यंतकालीनाहर्गणस्यो
दयावधिककरणेऽवमशेषस्य योगे कृते सूर्योदयावधिकः सावनोऽहर्गणो भवति ॥ यद्वा लना
द्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायेन ॥ प्रस्य प्रथमं शोधनं प्राप्तं तस्यैव पुनः योगः प्राप्तः ॥ अतः

^मध्यम =५

॥ टी ॥ त्यक्तेन तेनावमशेषेण
अन्यथा तिथ्यंतकाले भवति ॥
वमपि त्यक्त्वा ॥ १८ ॥ श्री ॥
अतः कारणात्
लान्नाम ॥ स्या ॥ गता =८
स्एण धनयोक्तकृ: च =१०
युगणः उदयकालि
अतः कारणादवमशे
^मध्यम =५

श्रीः
६८

68

॥ अथाऽहर्गणानासनयासंस्मृतोदयांतरवासनामुपजातिकाचतुष्टयेनाह ॥ मू. ॥ अह
र्गणोमध्यमसावनेनकृतश्चलत्वात्स्फुटसावनस्य ॥ तदुत्थखेटाउदयांतराख्यकर्मोद्भवे
नोनयुताः फलेन ॥ १९ ॥ लंकोदयेस्युर्नकृतं तदाद्येर्यतोन्तरं तच्चलमल्पकंच ॥ मध्या
र्कभुक्त्याऽसवोनिरक्षेयेये चमध्यार्ककलाः समानाः ॥ २० ॥ तदन्तरंयत्स्फुटसूर्यमध्य
योस्तत्स्युपिंडयोः स्याद्विवरंगतिघ्नं ॥ भक्तंद्युरागासुभिराप्तलिप्ताहीनाहिग्रहाश्चेदसवोल्पकाः
स्युः ॥ २१ ॥ तदन्यथाढ्यास्त्विनिजोदयेश्चेत्तभुक्तासुपूर्वंविहितंतदानीं ॥ कृतंतथासाक्षरकर्म
भिन्नं कर्मग्रहाणामुदयांतराख्यम् ॥ २२ ॥ टी. ॥ योऽयमहर्गणः कृत आनीतः स मध्यमसावनेनएव कृतः
नाम कल्पितनियतमानेन मध्यरविगतिकलातुल्यासुयुतनाक्षत्रषष्टिघटिकामितेन मध्यमसा
वनेनएवेत्यर्थः ॥ ननु मध्यगत्युत्पन्नाऽसुयुतषष्टिघटिकामितमध्यमेनेतिकृतः ॥ ननुस्फुटसा
वस्य नवक्ष्यमाणत्वेन तत्प्रमाणेनैवाऽहर्गणः कथंनकृत इत्यत आह ॥ चलत्वादिति ॥ स्फुटसा
वनस्य नाम मध्यभोगतुल्यनासुजनितसावनस्य चलत्वात् नतु अनियतत्वादित्यर्थः ॥ तथा
चाऽहर्गणस्यनियतमानेनसिद्धत्वात् मध्यमसूर्योदयस्यापिनियतमानेनाऽभावाच्चाहर्ग
णजनिताऽनुपातसिद्धोमध्यमग्रहो मध्यमार्कोदयकालिकोनभवति किंतु नियतमानाव
गतकालस्यासन्नकालेऽभवतीत्यर्थः ॥ नन्वेवं मध्यार्कोदयकालीनाग्रहाः कथंभवंतीत्यत
आह ॥ तदुत्थखेटाइति ॥ तदुत्थखेटाः नाम अहर्गणाऽनुपातोत्पन्नाग्रहाः ॥ उदयांतराख्यक
र्मोद्भवेन नाम स्पष्टाधिकारोक्तोदयांतरकर्मजनितेन फलेन नाम स्वस्वगत्यनुसृतेनक
लात्मकेनफलेन ऊनयुताः नाम ऊनाऽनुरोधेन ऊनयुताः संतः । लंकोदये नाम लंकायांमध्य

मध्यार्कोदयकालेस्फुटीकरणं कर्तव्यमित्यर्थः ॥ एतेन उदयान्तरासमत्वे
भिन्नमध्यसारणीसूत्रं ॥ श्रीरस्तु ॥ श्रीरस्तु ॥ श्रीः ॥

श्राव. ६८

५ गत्यसू नामनियतत्वात् =२

॥ ननु लंकायां भास्करोदये मध्याह्न इत्यनेन नव्य भागणाद्यैः अहर्गणोत्पन्नग्रहस्योदयकालिकत्वमुक्तं ते
नैतदुदयांतरं खगुध्यायितं कथमुक्तं इत्यत आह ॥ नकृतमिति ॥ यतः तदंतरं नाम तत् उदयां
तरं चलं नाम अनियतं अतः कारणात् तत् नाम उदयांतरं आद्यैराचार्यैः नकृतम् ॥
अनियतत्वात्तैरुपेक्षितमितिभावः ॥ नन्वेवं तैः स्पष्टादिक्रियाकथमुक्तेत्यत आह ॥ अल्पकमिति ॥
चपुनः तत् उदयांतरफलं अल्पं नाम अत्यल्पं अतः उपेक्षितमित्यर्थः ॥ ननूक्तोदयांतरस्य स्वरूपं
किं अतस्तद्रूपं प्रतिपादयति ॥ मध्यार्कभुक्ता इति ॥ मध्यगतितुल्यासु युतषष्टिघटीमितसावन
मानेन कल्पादनुपातसिद्धेऽहर्गणे युक्ता मध्यगतिकलोत्पन्नासु युतषष्टिघटीमितदिनभिन्न
सावनेनगणनया ऽहर्गणस्तयोरंतरमभीष्टकाले यत्तत्सावनजनितांतरम् ॥ एतदात्मकं
वांतरं मा चार्यः स्वयं विवृणोति ॥ निरक्षे नाम लंकासंबंधिदेशे ये मध्यार्कभुक्ता असवः
अर्थात् सायनांशेन रविणा मेषादेरारभ्य ये भुक्ता राशयस्तत्संबन्धिनो ये निरक्षोदयासवो गगनभूधर
षट्क चन्द्राः १६७० इत्यादयस्तेषामैक्यं कृत्वा पुनः भुज्यमानराशेर्ये भुक्तभागास्तत्सदुदयासुभिः सं
गुण्य त्रिंशता ३० विभज्य लब्धासवोपि तत्रदेयाः ॥ एवं मध्यार्कभुक्तासवः स्युः ॥ भदिनांतात् दूर्ध्वं एताव
त्यसुसात्मके काले लंकायां मध्यमार्कस्योदयः ॥ च पुनः ये मध्यार्ककलाः समाना असवः ॥ अनयोर्यदंतरं
अर्थात् उभयसंबंध्यसूनां यदंतरं तत् स्फुटमध्ययोर्द्युपिंडयोरहर्गणयोरंतरं स्यात् अर्थादसूनां यदंतरं
तदेवाहर्गणयोरंतरं भवति ॥ अथवा हर्गणेन सिद्धाः ये ग्रहाः ते मध्यमार्ककलामिते ऽसात्मके काले भदि

नांता दूर्ध्वं जाताः ॥ अतो ऽसूनां पुनः कलातुल्यसूनां चय
दन्तरं तेन निरक्षमध्यमार्कोदयो ऽन्तरितः अतस्तदुदया
॥ तत्सारव्यं कर्म चापे ॥ श्रीः ॥

॥ श्रीः ॥

॥ ननु अनयोः स्फुटमध्ययोर्ध्रुवपिंडयोरंतरत्वादहर्गणिकथं न संस्कृत इत्यत आह ॥ गतिघ्नमिति ॥ तद्विवरं नाम
तदंतरं गतिघ्नं नाम स्वस्वमध्यगत्या कलात्मिकया गुणितं पुनः द्युराशासुभिः नाम मध्यगत्युत्प-
न्नासुजनिताहोरात्रमानासुभिः ॥ अर्कसावनाहोरात्रासुभिः २१६०० इत्यर्थः भक्तं आप्तलिप्ताभिः
नाम लब्धकलादिभिः ग्रहाः हीनाः कार्याश्चेद्यदि असवः नाम पूर्वोक्तमध्यार्कभुक्तासवः मध्यार्ककला
समानाः सर्वेभ्यः अल्पा भवंति तदा ॥ सतदन्यथा नाम मध्यार्ककलासमाना सर्वेभ्यः मध्यार्कभुक्ता
ऽसवः अधिकाश्चेत्तदा लब्धकलादिभिः ग्रहाः ऽस्व्याः नाम युक्ताः कार्याः ॥ तदा निरक्षे मध्यमार्को
दयोत्काः कालिकाः ग्रहाः स्युरित्यर्थः ॥ तथा च विनार्कज्ञानं तत्संस्कारोऽहर्गणिकर्तुं न शक्यते ॥
सावयवाऽहर्गणेन गुणने बहुप्रयासात् लाघवात्तच्चालनं ग्रहे ऋणं धनं वदत्तमितिभावः ॥ नन्वेवं
पूर्वोक्तात् अधिकसंस्कारोक्त्या गौरवमेवेत्यत आह ॥ निजोदयैरिति ॥ चेद्यदि निजोदयैः नाम स्वदेशारा
श्युदयासुभिः भुक्तासुपूर्वं नाम सायनमध्यार्कासवः पूर्वशब्दात् अहोरात्रासवः विहितं कृतं नाम वि-
धानं कृतं तदानीं नाम तदा उदयांतराख्यं कर्म चरकर्मभिश्रं नाम चरसंस्कृतं ग्रहाणां यथा
स्यात्तथा कृतं ॥ यदि निरक्षोदयैरुदयांतरं साध्यते तदा खलु गौरवं स्वदेशोदयैस्तु भिन्नचरसंस्कारकर-
णेनोदयांतरसंस्कारेण तत्सिद्धेर्गौरवाऽनवकाश इतिभावः ॥ यदि तु स्फुटार्कभुक्तानसूनू स्वोद-
यासुभिरानीयेदं कर्मकृतं १ तदा उदयांतर १ भुजांतर २ चरकर्माणि ३ एतानि त्रीण्येव पिकृतानि
स्युः ॥ वर्षमध्ये यावंति स्फुटसावनदिनानि तावंत्यपि मध्यमानि स्युः उदयासूनां ह्रासवृद्धी स्फुटस

स्यात् ॥ वर्षे वा ग्रहेषु स्वल्पेष्वपि ऋणत्वात् अभावः तत्संस्कृते
क्षेपे ऋणत्वं तस्य संस्कारे ऋणत्वं भवतः ॥ २४ ॥ श्रीरस्तु ॥ श्रीः ॥

॥ ननूदयांतरसंस्कारेण ग्रहा लंकोदये जाताः कथं स्वदेशीयसूर्योदयेष्विस्यत इन्द्रवज्रयाह ॥ मू॰ ॥
येनेन लंकोदयकालिकास्ते देशांतरेण स्वपुरोदयेषु ॥ देशांतरं प्रागपरं तथान्यद्याम्योत्तरं तच्चर
संज्ञमुक्तम् ॥ २३ ॥ टी॰ ॥ अनेन नाम उदयांतरसंस्कारेण ये ग्रहाः लंकोदयकालिकाः नाम लंकायां
सूर्योदयकालिका भवंति अर्थात् स्वदेशीयविषुवद्दिनस्य सूर्योदयकालिका उदयांतरसंस्कारेण ये ग्रहाः
जाताः त एव ग्रहाः देशांतरेण नाम देशांतरसंस्कारेण संस्कृताः संतः स्वपुरोदये नाम स्वपुरस्य
✕ का सा = सूर्योदयकालेषु ॥ स्वान्तदेशे लंकाकीस्यॉत् विषुवद्दिनातिरिक्तदिने सूर्योदयकालो भिन्नः दृश्यते ऽतः
देशांतरं ✕ विभजति ॥ देशांतरमिति ॥ एकं प्रसिद्धं देशांतरं प्रागपरं नाम पूर्वापरसंज्ञं तथाऽन्यत्
नाम तथा द्वितीयं देशांतरं याम्योत्तरं नाम याम्योत्तरसंज्ञं ज्ञेयं ॥ यद्याम्योत्तरं देशांतरं तत् चरसंज्ञं पू
र्वैराचार्यैरुक्तं ॥ कालभेदेन भिन्नत्वात् चंचलत्वाच्च चरसंज्ञातस्य ॥ पूर्वापरस्य स्थिरत्वाद्देशांतर
संज्ञैव ॥ उभयोर्देशसंबंधाद्देशांतरत्वम् ॥ अतस्त्व लंकातः पूर्वापरनिरक्षदेशे याम्योत्तरांतराऽभावेतः
देशांतरेण पूर्वापररूपेण संस्कृताः संतः त एव ग्रहाः स्वपुरोदयेषु ॥ पुनः स्वान्तदेशे तु देशांतराभ्यां
✕ ऐ = १२ संस्कृताः संतः स्वपुरोदये भवंतीति हेतुगर्भ पदं देशांतरेणेति ॥ २३ ॥ अथ स्पष्टभूपरिधिसंबंधिरेखा
ऽधो वर्तिदेशकथनं पूर्वापरदेशांतरस्य धनर्णोपपत्तिं चाह इन्द्रवज्रेणाह ॥ मू॰ ॥ य ल्लंकोज्जयिनीपुरोपरि
कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ॥ आदौ प्राग्गुदयोऽपरत्र विषयेपश्चाद्धि
रेखोदयात् स्यात्तस्मात्क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम् ॥ २४ ॥ टी॰ ॥ यत् सूत्रं लंकायाः सकाशात् मेरु
गतं नाम मेरुपर्यंतं नीयमानं उज्जयिनीपुरोपरि कुरुक्षेत्रादि
देशान् स्पृशत् याति सा बुधैः भुवः मध्यरेखा निगदिता ॥

हि· नाम· यत: कारणात् · रेखोदयात् नाम· रेखादेशार्कोदयात् · प्राक् नाम· स्वरेखापुरात् प्राक् पूर्वभाग स्थितदेशे · आदौ · नाम· प्रथमं · उदय: नाम· सूर्योदयो भवति ॥ पुन: स्वरेखापुरात् · अपरत्र विषये · नाम· पश्चिमभागस्थे देशे · खरेखोदयात् · नाम· रेखादेशार्कोदयात् · पश्चात् · नाम· अनंतरं · सूर्योदयो भवति ॥ तस्माद्धेतो: तदन्तरभवं · नाम· स्वरेखा स्वदेशयोर्यो जनात्मकमंतरं पूत · तस्मात्स्पष्ट भूवेष्टनेन ~~उत्पन्नं यत् फले~~ गैराशिकेन उत्पन्नं यत्फलं · तत् · खेटेषु पूर्वापरक्रमेण · ऋणं धनं क्रियते ॥ यत: स्वरेखात: स्वपुरं पूर्वदिशि तस्मात्तत्फलं खेटेषु ऋणं क्रियते ॥ पुन: यत: रेखात: पश्चिमदिशि स्वपुरं तस्मात्तत्फलं खेटेषु धनं क्रियते ॥ एवमहर्गणेनोत्पन्ना ग्रहा: लंकार्कोदयाऽऽसन्नकालिका: जाता: पुनरुदयांतरसंस्कारेण लंकार्कोदय कालिका: जाता: ॥ पुन: लंकार्कोदयिकानां चरसंस्कारेण · स्वरेखार्कोदयिकत्वं सिद्धं ॥ पुन: रेखार्कोदयिकानां देशांतरसंस्कारेण स्वदेशार्कोदयिकत्वं जातम् ॥ सम्यगेव ॥ २४ ॥ अथ पूर्वोक्तसंस्काराऽनुक्तावपि प्रथमं देशांतरकलास्वरूपप्रतिपादनपूर्वकं तदानयनोपपत्तिमुपजातिकयाह ॥ मू· ॥ स्वदेशमेवन्तरयोजनैर्यल्लम्बांशजैर्मेरुगिरे: समन्तात् · ॥ वृत्तं स्फुटो भूपरिधिर्यत: स्यात् त्रिज्याहृतो लम्बगुण: कृतोऽस्मात् · ॥ २५ ॥ टी· ॥ स्वदेशमेवन्तरयोजनै: मेरुगिरे: समंतात् · यद्वृत्तं भवति · स· स्फुटो भूपरिधि: नाम· स्पष्टो भूपरिधि: · यत: कारणात् स्यात् · अस्मात्कारणात् · ॥ निरक्षदेशासंबंधिपरमस्पष्टभूपरिधेरुक्तरूपत्रिज्यातुल्पलंबज्ययोः को भूपरिधिस्तदा स्वदेशलंबज्यया क इत्यनुपातेन · लंबज्यागुणितो भवेत्कुपरिधि: स्पष्टस्त्रिभज्याहृत· इति श्रीधरोक्तो त्रिज्याहृतो लंबगुणो ... य: कृत: तत्तु · स्फुटो भूपरिधि:, सिद्ध्यर्थ: कृत: ॥ स्पष्टभूपरिधिसिद्ध्यर्थमित्यर्थ: ॥ ननु तयोर्जनज्ञानाऽभावात् तत्कथम्मानेन यद्वृत्तमुत्पद्यते · तत्स्पष्टभूपरिधिर् न भवितुमर्हति ॥ ... ॥ एतेन · लंबज्यातुल्यं सर्वत्र स्पष्टभूपरिधेर्ज्ञा

॥ सार्धं भवितुमर्हति ॥ २५ ॥

॥ ननु खेटोऽनुपातेनयः स्यात्तस्याऽस्फुटता कथमिति मौलिभूत प्रश्नस्योत्तरं न दत्तमित्यतः फक्किक
योत्तरमाह॥ मू॰॥ मध्यगतिवासनाऽध्यायः॥ २६॥ टी॰॥ अत्रमध्यममानेन वासनयाऽहर्गण द्युक्तं॥
अर्थादत्र मध्याधिकारोक्ताऽहर्गणादिमुख्य पदार्थानां मध्यममानेनोपपत्त्या॰ निर्णयः कृतः॥ तदुत्तर
स्य स्पष्टज्ञानोपजीव्यत्वात् स्पष्टीकरणवासनायां वक्तुमुचितमितिभावः॥ २६॥ वसनिवासे॰ तस्माद्धे
तुमति चेति णिच्॰॥ अत उपधाया॰ अनेनवृद्धिः॥ वासीति जातम्॥ पुनः ण्यासश्रन्थो युच्॰॥ अनेनयुच्॰
प्रत्ययः॥ युवोरनाकौ॰॥ अनेनयुस्थानेऽनादेशः॥ वासनेतिजातं॥ पुनरजाद्यतष्टाप्॰ स्त्रीत्वविवक्षायां॥
वासना इति सिद्धम्॥ हेदि॰ वासयतीतिपदार्थ॰ वासना॰ उपपत्तीत्यर्थः॥ श्रीरस्तु॥ सर्वगेजेताम्॥
नत्वाश्री गुरुपादपद्मयुगलं ध्यात्वा च वागीश्वरीं॥ तेषां पादसरोरुहः स्मरणतो लब्ध्वा च बुद्धेर्लवम्॥ स
त्सिद्धान्तशिरोमणौ लघुतरां टीकां मयूखाभिधां॥ शालिग्राम सुधीहितां प्रकुरुते शिष्यार्थसंदीपिकाम्॥ २॥
मध्याधिकारे पठिताः पदार्थास्तेषां भिदानी खलु वासनाद्याः॥ जाता समाप्युत्तरतो बुधानां
ज्या वासनां भूषणतो हि वच्मि॥ १॥ इतिश्री सिद्धान्तशिरोमणेष्टीकायां मयूखमालायां शालि
ग्राम सांवत्सरिक विचरचितायां मध्यगतिवासनाध्यायः समाप्तः॥ श्रीः॥ सं॰ १९४२ पोषप॰ ११

॥श्रीः॥
७१

71

॥श्रीः॥ इतिमध्यगतिवासनाध्यायः समाप्तः॥ श्रीः

॥श्रीः॥ संवत्·१९४२ पौषव॰·१२ जम्बूक्षेत्रे·॥ श्रीः॥

श्रि॰व॰
७१

ˆज्ञातुं=१


॥श्रीगणेशाय नमः॥ अथ मौलिभूतत्रिज्याज्ञानं विना गोलस्थित्यवगमं मशक्यमतो गोलस्वरूपं विवक्षुः प्रथमं तदुपजीव्यां ज्योत्पत्तिमुपजातिकयाह॥ मू॥ पटो यथा तंतुभिरूर्ध्वतिर्यक्रूपैर्निबद्धोऽत्र तथैव गोलः॥ दोःकोटिजीवाभिरमुं प्रवक्तुं ज्योत्पत्तिमेव प्रथमं प्रवक्ष्ये॥१॥ टी॥ पटः नाम वस्त्रः यथा ऊर्ध्वतिर्यक्रूपैः तंतुभिः निबद्धोऽस्ति अपि तेऽत्र नामजगति संसारे इत्यर्थः॥ तथा एव गोलः नाम ग्रहाधिष्ठिताऽऽकाशगोलः दोःकोटिजीवाभिः नाम ऊर्ध्वतिर्यक्स्थाभिर्दोःकोटिज्याभिः निबद्धो स्याम्॥ भवति॥ स्यादित्यर्थः॥ तथा च तंतुस्वरूपज्ञानं विना पटस्य स्वरूपज्ञानं न भवति यथा लोके तथा ज्यास्वरूपज्ञानं विना गोलस्य यथार्थस्वरूपज्ञानं कदापि न भविष्यति इति मनसि विचार्य अमुं गोलं प्रवक्तुं नाम भास्कराचार्यः तत्वतः गोलस्वरूपं प्रतिपादयितुमिच्छुः प्रथमं ज्योत्पत्तिमेवाहं प्रवक्ष्ये नाम सूक्ष्मत्वेनाहं कथयिष्ये तस्मात्कारणात् यदा ज्यास्वरूपज्ञानं भविष्यति तदा गोलस्य स्वरूपज्ञानमपि सुलभं तया स्यादिति॥ इत्यभिप्रायः॥१॥ तत्र ज्योपजीव्यं जात्यत्र्यस्रं विदुषां तरं च शालिन्याह॥ मू॥ इष्टात्रिज्या साश्रुतिर्दोर्भुजज्या कोटिज्या तद्वर्गविश्लेषमूलं॥ दोःकोट्योः प्राग्वत् क्रमज्येष्वथ कृते त्रिज्याभुजे कोटिदोरुत्क्रमज्ये॥२॥ टी॥ अर्धज्याग्रे खेचरो मध्यसूत्रात्तिर्यक्संस्थो॥ इत्यादिनात्र धनुर्ज्ययो रर्धत्वेनांगीकाराद्धृत्तं चतु

ˆद्ध्रुपते भूस्य लोके दि=१

72

समकोणत्रिभुजे जात्यत्रिभुजमित्युच्यते बुधैः
यस्यैककोणः शेषकोणयोः समं तज्जात्यमिति ॥ = ६
= लंबरूपरेखोत्पन्नः कोणः समसंज्ञकः = ६

॥ समभूमौ अभीष्टत्रिज्यया नाम अभीष्टव्यासार्धेन वृत्तं कुर्यात् तत्र दिक्साधनं कृत्वा षष्ट्यंशानामंकनं कृत्वा यत्र मेषादारभ्य ग्रहस्थानं स्पष्टानुसारेण प्राप्तं तद्गतस्य ग्रहस्याग्रान्तरेण चिन्हं कुर्यात् ॥
पुनः परिधौ यद्ग्रहस्थानं प्राप्तं तस्मान्मध्यसूत्रपर्यन्तं अर्धव्यासार्धरेखा पर्यंतं यत्सूत्ररेखारूपसूत्रं सा भुजज्या भुजांशानां ज्या इत्यर्थः ॥ पुनः भुजज्यामध्यसूत्रेयत्र संलग्ना तस्माद्भुजज्यामध्यसूत्रसंलग्नस्थानात् मध्यरूपकेन्द्रपर्यन्तं अधोभागे मध्यसूत्रस्य यत्खंडं रेखात्मकम् सा कोटिः ॥
अथ च वृत्तपरिधौ यत्र ग्रहचिन्हं तस्मात् केन्द्रपर्यन्तं या तिर्यक् रेखा स कर्णः त्रिज्यारूप इत्यर्थः ॥ ३=६
इदं जात्यत्र्यस्रं बुधैरुक्तं ॥ जात्यत्र्यस्रस्य लक्षणं सिद्धान्तसम्राड्ग्रन्थे प्रसिद्धं ॥ उपपत्तिर्द्रष्टव्या ॥ अथ श्लोकार्थः ॥ या त्रिज्या इष्टा नाम स्वेच्छया कल्पितं परिमाणं यस्याः त्रिज्यायाः व्यासार्धस्येत्यर्थः ॥ सा श्रु
कर्णः = तिः नाम त्रिज्यापरिमितं परिमाणं तस्य कर्णस्य ज्ञेयमित्यर्थः ॥ पुनः या भुजज्या स दोः नाम भुजः ॥
तत् नाम तयोः भुजकर्णयोर्यत् वर्गविश्लेषमूलं नाम वर्गयोरन्तरस्य यन्मूलं सा कोटिज्यामा
नमित्यर्थः ॥ अत्रोपपत्तिः ॥ अत्र कर्णप्रमाणं या १ एतत्त्र्यस्रं परिवर्त्य यत्कर्णं तद्भूमिं परिकल्प्य कल्पिता ॥ जातं तत्र तत् = द्विगम् ॥





अत्रयोलंबः तस्मादुभयतो ये त्र्यस्रे तयोः त्र्यस्रयोः पूर्वत्र्यस्रस्य भुजकोटी भूकर्णौ भवतः ॥ अतोऽत्रानुपातः ॥ यावत्तावत्तिकर्णेया १ अयं भुजः ३ तदा भुजे तुल्ये कर्णे को भुजः ॥ या १ : रू ३ : : भु ३ = ३×३ / या १ = जातो भुजः रू ९ / या १ इयं द्वितीयत्र्यस्रे लघुभुजाश्रिताबाधा ॥
जाता रू ९ / या १ ॥ पुनः यावत्तावत्तिकर्णेया १ इयं कोटिः ४ तदा कोटितुल्ये कर्णे का कोटिः ॥ या १ : रू ४ : : को ४ = रू १६ / या १



॥ एवं जातौ कोट्यावाभ्यामिता ऽऽबाधा $\frac{\text{रू}\cdot 16}{\text{या}\cdot 2}$ ॥ आबाधायोगः प्रथमत्र्यस्रस्य तस्य कर्णसमः ॥

लम्बो भुजः | कर्णः $\frac{\text{रू}\cdot 16}{\text{या}\cdot 2}$ || लं $\frac{\text{रू}\cdot 9}{\text{या}\cdot 2}$ | कर्णः

$\frac{\text{रू}\cdot 9}{\text{या}\cdot 2}$ $\frac{\text{रू}\cdot 16}{\text{या}\cdot 2}$ इमौ पक्षौ समच्छेदीकृत्य जातौ ॥ ~~स्वहरघ्नदृष्टपक्षाभिहतौ तु वल्लीत्युक्तत्वात्~~

$\frac{\text{रू}\cdot 9}{\text{या}\cdot 2}$ $\frac{\text{रू}\cdot 16}{\text{या}\cdot 2}$ जातौ ~~या ... या २६ अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम् ॥~~

~~इत्युक्त्या जातौ~~ ॥ इमौ स्वतः एव समच्छेदौ $\frac{\text{रू}\cdot 9}{\text{या}\cdot 2}$ $\frac{\text{रू}\cdot 16}{\text{या}\cdot 2}$ अनयोर्योगः $\frac{\text{रू}\cdot 25}{\text{या}\cdot 2}$ मूले कृते जातौ या $\cdot$ ०० रू $\cdot$ ५ | या $\cdot$ १ रू $\cdot$ ००

एकाव्यक्तं शोधयेदन्यपक्षाद्रूपाण्यन्यस्येतरस्माच्च पक्षादित्युक्त्या द्विनासमीकरणे कृते जातं ॥ या $\cdot$ १ रू $\cdot$ ५ शेषम् ॥

पुनः शेषाव्यक्तेनोद्धरेद्रूपशेषमव्यक्तमानं जायते ऽव्यक्तराशेः रू $\cdot$ ५ $\div$ या $\cdot$ १ = इत्यादिना लब्धं यावत्तावद्रूपकर्ण-

स्य मानम् $\cdot$ ५ एवं कृते भुजकोट्योर्वर्गयोगस्य मूलमेव कर्णमानमित्युपपन्नम् ॥ भुजकर्णयोर्वर्गविश्लेषमूलं

कोटिः ॥ कथमित्युच्यते ॥ कर्णवर्गस्तु भुजकोट्योर्वर्गयोगतुल्यो दृश्यते पूर्वोद्दिष्टोपपत्तौ ॥ ये वै कर्णवर्गः

स एव भुजकोटिवर्गयोर्योगः ॥ अतः कर्णवर्गनाम भुजकोट्योर्वर्गयोगे भुजस्य वर्गे विश्लेषिते नाम शोधि-

ते यच्छेषं तत्तु कोटिवर्ग एव भवति पुनस्तस्य मूले कोटिरेवेति वालैरपि ज्ञायते ॥ किं चित्रम् ॥ कर्णवर्गः = भुज-

वर्गः + कोटिवर्गः ॥ (भु $\cdot$ व + को $\cdot$ व) — (भु $\cdot$ व $\cdot$) = को $\cdot$ व $\cdot$ अस्य मूलं कोटिः ॥ इति ॥ श्लोकपूर्वार्धस्यार्थो

जातः ॥ अथोत्तरार्धस्य व्याख्या ॥ तत्र ये भुजकोटिज्ये ते भुजकोट्यंशानां क्रमज्ये ज्ञातव्ये ॥ पुनः ये भु-


१ पृथक् = ३ जकोट्यंशानां क्रमज्ये स्तः ते त्रिज्याभ्यां ऊने नाम भुजज्या कोटिज्या त्रिज्यातो यावद्विशोध्यते तावत् को-

टिभुजांशानामुत्क्रमज्ये ऽवशिष्येते ॥ भुजज्योना त्रिज्या कोट्यंशानामुत्क्रमज्या स्यात् ॥ अथ कोटिज्योना त्रि-

ज्या भुजांशानामुत्क्रमज्या स्यादित्यर्थः ॥ अत्र पृथगिति परं क्रमार्थी ॥ इति ॥ २ ॥ अथ पूर्वश्लोकोत्तरार्धं विव-

(margin) विवृणोति मुत्क्रमज्यांशकवत्

१ स्याताम् = ३   २ कोटिदोरुत्क्रमज्ये भवतः = ३



पंचचत्वारिंशत्भागनामर्धज्याज्ञानमिंद्रवज्रयाह ॥ मू ॥ ज्या चापमध्ये खलु बाणरूपा स्याउत्क्रमज्या त्रिभमौर्विकायाः ॥ वर्गार्धमूलं शरवेदभागजीवा ततः कोटिगुणोपितावान् ॥ ३ ॥

॥ टी ॥ पूर्ववृत्तपरिधौ यत्र ग्रहस्थानं तस्माद्व्यासार्धरेखापर्यंतं यद्रेखारूपसूत्रं सा भुजज्या भुजरूपो ज्ञेयः ॥ सा भुजज्या व्यासार्धरेखायां यत्र संलग्ना भवति तस्मादुपरि वृत्तपरिधिपर्यंतं यत् बाणाकारं त्रिज्यायाः शकलं सा भुजोत्क्रमज्या स्यात् ॥ पुनः द्वितीयमध्यसूत्रे कोटेरुत्क्रमज्या स्यात् ॥ ॥ अथ श्लोकार्थः ॥ ज्याचापमध्ये नाम ज्याचापयोर्मध्येऽन्तराले या बाणरूपा रेखा सा उत्क्रमज्या स्यात् ॥ खलु इत्यनेन उत्क्रमज्यायाः स्वरूपावगमे तदुपपत्तिः सुज्ञेया ॥ त्रिभमौर्विकायाः नाम त्रिभज्यायाः यद्वर्गार्धमूलं तत् शरवेद ४५ भागजीवा स्यात् ॥ ततोनंतरं भुजज्या शरवेद ४५ भागजीवारूपो भुजः त्रिज्याकर्णः ॥ आभ्यां तद्वर्गविश्लेषमूलमित्यादिरीत्या कोटिगुणोपि ~~तावान्भवति~~ यावत्साध्यते तदा सोपि कोटिगुणः नाम कोटिज्या तावान्भवति ॥ नाम भुजज्यामिता भवतीत्यर्थः ॥ अपिशब्दः भुजकोट्योस्तुल्यत्वद्योतनार्थः ॥ अत्रोपपत्तिः ॥ पंचचत्वारिंशत्भागानां ज्या भुजज्या सैव भुजः ॥ अथ च पंचचत्वारिंशत्भागान् नवतिभ्यः ९० — ४५ विशोध्य शेषं ४५ अतः पंचचत्वारिंशत्शेषभागानां ज्या कोटिज्या सैव कोटिः ॥ त्रिज्या कर्णः ॥ कर्णवर्गः भुजकोट्योर्वर्गयोगसमः पूर्वोदाहृतौ पक्षतोस्पष्टं दृश्यते ऽत्र भुजकोट्योर्द्वयोरपि तुल्यता ॥ अतः किं जातं ॥ कर्णवर्गः द्विगुणभुजवर्गसमं ॥ वा कोटिवर्गद्विगुणस्य समं कर्णवर्गः ॥ त्रिभमौर्विका समं कर्णं गृह्णते ॥ यतः भुजवर्गद्विगुणस्य समं त्रिभमौर्विकारूपकर्णवर्गः ॥ अतः त्रिभमौर्विकारूपकर्णवर्गस्यार्धं भुजवर्गः ॥ वा कोटिवर्गो भवितुमर्हति ॥ तस्य मूलं भुजो वा कोटिः ॥ द्वयोस्तुल्यत्वात् ॥ से

॥ यतस्तत्र कोट्यावपि पंचचत्वारिंशत = १२ ॥

॥ यतः भुजकर्णवर्गयोर्विश्लेषमूलं कोटिः अतः भुजकोट्योर्वर्गयोगसमं कर्णवर्गः ॥ इत्यास्याने रु ॥ पिज्ञायते ॥ ४

॥ त्रिभमौर्विकायाः ॥ अतः उक्तं ॥ त्रिभज्यावर्गार्धमूलं शरवेदभागजीवा ततः कोटिगुणोपितावान् भवति ॥

यन्नवतिः ९० भागानां संपूर्णज्या ४८६२ एतदर्धं २४३१ पंचचत्वारिंशत् ४५ भागानामर्धज्या। अर्धज्यायाः सिद्धांते क्रमज्यात्वीकारात्। या अर्धज्या सैव भुजज्या। क्र ५ यत्र द्वे ते = १   ६ अर्ध = गु। ४५।

मज्या वा जीवा वा ज्या वा एभिर्नाम्नैः व्यवहारः सिद्धांते।   ५ सम = २   २६१
वर्गयोगः ३२३६९९६१८ ... ४८६२ २४३१

३४३८   ३४३८

अथवाऽन्यथोच्यते। त्रिज्या भुजः त्रिज्या च कोटिः। भुजकोट्योर्वर्गयोगपदं कर्णः। तत्र क्षेत्रे यो वै कर्णः स तु वृत्तान्तर्गतचतुरस्रक्षेत्रस्य भुज एव। यतः वृत्तान्तर्गतचतुरस्रस्य भुजतुल्यः कर्णो दृश्यतेऽतः वृत्तचतुर्थांशस्य ज्याकर्णः। अर्थान्नवतिः ९० भागानां ज्या सैव कर्णः

५ संपूर्णज्या = ३

५ क्र = ४ इति ज्ञायते। अस्मात् तदर्धभागानां ४५ ज्यामानमभीष्टं ज्ञातुं। अतो भुजकोट्योर्वर्गयोगस्य चतुर्थांशः कृतः। तदेव त्रिज्यावर्गार्धं। सा पूर्वोक्तवर्गयोगस्य चतुर्थांशस्तद्वर्गाश्र्यार्धस्य वर्गयोगो भवति। अत्र भुजकोट्योस्तुल्यता। अतो भुजकोट्योर्वर्गयोगः। भुजवर्गं द्विघ्नं समो वा कोटिवर्गो द्विघ्नो। ज्ञेयः।

त्रिज्या भुजः त्रिज्या च कोटिः। (भु·व × २ = भुव + को·व) अतः $\frac{(\text{भु·त्रिव·}\times 2)}{4} = \frac{\text{भु·त्रिव}}{2}$ ॥ $\frac{\text{भु·१}}{2}$ वर्गः $\frac{\text{भु·१}}{4}$ भुजार्धवर्गः

कोट्यर्धवर्गः $\frac{\text{को·१}}{4} + \frac{\text{भु·१}}{4} = \frac{2}{4} = \frac{1}{2}$ जातं भुजकोट्यर्धवर्गयोगः

भुजकोट्योर्वर्गयोगस्य चतुर्थांशः $\frac{\text{भुव·१} + \text{कोव·१}}{4} = \frac{2}{4} = \frac{1}{2}$ ॥ त्रिज्या एव भुजः $\frac{\text{भु·त्रिव·}\times 2}{4} = \frac{\text{भु·त्रिव·१}}{2}$ एवं जातं भुजकोट्योर्वर्गयोगस्य चतुर्थांशस्त्रिज्यावर्गार्धसमम्। अतस्तन्मूलं शरवेदभागज्येत्युपपन्नम्। अतो क्रमाचार्यैः त्रिभमौर्विकायाः वर्गार्धमूलं शरवेदभागजीवेति। इयं चतुर्विंशज्यासु मध्ये द्वादशी त्यलम्। ३। अथैकद्विराशिज्याज्ञानं ज्ञातज्यासंबंधिभागानामर्धांशानां ज्याज्ञानं चोपजातिकयाह। मू। त्रिभज्यकार्धं खगुणांशजीवा तत्कोटिजीवा खरसांशकानां। क्रमोत्क्रमज्याकृतियोगमूलात् तदलं तदर्धांशकशिञ्जिनी स्यात्। ४। टी। त्रिभज्यकार्धं नाम त्रिज्यायाः यदर्धं तत् खगुणांशः ३० नाम त्रिंशत् ३० भागानां जीवा स्यात्। तत्कोटिजीवा नाम खगुणांशानां या कोटिज्या पूर्वोक्तरीत्या सिध्येत्। तत् तत्परिमाणं खरसांशकानां ६० जीवा स्यात्। भुजज्येत्यर्थः। क्र

मू। = २

५ भुजज्या रूपेत्यर्थः = २

त्रिज्या ३४३८ वर्गः ११८१९८४४ अर्धं ५९०९९२२ मूलं २४३१। ३। एवं पंचचत्वारिंशद्भागानां ज्या क्रमज्या इत्यर्थः ॥ [illegible] ५ श्री ॥ ५ = ५

खगुणांशानां जीवा खगुणांशजीवेति। पष्ठीतत्पुरुषसमासः ५ = २




कर्णः

॥ यथा त्रिभज्यामानं ३४३८ अस्यार्धं १७१९ इयं खगुणांशानां जीवा॰ अर्थादेकराशिज्या॥ भुजज्यामानं॰ १७१९ सिद्धं॥ इति कलितम्॥ कर्णकवर्गात् ३४३८ वर्गः ११८१९८४४ अस्मात्॰ भुजः १७१९ अस्य वर्गे २९५४९६१ शोधिते जातं शेषं॰ ८८६४८८३ अस्य मूलं स्थूलं २९७७ शेषं $\frac{२३५४\times६०}{\text{द्विघ्नं: }५९५४}$ = २३ $\frac{४२५८\times६०}{५९५४}$ = $\frac{२५५४८०}{५९५४}$ = ४३ $\frac{५५५८}{५९५४}$ एवं जातं सूक्ष्ममूलं २९७७।२३।४३ $\frac{५५५८}{५९५४}$ इदं कोटिज्यामानं॥ भुजः १७१९ कोटिः २९७७।२३।४३ कर्णः ३४३८ इदं जात्यत्रिभुजम्॥ अत्रैया कोटिज्या २९७७।२३।४३ सैव खखरसांशकानां भुजज्या २९७७।२३ अर्थात् द्विराशिज्या सैवेत्यर्थः॥ एवं जातैकराशिज्या १७१९ प्रकृते ऽष्टमी॥ द्विराशिज्या २९७७।२३।४३ षोडशी प्रकृतज्यासु मध्ये इत्यर्थः॥ क्रमोत्क्रमज्येति॥ क्रमज्या॰ भुजज्येत्यर्थः॥ येषामंशानां क्रमज्या नाम॰ भुजज्या जाता॰ तेषामंशानां॰ कोटिज्योनात्रिज्या॰ उत्क्रमज्या ज्ञेया॥ अर्थात्॰ त्रिज्यातः कोटिज्यां विशोध्य॰ यच्छेषं॰ तत्॰ भुजज्यासंबंध्यंशानां॰ उत्क्रमज्यामानं भवति॥ क्रमोत्क्रमज्याकृतियोगमूलात्॰ नाम॰ क्रमज्योत्क्रमज्ययोः नाम॰ भुजज्या उत्क्रमज्ययो वर्गयोर्योगात्॰ ऐक्यात्॰ यन्मूलं॰ तस्मात् मूलात्॰ यद्दलं॰ नाम॰ तस्य मूलस्य यदर्धं॰ तत्॰ तदर्धांशकशिंजिनी स्यात्॥ अर्थात्॥ ज्ञातक्रमज्या॰ उत्क्रमज्यासंबंधिभागानामर्धांशाः ये॰ तेषां क्रमज्या स्यात्॰ भुजज्या स्यादित्यर्थः॥ यथा॥ एकराशिक्रमज्या॰ १७१९ एकराशेः कोटिज्या॰ २९७७।२३।४३ त्रिज्यातः ३४३८—२९७७ कोटिज्या विशोध्य शेषं॰ ४६१ इयं एकराशेरुत्क्रमज्या जाता॥ भुजज्या॰ १७१९ वर्गः २९५४९६१ उत्क्रमज्या॰ ४६१ वर्गः २१२५२१ + २९५४९६१ योगः

७५


श्रीः
७४

शु॰ व॰ ७४



॥ अर्धीत्यं चदशभागानां ज्येत्यर्थः ॥ इयं प्रकृते चतुर्थी ॥ अत्रोपपत्तिः ॥ भनन्दाग्नि ३९२७
मितपरिधौ बाणाक्षिरस ६२५ मितो व्यासार्धः श्चेत्तदा चक्रकलातुल्य २१६०० परिधौ किमित्य
नुपातेन लब्धो व्यासार्धः ३४३७ शेषं ९६१/१२३.९ अर्धाधिकत्वाद्रूपस्य जातो व्यासार्धः
३४३८ अस्यैव त्रिज्येति नाम ॥ पुनस्त्रिज्यामितव्यासार्धेन वृत्तं कृत्वा तद्वृत्ते व्यासार्धेन
षट् चिन्हानि कुर्यात् चिन्हद्वयोर्मध्ये रेखां कुर्यात् ॥ एवं वृत्तान्तर्गतषड्भिः रेखैः वृ
त्तान्तः पातिसमषड्स्रक्षेत्रोत्पत्तिर्भवति ॥ तस्यैकैकभुजो व्यासार्धमितो दृश्यते यतो व्या
सार्धेन षट्चिन्हानामंकनं परिधौ कृतं ॥ अतो व्यासार्धमितो भुजमानं ॥ एवं त्रिज्यातुल्यं भुजमानम् ॥ सिद्धं ॥
तथा चैकैकं समषड्स्रक्षेत्रस्य भुजः राशिद्वयस्य संपूर्णज्या सिद्धा ॥ तदर्धं एकराशेरर्धज्या इति ॥ एवं च राशिद्वयस्य
संपूर्णज्यायाः मानं ३४३८ व्यासार्धमितं त्रिज्यातुल्यमित्यर्थः ॥ तस्यार्धं १७१९ इदमेकराशेरर्धज्यामानम् अतो पप
न्नं त्रिभज्यकार्धं खगुणांशा ३० जीवेति ॥ अर्धजीवायाः ज्यासंज्ञाऽप्रसिद्धा ते ॥ मौर्वीज्याशिंजिनी गुणाः जीवापर्या
यशब्दाः ॥ इति ॥ तथा च ॥ राशिद्वयस्य अर्थात् षष्ठिभागानां ६० संपूर्णज्या त्रिज्यापरिमिता अ
र्धज्या तु एकराशेः कोटिज्या २९७७ परिमिता ॥ षष्ठिभागानां ६० संपूर्णज्यामानं ३४३८ प
रिमितं अर्धज्यामानं २९७७ क्रमज्यामानमिदमित्यर्थः ॥ अथैकराशेः या कोटिज्या त
या कोटिज्यया ऊना त्रिज्या ३४३८ — २९७७ = यच्छेषं ४६१ तदेकराशेरुत्क्रमज्यामानम्
एवं च एकराशेरुत्क्रमज्या ४६१ कोटिः ॥ पुनरेकराशेः क्रमज्या १७१९ भुजः ॥ कोटि
भुजाभ्यां निबद्धं सूत्रं कर्णः तत् त्रिंशत् भागानां संपूर्णज्यारूपं अतस्तदर्धं पंचदशभा
गानां अर्धज्यामानं ॥ क्रमज्यामानमित्यर्थः ॥ भुजः १७१९ को ४६१ कर्णः १७७९ । इदमे

(१७७९।४४)



॥श्रीः॥
७५

१८८९१४४

५२
वैकराशेः संपूर्णज्या ३५७९ एतदर्धं १७८९। ~~३~~ राश्यर्धस्य पंचदशभागानामर्धज्या॥ राश्यर्धस्य क्रम
ज्येत्यर्थः॥ त्रिज्या भुजस्त्रिज्या च कोटिः॥ भुजकोट्योर्वर्गयोगपदं कर्णः॥ तत्र भुजस्त्रिज्या ३४३८
वर्गः ११८१९८४४×२=२३६३९६८८ अयं भुजकोट्योर्वर्गयोगो जातः॥ अस्य मूलं ४८६२ $\frac{२६१}{२४३१}$
२४३१ $\frac{२६१}{४८६२}$ =३.४ इयं ४८६२ राशित्रयाणां संपूर्णज्या एतदर्धं २४३१ सार्धैकराशेः क्रमज्या ऽर्धज्येत्यर्थः॥
सार्धैकराशेः कोटिज्यापि २४३१ भुजज्यातुल्येत्यर्थः॥ तथा च कोटिज्यया ना त्रिज्याशेषमिता
(३४३८)−(२४३१)=१००७ सार्धैकराशेरुत्क्रमज्या १००७ जाता॥ एवं क्रमज्या २४३१ भुजः
उत्क्रमज्या कोटिः १००७॥ ~~भुजवर्गः ... कोटिवर्गः~~॥ तत्र भुजः २४३१ $\frac{२६१}{४८६२}$ भागानुबं
धेन जातो भुजः $\frac{११८१९६८३}{४८६२}$ अस्य वर्गः $\frac{१३९७०४९०६२२०४८९}{२३६३९०४४}$ =५९०९९२२ $\frac{२५५२१}{२३६३९०४४}$
भुजवर्गोयं ५९०९९२२ कोटिः १००७ अस्य वर्गः १०१४०४९ तथा च भुजकोट्योर्वर्गयोगः ६९२३९७१ अस्य
मूलं २६३१।२०।३८ कर्णः॥ एवं च सार्धैकराशेरर्थात् पंचचत्वारिंशत् ४५ भागानां संपूर्णज्या २६३१।२०।३८
एतदर्धं १३१५।४०।१९ सार्धद्वाविंशत्यं[अं]शानां क्रमज्या अर्धज्येत्यर्थः॥ सार्धैकराशेः पूर्णज्या २६३१ अर्धज्या
२४३१ च क्रमज्या इत्यर्थः॥ एवं भुजः २४३१ कोटिः १००७ कर्णः २६३१ जात्यत्रिभुजमिदम्॥ एवं सर्वत्र तदर्धां
शकशिंजिनीनामुपपत्तिर्ज्ञेया॥ यतः क्रमोत्क्रमज्ये भुजकोटिरूपे स्यातामतो हेतोः क्रमोत्क्रमज्याकृति
योगमूलं कर्णो भवति तत्तु पूर्णज्यारूपं येषामंशानां क्रमोत्क्रमज्ये भवतस्तेषामंशानां स कर्णः पू
र्णज्या इत्यर्थः॥ यथा पंचचत्वारिंशदंशानां पूर्णज्या कर्णः॥ कर्णार्धं १३१५।४० तदर्धांशानां अर्थात् सार्धद्वाविंश
त्यंशानामर्धज्या॥ सैव क्रमज्या वा भुजज्येत्यर्थः॥ अतो पपन्नं॥ क्रमोत्क्रमज्याकृतियोगमूलाद्दलं तदर्धांश

लीलावती

॥ अथ तदंशार्धानां ज्यानयनं लाघवेन वदन् उक्तरीत्या तत्तदर्धांशानां ज्या भवति प्रकारांतरे
णेतीन्द्रवज्रयाऽऽह ॥ मू० ॥ त्रिज्योत्क्रमज्यानिहते र्दलस्य मूलं तदर्धांशकशिंजिनी वा ॥ तस्याः
पुनस्तद्दलभागकानां कोटेश्च कोट्यंशदलस्य चैवमिति ॥ पुं ॥ टी० ॥ त्रिज्योत्क्रमज्यानिहते र्दलस्य
यन्मूलं नाम त्रिज्या उत्क्रमज्ययो र्घातार्धस्य यत् मूलं तत् तदर्धांशकशिंजिनी नाम यदं
शानामुत्क्रमज्या स्यात् तेषामर्धांशानां शिंजिनी नाम अर्धज्या क्रमज्या वा नाम प्रकारांतरे
ण भवतीत्यर्थः ॥ नन्वेवं षट् जीवाः सिद्धाः नान्याः इत्यत उक्तप्रकारेणैव तदानयनमाह ॥ तस्याः
जीवायाः सकाशात् पुनरेवं उक्तरीत्या तद्दलभागकानां नाम तदर्धसंबंध्यंशानां ज्या ततोपि त
दर्धांशानां ज्येति पुनः पुनरभीष्टार्धज्यायाः सिद्धिः कार्या ॥ च पुनः कोटेः नाम कोट्यंशानां
५ तस्याः = शिंजिन्यपि एवं भवति ॥ कोट्यंशज्यायाः सकाशात् उक्तरीत्या कोट्यंशदलस्य नाम कोट्यं
शार्धानां च पुनः ज्या एवं भवति ॥ ततोपि तदर्धांशानां ज्या इति पुनः पुनर्यावदभिमतसिद्धि
र्न तावदेवं ज्यासाधनं कुर्यात् ॥ अर्थादेतावता सर्वज्यासाधनं कृतमाचार्यैरित्यभिप्रायः ॥
इति श्लोकार्थः ॥ यथा साधैकराश्युत्क्रमज्या १०७ त्रिज्या ३४३८ अनयोर्निहतिः ३४६२०६६ अ
स्य दलं १७३१०३३ अस्य मूलं १३१५।३९ इयं तदर्धांशकशिंजिनी अर्थात्सार्धद्वाविंशत्यंशानां
२२।३० ज्या जाता ॥ यथैकराश्युत्क्रमज्या ४६१ त्रिज्या ३४३८ गुणा १५८४९१८ अर्धं ७९२४५९
अस्य मूलं ८९०।२२ इयं अर्धराशेरर्धज्या जाता क्रमज्येत्यर्थः प्रकृते चतुर्थी ज्या ॥ अत्रोपपत्तिः
१५ अंशानां = १

(॥ श्रीः ॥)
(७६)

७६

१ ज्या = त्रु.द्य.प.=

२९ ७७।२३।४३ १७१९ ३५३८ — १७१९ = १७१९ १७१९

॥ भुजस्यया॰ उत्क्रमज्या॰ तया॰ उत्क्रमज्यया॰ ऊनात्रिज्या॰ यच्छेषं॰ तत्॰ कोटिज्या भवति॰ ॥ तस्याः कोटिज्यायाः स्वरूपमाद्यन्तरसंकेतेनेदम् ॥ त्रि₁ — भु.उ.१ = भु.उ.१ त्रि१ एवं कोटिज्यास्वरूपं ॥ भु.उ.१ त्रि१ जातम् ॥ अस्याः वर्ग ॥ भु.उ.व.१ भु.उ.त्रिभा.२ त्रिव.१ जातोऽयं कोटिज्यावर्गः ॥ भु.उ.व.१ भु.उ.त्रिभा.२ त्रि.व.१ ॥ यत्र द्विराशिज्या भुजः एकराशिज्या कोटिः तत्र त्रिज्या कर्णः ॥ कर्णश्च सर्वत्र ज्यासाधने त्रिज्यामितैव ॥ अतः त्रिज्यारूपकर्णवर्गात् कोटिवर्गे शोधिते शेषं भुजज्यावर्गोऽवशिष्यते॰ यतः भुजकोट्योर्वर्गयोगः कर्णवर्गसमो भवतीति बालैरपि बुध्यते ॥ अतो हेतोः ॥ कर्णवर्गोऽयं ॥ त्रि.व.१ अस्मात् कोटिज्यावर्गे पूर्वोक्ते शोधिते जातोऽयं स्वरूपः ॥ (त्रि.व.१) — (उ.व.१ उ.त्रि.भा.२ त्रि.व.१) = शोधिते शेषं ॥ अत्र संशोध्यमानः स्वमृणत्वमेति स्वत्वं क्षयस्तद्युतिरुक्तवच्च ॥ इति बीजगणितोक्त्या संशोध्यमानोऽत्र कोटिज्यावर्गः ॥ तथा च जातोऽयं शेषः ॥ उ.व.१ उ.त्रिभा.२ धनर्णत्वात्त्रिज्यावर्गस्य त्रिव.१ + त्रिव.१ अस्य नाशात् अवशिष्टोऽयं भुजज्यावर्गः ॥ अथ च॰ भुजज्यारूपोऽयं २९७७ भुजः भुजोत्क्रमज्यारूपोऽयं १७१९ कोटिः ॥ अनयोर्वर्गयोगः कर्णवर्गसमो भवति ॥ अतो हेतोः ॥ भुजज्यावर्गे॰ उ.व.१ उ.त्रि.भा.२ अस्मिन्॰ भुजोत्क्रमज्यावर्गो योज्यः तदा कर्णवर्गः स्यात् ॥ अतः जातोऽयं कर्णवर्गस्वरूपः ॥ (उ.व.१ उ.त्रिभा.२) + (उ.व.१) धनर्णयोरन्तरमेव योगः इत्युक्त्या धनर्णउत्क्रमज्यावर्गस्य नाशात् जातोऽयं कर्णवर्गः ॥ उ.त्रि.भा.२ ॥ तथा च ॥ भुजज्यावर्ग उत्क्रमज्यावर्गः अनयोर्योगस्य॰ अर्थात्॰ क्रमोत्क्रमज्याकृतियोगस्य स्वरूपान्तरमवशिष्टं॰ उत्क्रमज्यात्रिज्याघातो द्विगुण इति॰

(उव.१ उ.त्रि.भा.२) = भुजज्यावर्गः

१ रूपकोटिः = ४

भु.उ.१ | भु.उ.१ त्रि१
भु.उ.व.१ भु.उ.त्रिभा.१
त्रि.१ | भु.उ.१ त्रि१
भु.उ.त्रिभा.२ त्रि.व.१
योगः भु.उ.व.१ भु.उ.त्रिभा.२ त्रि.व.१

२ कर्णवर्गस्य स्वरूपार्थः = १

शि.व.
७६

॥ भुजः २९७७।३३।४३ अस्य वर्गः ८८६४८८३ + २९५४९६१ = ११८१९८४४ कर्णवर्गोयम् ॥ अस्य मूलं ३४३८ कर्णः
॥ कोटिः १७१९ अस्य वर्गः २९५४९६१ ॥ कर्णः ३४३८ द्विराशेः संपूर्णज्या ॥ अस्यार्धमेकराशेरर्धज्या १७१९ क्रमज्या

॥ अस्य मूलं कर्णः ॥ कुतः भुजकोट्योर्वर्गयोगपदं कर्ण इत्युक्तत्वात् ॥ अयं कर्णः द्विराशेः संपूर्णज्यासमं ॥ यतः षडस्रवृत्तेऽस्य भुजः व्यासार्धमितः ॥ अतः द्विराशेः संपूर्णज्या तु एषोयं कर्णः ॥ एवं प्रतिपादितविषयमिदं ॥ कर्णार्धं तु एकराशेरर्धज्या सैव क्रमज्या वा भुजज्यैकराशेः ॥ अतो ऽस्य कर्णवर्गस्य ॥ उ·त्रि·भा·२ ॥ यन्मूलं तस्य मूलस्यार्धं एकराशेः भुजज्या ॥ तथा च कर्णवर्गस्य उ·त्रि·भा·२ मूलदलं ग्राह्यं परंतु लाघवात् अस्यैव कर्णवर्गस्य दलं मूलं गृहीतमाचार्यैः एवं च कर्णवर्गसंबंधि मूलदलस्य वर्गः पूर्वकर्णवर्गस्य चतुर्थांशेन तुल्यो भवति ॥ यथा कर्णवर्गः ६४ कल्पिते अस्य मूलदलस्य वर्गः १६ अयं कर्णवर्गः ६४ अस्य चतुर्थांशेन १६ तुल्यः मूलदलवर्गो दृश्यते ॥ तथा च कर्णवर्गस्यास्य ॥ उ·त्रि·भा·२ ॥ मूलदलस्य वर्गे चतुर्थांशरूपत्वात् वर्गेण वर्गं गुणयेद्भजेच्च इत्युक्तत्वाच्च उत्क्रमज्यात्रिज्याघातद्विगुणरूपस्य कर्णवर्गस्यास्य ॥ उ·त्रि·भा·२ ॥ चत्वारो ४ हरो ऽपपन्नः ॥ तथा जातं ॥ $\frac{\text{उ·त्रि·भा·२}}{४}$ पुनर्भाज्यहरयोर्द्विभ्यामपवर्तने जातोयं रूपांतरं ॥ $\frac{\text{उ·त्रि·भा·२}}{२\times२} = \frac{\text{उ·त्रि·भा·१}}{२}$ ॥ एवं कृते [illegible] वर्गस्य रूपो जातः $\frac{\text{उ·त्रि·भा·१}}{२}$ तथा च उत्क्रमज्यात्रिज्याघातार्धः [illegible] वर्गोऽवशिष्टः ॥ अस्य मूलं उत्क्रमज्यासंबन्ध्य ऽर्धांशानामर्धज्या भवति क्रमज्येत्यर्थः ॥ अर्थादुत्क्रमज्यात्रिज्याघातार्धस्य ऽ $\frac{\text{उ·त्रि·भा·१}}{२}$ स्य मूलमुत्क्रमज्यासंबन्ध्यर्धांशानामर्धज्या भवति सैव क्रमज्या भुजज्या वा इत्यर्थः ॥ अत्रोपपन्नम् त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलं तदर्धांशकशिंजिनी वा इति ॥ एवमर्धांशकज्योत्पत्तिसाधनेन सर्वा अपि जीवास्तत्र द्रुपा उत्पत्स्यंतीति तस्याः पुनस्तद्दलभागकानामित्याद्युपपन्नम् ॥ इत्सलम् ॥ ५ ॥ श्रीः ॥

इत्यर्थः ॥ एकराशिभुजज्याकलितामिति ॥ श्रीरस्तु

× स्य = ५

× तदर्धांशकशिंजिनी × = ६

× यदंशानामुत्क्रमज्या तदर्धांशकशिंजिनी × = ५

श्रीः
७७

77

॥ नन्वेवं नियमाः ज्याः कियंत्यः साध्याः न ह्युक्तरीत्या पूर्णभागानामेव ज्याज्ञानं येन नवतिमिति
यता स्युरित्यत उत्तरं प्रकारांतरेण जीवाज्ञानं चापजातिकयाह ॥ मू॰ ॥ एवं त्रिषड्भूयीजिनादि
संख्या अभीष्टजीवाः सुधियाविधेयाः ॥ त्रिज्यास्थरत्नेभगांणं कृते वा ग्राह्या अभीष्टाविगणय्य जीवाः
इति ॥ ६ ॥ टी॰ ॥ एवं नाम अर्धांशज्यासाधनप्रकारेण अभीष्टजीवाः नाम अ
भीष्टांशानां ज्याः सुधिया नाम गणकेन विधेयाः नाम सिद्धाः कार्याः ॥ विधा
तुं योग्याः इत्यर्थः ॥ अयमर्थः ॥ यथा धीवृद्धिदतंत्रे ब्रह्मगुप्तैरस्मद् दादागुरु
भिः चतुर्विंशति २४ जीवाः स्वीकृताः नवत्यंशेषु ॥ तेष्वयन्मिताः ज्या इष्टा
अथवा येयद्देशानां ज्या इष्टा तत्संख्यया सहाऽनुपातः कार्यः ॥ यथास्माकं
द्वादशी ज्या इष्टा कियद्देशानां सा जीवा इति प्रश्नेऽनुपातः ॥ चतुर्विंशतिज्या
त्रिज्या सा नवत्यंशानां चेत्तदा द्वादशी ज्या कियत्परिमितानामस्ति ॥ एवं कृते
जाता ॥ २४ : १२ : : ९० ॥ $\frac{४५×२×१२}{१२×२}$ = अंशाः ४५ पंचचत्वारिंशत् अतो ज्ञातं
पंचचत्वारिंशदंशानां द्वादशी जीवेति ॥ अथवा ॥ पंचचत्वारिंशदंशानां ४५
जीवा का ॥ चतुर्विंशज्यासु मध्ये कतमास्ति इति प्रश्ने चानुपातः ॥ यदि नवत्यंशानां
९० जीवा चतुर्विंशमिता तदा पंचचत्वारिंशदंशानां ज्या कियन्मिता ॥ एवं तथा च जातं द्वादशीति ॥
न्यासः ॥ (९० । ४५ । २४) = $\frac{४५×१२×२}{४५×२}$ = लब्धं द्वादशी ज्येति ॥ एवं यल्लब्धं तदंतरेणाऽभीष्टा ज्या उक्त
रीत्या साध्याः ॥ अत्र सुधियेति हेतुगर्भम् ॥ तेनाऽर्धांशज्याप्रकारेण तदंतराभावेन यत्र ज्या सिध्यति सापेक्ष
णीया ॥ यत्र च तदंतरेण ज्याऽसिद्धिस्तत्र पूर्वापरज्याभ्यामनुपातेन जीवा साध्या इति सूचितम् ॥ तत्रोदा



॥ ७७ ॥

व=४

३ ६ १२ २४

यथा ग्रन्थे ॥ चतुर्विंशतिजीवा कल्पनेनैं त्रिषट्सूर्यजिनाद्याश्चतुर्विंशतिजीवा उक्तरीत्योपपन्नाः भवन्ति ॥ यथा पंचचत्वारिंशत् ४५ दंश ज्यायाः सकाशादर्धज्यासाधनरीत्या षष्ठी तृतीया जीवा भवति नान्या ॥ तदुद्देशेन एकविंशत्यष्टादश्यौ जीवयोरुद्देशः कोटिज्याया उपजीव्यत्वात् अर्थात् षष्ठी ज्या भुजरूपा अष्टादशी ज्या कोटिः ॥ पुनः तृतीया ज्या भुजरूपा एकविंशति ज्या कोटिः ॥ एवमष्टादश्याः सकाशात् नवमी पंचदश्योः ॥ नवमी भुजरूपा २४−९ = १५ पंचदशी कोटिरूपा ॥ आदिपदादेकराशिज्यामूलकानां तदितरजीवानां च संग्रहः ॥ अर्थात् यथा पंचचत्वारिंशदंशानां ज्यारूपमूलकानां षष्ठतृतीय अष्टादश एकविंश नवम पंचदश ज्यानां संग्रहो दर्शितस्तथा एकराशि ज्यारूपमूलकानां तदितरजीवानां च संग्रहो विधेयः ॥ अत्र ज्या पदं क्रमज्योत्क्रमज्यापरं ॥ ननु कथं प्रकारेणाभीष्टांशानां ज्याज्ञानाऽसंभवात् अनुपातस्याप्यऽसंगतत्वादित्यतः प्रकारांतरेण सूक्ष्मजीवाज्ञानमाह ॥ त्रिज्येत्यस्य वृत्ते इति ॥ वा प्रकारांतरे ॥ भगणांकिते त्रिज्योत्थवृत्ते अभीष्टाः जीवाः विगणय्य नाम अंगुलैर्गणयित्वा ग्राह्या ॥ मानानि परिमाणानि अंगुलैर्मित्वा ज्ञेयानीत्यर्थः ॥ एवं वा प्रकारांतरेऽपि ज्याज्ञानं स्यात् ॥ एतदुक्तं भवति ॥ समभूमौ त्रिज्यामितेन व्यासार्धेन वृत्तं भांशांकितं कार्यं तत्र वृत्तमध्ये ऊर्ध्वाऽधरा तिर्यक् च रेखा कार्या रेखासक्तपरिधिभागदेशादुभयत्र समांतरे ताच्चिन्हं कार्यं ॥ तच्चिन्हाऽवधि ऊर्ध्वा रेखा सावधि दत्तः स्थितपरिधिभागानां संपूर्णज्या भवति ॥ तदर्धसूत्रं ऊर्ध्वरेखैकतरचिन्हयोरंतररूपरेखावधिपरिधिसंपातचिन्हांतरपरिधिप्रदेशस्थितभागानामर्धज्याः तन्मानं यन्मापकेन त्रिज्या कल्पिता तन्मापकेन स्वगणयित्वा ज्ञेयं एवं स्वेच्छयाऽभीष्टांशानां सूक्ष्मज्या सिध्यतीति ॥ [illegible] ॥ अस्योदाहरणमुत्तरत्र स्पष्टं द्रष्टव्यम् ॥ अथ चतुर्विंशति जीवानामंशज्ञानमनुपातेनाऽनुवदति सम ॥ यदि चतुर्विंश

ज्या नवत्यंशानां तदा प्रथमज्यांकेषामंशानां ॥ $\frac{९०\times१}{२४}$ एवमपवर्तनेन प्रथमज्यांशाः $\frac{१५}{४}$ ॥ पादोनचतुरंशो
॥ नां प्रथमज्या · २२५ एवमन्यानपि ज्ञेयम् · ५६ ॥

७8

२४ यवाः

॥यथा॥ चजरेखा ऽङ्गुलमिताव्यासरूपा राशि[illegible] सं पूर्णज्या तथा ऽ
र्द्धरेखाऽपि॥ एवं च घ रेखा सार्धाङ्गुलमिता व्यासार्धरूपा राशित्रयाणां
ऽर्धज्या सैव त्रिज्याख्या॥ पुनः टठरेखा चतुर्णां राशीनां संपूर्णज्या॥ व
ऽथ च॥ टड रेखा राशिद्वयस्य ऽर्धज्या क[illegible]मज्येत्यर्थः तथा छ
ड ढ रेखापि ज्ञेया राशिद्वय[illegible]स्याऽर्धज्या॥ अत्र जघ रेखा घधरे
खा च व्यासार्धाख्या त्रिज्या तस्याः मानं सार्धाङ्गुलम्॥ तथा टडरे
खा डठरेखा च राशिद्वयस्याऽर्धज्यायाः मानमेकादश यवपरिमितम्
अर्थात् द्वादशयवसंख्याकं त्रिभज्यामानम्॥ एकादश ११ यवसंख्याकं
राशिद्वयस्य ज्यायाः मानमित्यर्थः॥ एवं चतुर्विंशतिजीवाज्ञानं सूक्ष्मं ज्ञेयं॥
अत्राधो लिखितचक्रे॥ प्रथमज्या पादोन चतुरंशानां॥ द्वितीयज्या सार्धसप्तांऽशं
शानां तृतीयज्या सपादैकादशांशानां एवमन्यासां जीवानामंशाः ज्ञेयाः॥ इत्यलम्॥ श्रीरस्तु॥



जीवांकाः	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
अंशाः	१५/४ ३॥।	१५/२ ७॥	[illegible]	१५	[illegible]	४५/२ २२॥	१०५/४ २६।	३०	३३ ॥।	३६॥	४१।	४५	४८ ॥।	५२ ॥	। ५६	[illegible]	६३ ॥।	६७ ॥	। ७१	७५	७८ ॥।	८२ ॥	८६ ।	९०

तत्र एकराशेर्ज्या ऽष्टमं ज्याखंडम् ॥ एकराशेः कोटिज्या षोडशी १६ ॥ शरवेदभागज्या द्वादशी १२ ॥ अस्मात् खंडत्रयात् कथितप्रकारेण चतुर्विंशति २४ खंडान्युत्पद्यंते ॥ तद्यथा ॥
॥ अर्धार्धक्रमेण एकराशेर्ज्यातस्तथा शरवेदभागज्यातः चतुर्विंशजीवानामुत्पत्तिरधश्चक्रे द्रष्टव्या ॥ ६

भुजः	कोटिः	
८।४ २।१	१६।२० २२।२३	[illegible]
१४।१९	९।१५	
१३ १३।७	११।१८	
साधराशिज्यातः	४५ अंशाः	
१२ भु.	को. १२	[illegible]
६।३	१८।२१	
१५।	९।	
२४ त्रिज्या.		

भुजः		कोटिः
८	—	१६
४	—	२०
२	—	२२
१	—	२३
१४	—	१०
१९	—	५
२३	—	१
७	—	१७
१२	—	१२
६	—	१८
३	—	२१
१५	—	९

[illegible]

ननु इदमर्थान्तरमहगणितनीतग्रहस्पष्टत्वं कुतइति प्रश्नोत्तरांगभूतस्पष्टक्रियोपपत्तिकथनस्यावश्यकत्वादित्यत आह कर्कि कयाह ॥ इति ज्योत्पत्तिरिति ॥ तत्कथमेनेपि ज्याधीनं स्पष्टक्रियायाः ज्योपजीव्यत्वादतः प्रथमोपस्थित ज्योत्पत्तिः प्रतिज्ञाता निरूपितेति नार्थांतरमिति भावः ॥ मू. ॥ ज्योत्पत्तिसारं सकलं विधाय श्रीभास्कराचार्यवरैस्तु तो वै ॥ शिष्टं तथानेकप्रकार ग्रोकदिष्यत्तर=
=५
सिद्धं ज्योत्पत्तिकां ग्रंथसमाप्तिकाले ॥ ७ ॥ ज्योत्पत्तिसारोऽभिहितो त्र सर्वः श्रीभास्करैर्दैवविदग्रगण्यैः ॥ ज्योत्पत्तिमाख्यास्यतिशिष्टरूपां सविस्तरं ग्रन्थसमाप्तिकाले ॥ ८ ॥ नत्वा श्रीगुरुपादपद्मयुगलं ध्या

त्वांतुवागीश्वरीं तेषांपादसरोरुहद्वन्द्वभ्रमरलतोलब्धाचतुर्द्धेलिवं ॥ सिद्धांतशिरोमणौ विवर
णे टीकांतमधंसिनी शालिग्राममहुधीर्हितां प्रकुरुते या पठ्यवा लोवुधः ॥ १ ॥ मयूख
माला यासाधं ये पठंति शिरोमणी मू· ॥ तेषां शिरोमणिग्रंथः मुक्ताहारो भविष्यति ॥
~~इतिश्रीसिद्धांतशिरोमणौ मयूखमालायां ज्योत्पत्तिकथनाध्यायः समाप्तः ॥ श्रीरस्तु ॥ श्री ॥~~
इतिश्रीकृष्णदत्तात्मजशालिग्रामगणकविरचितायांमयूखमालायांज्योत्पत्तिकाध्यायः
समाप्तः ॥ शुभम् ॥ श्रीरस्तु ॥ संवत् १९४२ माघव ४ जम्मूक्षेत्रे ॥ श्रीशारदायैनमः ॥

॥ श्रीः ॥ श्रीकृष्णायनमः ॥ श्रीशारदायैनमः ॥ श्रीः ॥

॥ ज्योत्पत्तेः पत्राणि ॥ ८ ॥

॥श्रीः॥ अथ संसिद्धाद्युगणाद्युगादिभगणैरित्यादिश्लोकोत्तरभूतस्पष्टक्रियावासनानिरूपयिषुः
प्रथमं फलवासनां संक्षिप्तां वक्ष्यमाणार्थनिरूपणसंगतिसूचकां शार्दूलविक्रीडितेनाह॥ मू॰॥
भूमेर्मध्ये खलु भवलयस्यापि मध्यं यतः स्याद्यस्मिन्वृत्ते भ्रमति खचरो नास्य मध्यं कुमध्ये॥
भूस्थो द्रष्टा नहि भवलये मध्यतुल्यं प्रपश्येत्तस्मात्तज्ज्ञैः क्रियत इह तद्दोःफलं मध्यखेटे॥१॥
॥टी॰॥ यतः यस्मात्कारणात् भूस्थः नाम भूगर्भस्थः द्रष्टा नाम ग्रहबिंबद्रष्टा कश्चित्पु
रुषः मध्यतुल्यं नाम अहर्गणानुपातसिद्धग्रहभोगतुल्यं ग्रहबिंबस्थानं भवलये नाम
वक्ष्यमाणरूपक्रांतिवृत्ते न प्रपश्येत् पुनः यतः कारणात् भूमेर्मध्ये नाम भूगोलम
ध्यकेंद्रभागे भवलयस्यापि मध्यं स्यात् यतः॥ अपिशब्दात् नक्षत्रगोलान्तस्स्थस्वस्वा
काशभागे प्रवहभ्रमानुरक्तग्रहकक्षावृत्तानां भूगर्भकेंद्रमित्यर्थः॥ पुनः यस्मिन्वृत्ते ख
चरः ग्रहः भ्रमति पूर्वगत्या भगणभोगं करोति अस्य वृत्तस्य मध्यं नाम केंद्रं कुमध्ये
नाम भूगोलगर्भे यतः न स्यात्॥ तस्मात्कारणात् तज्ज्ञैः नाम मध्यस्पष्टविवेकवि
द्भिः तत् नाम स्पष्टाधिकारोक्तं दोःफलं नाम भुजफलं इह नाम अहर्गणानुपातसिद्ध
मध्यग्रहे क्रियते नाम संस्क्रियते॥ यथा नक्षत्राणां सदैकरूपो दृश्यते अतः नक्षत्रगोलभूगो

लाऽभितः समांतरे लग्नैः क्रांतिवृत्तमपि तत्
॥ याति ॥ अग्रे च ॥

नक्षत्रपंजरगोलस्थ=८

मध्यखेटे=२

(ग्र०ग०)
८

80

ग्रहबिंबानामेकरूपत्वेनदर्शनाऽभावादणुचक्षुर्बिंबदर्शनान्यथानुपपत्त्याग्रहबिंबा
धिष्ठितवृत्तं भूगोलाद्भिन्नः समं ततेणनालीतिकल्पितं॥ गणितस्य भूगर्भसंबं
धेनोक्तत्वात्॥ अयमर्थः॥ रेवतीस्थानात्मेघाद्यं किलद्वादशराशिभागाद्यंकितेकांति
वृत्ते यत्राऽहर्गणेनानुपातसिद्धग्रहभोगमित्यारेवतीस्थानात् ग्रहबिंबं तत्समसूत्रे
णग्रहकक्षासां ग्रहबिंबं भूगर्भगद्रष्टा न पश्यति॥ यत्र च ग्रहबिंबं पश्यति॥ त
योः स्थानयोरंतरे मंदफलं॥ तेन पूर्वग्रहचिन्हं म हर्गणेनानुपातसिद्धं संस्कृतं स्प
ष्टग्रहस्थानं भवति॥ अतएव पूर्वग्रहचिन्हसमसूत्रेण ग्रहबिंबादर्शनादहर्ग
णेनाऽनुपातसिद्धोग्रहोमध्यो नस्फुट इति पंडित प्रमाणं॥ अत्रापि कारणं॥ भू
मेर्मध्येइति॥ इत्यलं॥१॥ ननु उच्चकेन्द्रभुजकोटिज्यादेः स्वरूपानवगमात्
किंच उक्तरीत्या फलज्ञानादाकाशस्थितकल्पितनक्षत्रयोरतिदूरस्थत्वेन
तद्विभागाद्यऽवयवानां मनुष्यनेत्राऽगोचरत्वादित्यतोऽनुष्टुभाह॥ मू॥ पूर्वा
परायतायां तु भित्तावुत्तरपार्श्वके॥ दर्शयेच्छिष्यबोधार्थं लिखित्वा च्छेद्यकं सु

॥२॥ ... कूटस्थानस्थितं॥

शिव
८

॥टी॰॥ सुधीः गोलाऽभिज्ञो गणकः ॥ पूर्वापरायतायां॰ नाम॰ पूर्वापरं॰ दैर्घ्यं॰ यस्यास्तस्यां भित्तौ॰ उत्तरपार्श्वके
नाम॰ उत्तरदिक्स्थितायां॰ छेद्यकं॰ नाम॰ वक्ष्यमाणस्पष्टक्रियोपपत्तिबोधकपरिलेखं॰ लिखित्वा॰ शिष्यबो
धार्थं॰ दर्शयेत्॰॥ इतिश्लोकार्थः ॥ सुधीत्यनेन शिष्याणां तदुपपत्तिबोधो यथा स्यात्तथा प्रकारः कल्पनीयः इति
सूचितं॰॥ अत्र भूमौ छेद्यकलिखने भूम्या भित्तौ भ्रमणग्रहाणां प्रत्यक्षासिद्धं न अतो भित्तौ तल्लिखनमुक्तम्॰॥ पुनः
नक्षत्रग्रहताराणां पूर्वपश्चिमभ्रमणं तत्॰ पूर्वापरायतायामित्युक्तम्॰॥ तत्रापि दक्षिणदिक्स्थभित्तौ छेद्यक
लिखने॰ पूर्वापरभ्रमणादर्शनोपलंभः स्यात्तन्मेषादिराशीनां लिखनमपसव्येन स्याच्च॰ उत्तरदिक्स्थ
भित्तौ तल्लिखने मेषादिराशीनां लिखनं सव्येन भवतीत्युत्तरपार्श्वके इत्युक्तं॰ सव्यक्रमस्य मांगलिकत्वे
न शिष्टसम्मतत्वाच्च॰॥२॥ ननु वक्ष्यमाणछेद्यकरूपदृष्टान्तेन आकाशस्थितपदार्थस्यासिद्धिः कथमवगता॰
आकाशस्थिततद्दृश्यरूपस्य मनुष्यनयनाऽगोचरत्वेन तद्ज्ञानासिद्धेरित्यत आह उत्तरं शार्दूलविक्रीडितेनाह॰॥
मू॰॥ दिव्यं ज्ञानमतीन्द्रियं यदृषिभिर्ब्राह्मं वसिष्ठादिभिः पारंपर्यवशादिदं सुमवनीं नीतं प्रकाश्यं ततः ॥ नैतद्द्वे
षिकृतघ्नदुर्जनदुराचाराचिरावासिनां स्यादायुः सुकृतं क्षयो मुनिकृतां सीमामिमामुक्तः ॥३॥
॥टी॰॥ यत्तच्छेद्यकं॰ वसिष्ठादिभिः ऋषिभिः पारंपर्यवशात्॰ यथायोग्यपरस्परकथनात्॰ अवनीं॰ असमदाद्य
धिष्ठितभूप्रदेशविशेषं॰ नीतं॰ आनीतं॰ लोकविषयीकृतमित्यर्थः ~~ततः प्रकाश्यं॰ तस्मादनंतरं लोके~~
~~प्रकाश्यं तुयोग्यो जातः~~ ॥ किंभूतं छेद्यकं॰ ज्ञानं॰ नाम॰ आकाशस्थितग्रहस्थितिप्रतिपादकम्॰॥ पुनः किंभूत
मतीन्द्रियं ॥ इन्द्रियनिष्क्रान्तं॰ मनुष्यदृग्वाक्कमनसा
मविषयम्॰॥ पुनः किंभूतं ॥ ब्राह्मं॰ ब्रह्मण इदं ब्राह्मं ॥ ब्रह्मणा
॥ निर्मितमित्यर्थः ॥

॥ श्रीः ॥
८१

81

॥ पुनः किंभूतं ॥ दिव्यं · दिविभवं दिव्यं ॥ स्वर्गलोकैकविषयं ॥ ब्रह्मणस्तत्राधिष्ठानात् ॥ ननु स्वर्गे
मनुष्याणां गमनासंभवात् कथमागतं ॥ अत आह ॥ ऋषिभिरिति ॥ स्वतपः सामर्थ्यादिच्छाया
नुग्रहसमर्थैः इत्यर्थः ॥ अन्यथा · स्वर्लोकस्य भूप्रदेशविशेषत्वात् प्रथमतएवाऽवनीस्थत्वाद
वनीनीतमित्यस्याऽनुपपत्तेः ॥ तथा च ॥ वसिष्ठस्य ब्रह्मपुत्रत्वात् · तद्द्वारा मांडव्यर्षेर्ब्रह्मज्ञाना
त् · ततोप्यन्यर्षीणां ज्ञानादिति तेषां सर्वभूगोलगमनाश्रयत्वाद् त्रागतमिति भावः ॥ ननु तथा
प्येतस्य दिव्यत्वासिद्धिरत आह ॥ पुनः किंभूतं · रहस्यं · नाम · गोप्यं ॥ तथा च · दिव्यत्व दिव्यगो
प्यत्वमधिकं सिद्धमन्यथाऽगोप्यत्वे दिव्यत्वभंगापत्तिरविशेषादिति भावः ॥ ननु एतस्य गोप्य
त्वे · पूर्वं दर्शितेच्छिष्यबोधार्थमिति कथमुक्तमत आह ॥ प्रकाश्यमिति ॥ योग्यपुरुषाय देयमि
ति भावः ॥ एवंभूतं छेद्यकं · द्वेषिकृतघ्नदुर्मुखकुराचाराऽचिरावासिनो · न प्रकाश्यं · यतः गोप्यं
ततः कारणात् एषां न प्रकाश्यं · इति भावः ॥ तथा चोक्तं ॥ भक्ताय शिष्याय चिरोषिताय गुणो
पपन्नाय च देयमेतत् ॥ भ्रात्रे च मित्राय च सूनवे च सुदुर्लभं छेद्यकगोलतंत्रमिति सिद्धांतशेखरेक्ते
श्च ॥ ननु · उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ॥ अपकारिषु यः साधुः स साधुः सद्भिरुच्य
ते · इत्युक्त्या · विप्राद्यऽयुक्तानामपि देयमित्यत आह ॥ इमां उक्तां · सीमां · नाम · नैतद्द्वेषीत्यादि
मर्यादां · उत्क्रतः नाम · त्यक्तः · ब्राह्मणस्य · आयुः पुनः सुकृतं · अनयोर्नाशः स्यात् ॥ सुकृतं ·

स्वार्जितपुण्यमैहिकं · पूर्वजन्मार्जितं वा ॥ ननु त्व
दुक्तसीमोल्लंघनेन कथमायुः सुकृतत्रयः स्यात् ·

ऽदयः नाम = १

शिव ·
८१

५ एवं चेत्तत्तस्मत्सीमोल्लंघनेनायुस्सुकृतयोः क्षयो भवितुमर्हतीति भावः = १

॥ अन्यथाऽतिप्रसंगापत्तिरित्यत आह ॥ मुनीकृतामिति ॥ किंभूतां सीमां वसिष्ठाद्यृषिप्रणीतां तथा
च नक्तीतिः ॥ न च ॥ विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि असूयकायाऽनृजवेऽश
ठाय न मां ब्रूयादऽवीर्यवती यथा स्यामिति श्रुत्या विद्यायाः नैर्वल्यस्य उक्तत्वादायुः सुकृतक्षयो
क्ति श्रुतिविरोधः इतिवाच्यं ॥ यो यस्य दुःखं ददाति तस्याऽशुभं नाशं च वा करोतीति नियमात् ऋषि
भिः श्रुत्यर्थवाक्यस्य एवोक्तत्वात् ॥ ननु कर्मणः भोगेन नाशात् आयुषः नैयत्यात् कथं आयुः
सुकृतयोः क्षयः वक्तुं युज्यते ॥ इति चेदुच्यते ॥ सा दायुस्सुकृतक्षयः इत्यस्याऽऽयुषार्जितं यत्सु
कृतं तस्य क्षयः इत्यर्थान्न किंचिद्विरुद्धम् ॥ यथा इन्द्रपदभोगकालस्य नियतत्वेपि नहुषस्ये
ग्रा=८ न्द्रपदच्युतिर्दोषो जातः ॥ शापादितिपुराणादौ श्रवणाच्च ॥ अन्यथानीतिशास्त्रस्य व्यर्थतापत्तिरिति संक्षेपः ॥
इत्यलं विस्तारभयात् ॥ ३ ॥ अथ पंक्तिद्यक विशेषात्र कथने कर्तार वृत्त भू वृत्तयोर्लिखनमुपजातिक
याह ॥ मू ॥ त्रिभज्यकासंमितकर्कटेन कर्तारवृत्तं प्रथमं विलिख्य ॥ तन्मध्यतो मध्यमखेटभुक्ति
तिथ्यंशमानेन महीसुवृत्तं ॥ ४ ॥ टी ॥ त्रिभज्यकासंमितकर्कटेन नाम कंशलाकया अपयो
रंतरे स्वेच्छया त्रिज्याप्रमाणं धृत्वा परिकल्प्य अभीष्टस्थानात् तेन प्रमाणेन कर्तारवृत्तं नाम
कर्तासंज्ञं वृत्तं प्रथमं नाम आदौ विलिख्य नाम लिखित्वा पुनः तन्मध्यतः नाम तस्य वृत्तस्य मध्य

॥ मध्यगतिपंचदशांशेन ॥

केन्द्रात् इसः ततः मध्यमखेटभुक्तिनाम मध्यग्रह
गतिकलानां तिथ्यंशमानेन नाम पंचदशांशप्र
मितव्यासार्धेन सुवृत्तं मही नाम पृथ्वीसंज्ञं वृत्तं ॥

x ग्रहाणां ११८५९ ३/४ गतियोजनानि प्रत्यहम् = २

॥ लिखेत् ॥ मध्यमकक्षावृत्तस्य भूगर्भत्रिज्यामितकलांतरत्वात् भूगोलदृष्टवृत्तस्य भू
व्यासार्धयोजनैर्भूगर्भत्तोंतरितत्वात् भूव्यासार्धयोजनानां च ग्रहयोजनात्मकगतिपं चदशांशा
मुन्नत्वात् मध्यगतिकलापंचदशांशेनैव भूवृत्तस्य लिखनं सम्यगुक्तं कलासाहचर्यात् अथच
x क-४ योजनात्मव्यासार्धेन कक्षावृत्तलिखनं भूव्यासार्धयोजनैरेव भूवृत्तलिखनं तु न तत्कर्मोपपत्ति
दर्शनार्थमिति ~~ध्येयं~~ अन्यथा विंदुरेव भूः कल्पते ॥ अर्थीदेधादिविषये मध्यमकक्षावृत्त
स्य यद्विंदुरूपकेन्द्रं तदेव भूः कल्पनीया इति तात्पर्यार्थः ॥ वृत्तयोर्लेखनं भिन्नेरुत्तरपार्श्वे ॥४॥ x तु=६
अथ ~~क्रांति~~ क्रांतिवृत्ते कक्षाख्ये खेटोच्चयोर्दानं वृत्तस्य समचतुर्भागज्ञानार्थं रेखाद्वयसन्निवेशं चाप
जातिकयाह ॥ मू० ॥ कक्षाख्यवृत्ते भगणांकितेत्र दत्त्वोच्चखेटौ क्रियतोऽथ रेखा ॥ कुमध्यतुंगोपरि
गा विधेया तिर्यक्कृतत्तोन्या सुधिया कुमध्ये ॥ ~~१~~ टी० ॥ अथाऽनंतरं सुधिया गणकेन अत्र ना
म भिन्नात् उत्तरपार्श्वे लिखितकक्षावृत्ते उच्चखेटौ उच्चग्रहौ मध्याधिकाराऽऽनीतौ दत्त्वा तत्रचि
न्हे कृत्वा रेखा कार्या ॥ आकाशस्य कक्षावृत्ते उच्चग्रहस्थानयोः सत्त्वात् तद्दानं स्यर्थं अतः आकाश
स्य कक्षावृत्तवारकं अत्र इति पदं वोध्यं ॥ पुनः अत्र इत्युक्तौ भूवृत्ते उच्चग्रहयोर्दानापत्तिः स्यात् अत
स्तन्निवारणार्थं कक्षावृत्ते इत्युक्तं ॥ ननु वृत्ते ग्रहोच्चयोर्दानमशक्यं स्थानस्याज्ञानाऽभावात् अतस्तदाह ॥
कथंभूते कक्षावृत्ते भगणांकिते ॥ द्वादशराशिभागकलाविकलादिभिः तुल्यांतरेणांकिते ॥ तथा च
वृत्ते ग्रहोच्चयोर्भागाणां नात्स्या तस्य ज्ञानं सुलभं ॥ ननु तथाप्यवधिप्रदेशाऽनियमात् कथं ज्ञानं अत

अभीष्टस्थानेमे षादीं प्रकल्प्य कक्षावृत्ते उच्चग्रहौ दत्ते त्यर्थः =

४ स्थानात्कस्मात् ग्रहोच्चयोरर्दानेरवृत्तेकार्यम्· तथाच उच्यते ४=१

॥आह॥ क्रियत इति॥ तथा च· वृत्ते सव्यक्रमेण मेषादि राशीनां कथितत्वात्· क्रियतः मेषादि दिस्थानात्· ग्रहोच्चयोः स्थानज्ञानं भवत्येवेतिभावः॥ अथ वृत्ते रेखा कथं कार्येत्यत आह॥ किंभूता रेखा॥ कुमध्यतुंगोपरिगा॥ कुवृत्तं मध्ये यस्याः सा· कुमध्या॥ कुमध्या चासौ तुंगोपरिगा इति कुमध्यतुंगोपरिगा· अर्थात् उच्चस्थानात्षड्भांतरेण चिन्हं कृत्वा· पुनः श्चिन्हस्थानात्· उच्चस्थानपर्यंतं ऋज्वी वृत्तमेममध्यभागस्थविंदुस्पृष्टा रेखा कार्येत्यर्थः॥ कस्मिन्· कुमध्ये· कुवृत्तं मध्ये यस्याः एतादृशे कक्षावृत्ते॥ ततः नाम· उच्चरेखायाः सकाशात् अन्या नाम द्वितीया· तिर्यक् रेखा· सुधिया गणकेन विधेया· कार्येत्यर्थः॥ सुधिया इत्यनेन· उच्चस्थानात् उभयत्र नवत्यंशांतरेण तद्रेखाग्रस्यादिति सूचितं॥ ५॥ ननूच्चस्थानात् कक्षावृत्तस्य चतुर्भागाः कुतः कृताः कस्माच्च ग्रहस्थानानकृताः इत्यतः प्रतिमंडलादिलिखनमाह॥ मू॥ उच्चोन्मुखी मंत्यफलज्यकां च दत्वा कुमध्यात् क्षितिवृत्तदग्रे॥ त्रिभज्ययैव प्रतिमंडलाख्यं सैवोच्चरेखात्त्वपरात्र तिर्यक्॥ ६॥

॥टी॥ कुमध्यात् नाम· कुवृत्तस्य मध्यस्थानं बिंदुरूपं यत् तस्मात्· उच्चोन्मुखी· नाम· उच्चस्थानाभिमुखी· अंत्यफलज्यकां· परमफलज्यां च स्पष्टाधिकारोक्तपरिधयवगत त्रिज्योद्भवभुजफलरूपां· दत्वा· अर्थात् दृष्टग्रहस्य अन्त्यफलज्यामितं सूत्रं भूमध्यादुच्चरेखायां दत्वा· तदग्रे· नाम· अंत्यफलज्यामित रेखैकदेशचिन्हरूपस्याग्रे· त्रिभज्यया एव· प्रतिमण्डलाख्यं वृत्तं· विलिखेत्॥ एवकारात् यन्मित

४ कुमध्ये=३

४ रेखा विधेया=३

श्रीः
८३

83

ॐ तु = २

॥ अथ प्रतिमंडलसमचतुर्भागज्ञानार्थमाह ॥ सैवेति ॥ पुनः सा एव उच्चरेखा प्रतिमंडलेपि वर्धनीया
अर्थात् तन्नाम प्रतिमंडले सा ऊर्ध्वरेखा कक्षावृत्तस्य स्पष्टा ज्ञेया ॥ अपरा तिर्यग्रेखापि विधेया ॥
अर्थात् प्रतिमंडलसंबद्धोर्ध्वरेखाभागाभ्यां मत्स्यमुत्पाद्य तन्मुखपुच्छाग्ररेखा प्रतिवृत्तमध्यरूपतत्
चिन्हसक्ता प्रतिमंडलपरिधिभागपर्यंतं [illegible] तिर्यग्रेखा ऽपरा कार्या इत्यर्थः ॥ एवं कामादूर्ध्वरेखा
वत् कक्षावृत्तस्य या तिर्यग्रेखा सा प्रतिमंडले तिर्यक् न भवति कुतः कक्षावृत्ततिर्यग्रेखायाः प्रति
मंडलेमध्यस्पर्शत्वा ऽभावात् ॥ तथा च ग्रहस्पष्टानात् कक्षावृत्तस्य समचतुर्भागा न कृताः प्रयोजना
ऽभावात् ॥ ६ ॥ अथ केंद्रभुजकोटिज्यास्वरूपं उपजातिकेंद्रवज्राभ्यामाह ॥ मू ॥ तुंगोर्ध्वरेखा खलु
यत्र लग्ना तत्रोच्चमस्मिन् प्रतिमंडलेपि ॥ ततो विलोमं खलु तुंगभागैर्मेषादिरस्मात् खचरो ऽनुलोमं
॥ ७ ॥ देयस्तदुच्चांतरमत्र केन्द्रं दोर्ज्या च रेखावगयोश्च मध्ये ॥ तिर्यक् च रेखावगयोस्तु कोटिः
सो ऽर्ध्वाधरो वा ह्यनुगुणस्तु तिर्यक् ॥ ८ ॥ टी ॥ तुंगोर्ध्वरेखा नाम कक्षावृत्तस्योच्चस्यानादूर्ध्वया
रेखैकदेशरूपा अस्मिन् प्रतिमंडले यत्र लग्ना नाम सक्ता तत्र प्रतिमंडलपरिध्येकदेशे उच्चं नाम उच्च
चिन्हं कार्यं ॥ खलु नाम निश्चयेन ॥ अपि समुच्चये ॥ तेन कक्षावृत्तप्रतिवृत्तयोरुच्चचिन्हे कार्ये ॥ नैकत्र
॥ ततः नाम प्रतिमंडले उच्चस्यानात् तुंगभागैः नाम गणितागतोच्चराश्यादिभोगस्य भागात्मककरणेन
ये सावयवा भागास्तैस्तुंगभागैः विलोमं नाम कक्षास्थितमेषादिराशिक्रममार्गात् विपरीतमार्गेणा ऽपसव्येन
मेषादिः ज्ञेयः नाम कक्षास्थितभागप्रमाणेन प्रतिवृत्ते गणनया यत्र चिन्हं प्राप्तं तत्र मेषादिचिन्हं खलु निश्चयेन

शि॰ वृ॰
८३

॥अस्मात्॥ नाम॰ प्रतिमंडलस्यमेषादिचिन्हात्॰ खचरः॰ नाम॰ गणितागतोग्रहः॰ अनुलोमं॰ नाम॰
सव्यमार्गेण॰ कक्षावृत्तवत्॰ प्रतिमंडले॰ देयः॰ दातव्य इत्यर्थः॥ ७॥ अत्र॰ नाम॰ प्रतिमंडले॰ तदुच्चांतरं॰
नाम॰ प्रतिमंडलस्य ग्रहोच्चचिन्हयोरंतरालं॰ यत्तदुच्चात् ग्रहाद्वा केन्द्रं ज्ञेयं॥ अत्रेतिपदेन कक्षावृत्ते
तदंतरसत्वेपि केन्द्रं नभवति तत्र वास्तवग्रहोच्चयोरसत्वात्॥ इति सूचितम्॥ च पुनः प्रतिमंडले उच्च
रेखाखगयोर्मध्येंऽतराले ऽर्धज्याकारा ऋज्वी रेखा॰ दोर्ज्या॰ नाम भुजज्या भवति॥ तद्धनुर्भुज इत्यर्थः॥
तु पुनः प्रतिमंडले॰ तिर्यक्स्थरेखाखगयोर्मध्येंऽतराले॰ कोटिः॰ नाम॰ कोटिज्याः अर्धज्याकारा ऋज्वी
रेखा॥ ननू क्व भुजकोटिज्ययोः स्तत्संज्ञा कृ तः व्यत्यये नापि संज्ञायाः समुचितत्वादतआह॥ सा॰
नाम॰ साकोटिज्या॰ ऊर्ध्वाधरा भवति॥ उच्चरेखावदित्यर्थः॥ बाहुज्या लक्ष्म॰ नाम॰ भुजज्या तु॰ तिर्यक्
स्यात्॰ अर्थात् वृत्तमध्यस्थतिर्यग्रेखावदित्यर्थः॥ तुकारात्॰ कोटिभुजाग्रसक्ततिर्यग्रेखायां।
कर्णत्वांगीकारात् प्रकृते त्रिज्यायाः कर्णत्वमव्याहतमत एव पूर्वमिष्टा त्रिज्यासा श्रुतिरित्यायुक्तं
सम्यगित्यर्थः॥ इष्टा ह्यहि यः स्यात् तत्स्यधिन्या दिशी तरो बाहुः॥ अस्त चतुरस्रे वा सा कोटिः॰ कीर्तिता
तस्यैरित्यादिपाठ्युक्तं सम्यक्॰ इतिभावार्थः॥ ८॥ अथ कर्णस्य स्पष्टग्रहफलतद्धनखस्वरूपमुपजा
तिकाभिराह॥ मू॰॥ मध्यस्थरेखाकिलवृत्तयोर्यै तदन्तरालेन्त्यफलस्य जीवा॥ तदूर्ध्वतः कोटिगुणेन
मगादौ कर्क्यादिकेन्द्रे तदधो यतः स्यात्॥ ९॥ अन्तस्त्वदे वा न्तरमत्र कोटिर्दोर्ज्या भुजस्तत्कृतियोग
मूलं॥ कर्णः॰ क्व मध्यप्रतिमंडलस्य खेटान्तरे स्पष्टखगो हि दृश्यः॥ १०॥ कक्षाख्यवृत्तेश्रुतिसूत्रसक्ते

ता॰ ४

84

॥टी॥ वृत्तयोः नाम कक्षावृत्तप्रतिवृत्तयोर्ये मध्यस्थरेखे द्विवचनात्तन्मध्यस्थतिर्यक्रेखाद्वयं तदन्तराले
नाम उभयोः कक्षावृत्तप्रतिवृत्तयोर्मध्यस्थतिर्यग्रेखाद्वयोरन्तराले मध्ये किल निश्चयेन अन्त्यफल
स्य नाम परमफलस्य जीवा भवति॥ यतो भूगर्भात् परमफलज्यामितान्तरेण प्रतिवृत्तस्य मध्यं पूर्वमुपक
ल्पितम्। अतस्तदन्तराले परमफलज्या इति तत्त्वम्॥ रेखयोरन्तरं सर्वत्र
परमफलज्यामितं सिद्धं॥ पुनः मृगादौ केन्द्रे तदूर्ध्वतः नाम परम
फलज्यायाः ऊर्ध्वतः उपरि कोटिगुणः कोटिज्या भवति यतः हे
तोः॥ अथ च कर्क्यादिके केन्द्रे तदधः नाम परमफलज्यायाः
अधः अधोभागे कोटिगुणः कोटिज्या यतः स्यात्॥ ९॥ अतः
तदेवाह तस्य नाम तत्तन्नामतयोः अन्त्यफलज्याकोटिज्ययोः म
गकर्क्यादिकेन्द्रक्रमेण योगान्तरं अग्र नाम भूगर्भकक्षावृत्त
मध्यस्थतिर्यग्रेखैकदेशात् प्रतिवृत्तस्य ग्रहपर्यन्तान्तरे ऊर्ध्वा
धररेखारूपा स्पष्टा कोटिः स्यादित्यर्थः॥ अयमर्थः प्रतिमण्डलस्य
स्योच्चस्थानादग्रतः षड्भान्तरे वा त्रिभमध्यस्थप्रतिवृत्तग्रहे
मकरादिषड्भान्तरगते केन्द्रम् स्यात्॥ तत्र परमफलज्यातः उ
परि प्रतिवृत्तसम्बन्धिनी कोटिज्या भवति सा अन्त्यफलज्यया युता क
क्षावृत्तमध्यपर्यन्ता स्फुटा कोटिज्या स्यात्॥ पुनः प्रतिमण्डले उच्चस्थानात् पृष्ठ
तः अग्रतो वा त्रिभाऽधिकान्तरेण स्थिते ग्रहे तु कर्क्यादिषड्भान्तरगते केन्द्रे भवति तदन्त्यफलज्यातो
ऽधः प्रतिवृत्तकोटिज्या। सा कोटिज्या अन्त्यफलज्यया प्रति
ऊना भूगर्भकक्षावृत्तमध्यस्थतिर्यग्रेखैकदेशात् प्रति
वृत्तस्य ग्रहान्तरे ऊर्ध्वाधररेखारूपा स्फुटा कोटिः॥
॥ इति भावः॥ श्रीरस्तु॥ श्रीः॥



॥पुनः कोटित्तलकुमध्ययोरंतरे तिर्यग्रेखैकदेशरूपा· याऽदोर्ज्या· स· भुजः॥ पुनस्तत्कृतियोगमूलं· नाम·
तयोरुक्तकोटिभुजयोर्वर्गयोगस्य यद्वर्गमूलं· तत्· कुमध्यप्रतिमण्डलस्थखेटयोरंतरे· रेखारूपः कर्णः
स्यात्॥ अथ कर्णोपयोगमाह॥ हि· यतः कारणात्· श्रुतिसूत्रसक्ते· नाम· कर्णाग्रेणयत्सूत्रं तत्संलग्ने·
कक्षावृत्ते· नाम· कक्षावृत्तपरिध्येकदेशप्रदेशस्थाने· स्पष्टखगः अतः कारणात्· कर्णस्यसाधनमावश्यक
एवइतिभावः॥ नुनुकिंनाम स्पष्टत्वमत आह॥ दृश्यइति॥ ग्रहः यत्रकक्षावृत्तप्रदेशे भूगर्भस्थैर्दृश्यः
तत्स्थानेमेषादितोयोभोगः स· स्पष्टग्रहभोगइत्यर्थः॥ अयंभाव॥ ग्रहस्यकक्षावृत्तेभ्रमणाऽभावात्· प्रतिव
त्तस्थानेमेषादितो· प्रतिवृत्तस्थोग्रहः अहर्गणाऽनुपातसिद्ध एवदृश्यते तथापि प्रतिवृत्ते राशिवृत्ताऽनु
त्तेतद्भ्रमणात्· भूगर्भस्थैः प्रतिवृत्तस्थोग्रहः अहर्गणाऽनुपातसिद्ध एवदृश्यते तथापि प्रतिवृत्ते राशिवृत्ताऽनु
एतत्तराश्यंकनाऽभावात् तद्राशीनांकल्पितत्वात् प्रतिवृत्तस्थग्रहभोगफलादेशार्थमनुपयुक्तः कुसूत्रं तु
कर्णएव तत्साधनार्थं स्पष्टाकोटिः कृता॥ यद्यपि भूगर्भेमनुष्याणामभावस्तथापि पृष्ठसमसूत्रसंबंधेन
तत्तु भूगर्भेतेषामवस्थानान्तरत्ति॥ अथ फलस्वरूपमाह॥ चपुनः कक्षावृत्ते· मध्यस्फुटखेटयोर्मध्येंऽते
(राले· अर्थात्) कक्षावृत्ते· मध्यस्फुटखेटस्यचिन्हयोर्मध्येंऽतराले· कक्षावृत्तपरिध्येकदेशरूपंफलंनाम
मन्दफलंशीघ्रफलंवास्यात्॥ अथ फलस्यधनर्णत्वस्वरूपमाह॥ स्पष्टखगात्· नाम· कक्षावृत्तेयत्रस्पष्टग्र
हचिन्हं तस्मात्चिन्हात्· मध्ये· नाम· कक्षावृत्तेमध्यग्रहचिन्हेऽग्रेगसति· नाम· राशिक्रमानुरुद्धमार्गेणाऽग्रि
मभागस्थेसति· तत्फलं· मध्यग्रहभोगेऋणंक्रियते· चपुनस्ततः नाम· तस्मात्स्पष्टग्रहचिन्हात्· मध्ये· नाम·
मध्यग्रहचिन्हे· पृष्ठस्थितेसति· नाम· पश्चिमभागस्थेसति· तत्फलं· मध्यग्रहभोगे· स्वं· नाम· धनंक्रियं

(श्रीः ८५) 85

॰ मंदोच्चशीघ्रो
॰ च्चाभिमुख=२

॰ मध्य=४

॰ भूगर्भात्=ऋ·२पं· ॰कक्षायां=२

॥एवं मंदफलेन मन्दस्फुटः शीघ्रफलेन स्फुटः स्यात्॥ ननु कयुक्त्या भौमादिपंचग्रहाणां मंदशीघ्रोच्चयोः
कक्षायां हननात्· तदभिमुखस्वांत्यफलज्याहननात्तु तंगस्वांत्यफलज्याचिन्हाभ्यां मंदप्रतिवृत्ते शीघ्र
प्रतिवृत्तसंबंधिकर्णसूत्रसंबंधेन कक्षावृत्ते स्पष्टग्रहस्थानद्वयं· अतः मध्यस्पष्टग्रहयोरंतरे फ
लद्वयं सिद्धं· तत्रकेन फलेन ग्रहस्य स्पष्टत्वं भवति· पुनः कस्य फलस्य वैयर्थ्यापत्ति॥ इत्याशा
ऽनिर्णयाच्च· [illegible] इन्द्रवज्रया· उत्तरमाह॥ मू॰॥ मध्योहि मन्दप्रतिमण्डले स्वे मन्दस्फुटो
द्राक्प्रतिमण्डले च॥ भ्रमत्यतश्च चलकर्मणीह मन्दस्फुटो मध्यखगः प्रकल्प्यः॥१२॥ टी॰॥
हि नाम यतः कारणात्· मध्यः नाम मध्यग्रहोऽहर्गणानुपातसिद्धभोगात्मकग्रहः· स्वे नाम निजे· मन्दप्रति
मण्डले· भ्रमति· नाम· पूर्वगत्या· गच्छति॥ परस्परग्रहप्रतिवृत्तसंबंधशंकावारणार्थं स्वे इत्युक्तं॥ अ
तः मन्दफलसंस्कृतो मध्यग्रहो मंदस्फुटो भवति॥ न स्फुट इति॥ कारणमाह॥ यतः कारणात् मन्द
स्फुटः नाम· मन्दफलसंस्कृतमध्यग्रहः· द्राक्प्रतिमंडले· नाम· शीघ्रप्रतिवृत्ते· बिंबात्मकरूपेण·
शराऽभावे· भ्रमति॥ चकारस्त्वेवार्थे॥ तेन· मध्यग्रहः· शीघ्रप्रतिवृत्ते· शीघ्रफलसंस्कृतः· मंदप्रतिवृ
त्ते भ्रमतीति शंकानिरासः॥ तथा च· मंदप्रतिवृत्ते बिंबात्मकरूपेण भ्रमणाऽभावात् मंदफलसंस्कृतो
न स्फुट इति भावः॥ अतः कारणात्· चं चलकर्मणि· नाम· शीघ्रकर्मणि· इह मन्दस्फुटः· मध्यखगः·
प्रकल्प्य नाम· मंदस्फुटं मध्यमं प्रकल्प्य· शीघ्रफलं यत्साध्यते गणिताध्याये· तत्र शीघ्रकर्मणि· नाम· शीघ्रफलसा
धने· मध्यखगः नाम (अहर्गणानुपातसिद्धमध्यग्रहः)· (इह मंदस्फुटः)· कक्षावृत्तस्थप्रदेशविशेषचिन्हात्मकः·
॰इह मंदस्फुटः· सो=ऋ·१पं·

[illegible]

[illegible]

शिव· ८५

॥ ननु शीघ्रफलेमध्यग्रहात् आनेयं॥ तथा च॥ यथा कक्षायांमध्यग्रहस्यानयस्त्वेपिमंदप्रतिवृत्तेमध्यग्रहोभवति।
तथा तत्सिद्धकक्षास्थितमंदस्फुटः शीघ्रप्रतिवृत्ते उक्तरीत्यास्थेयः॥ मन्दस्फुटकक्षाप्रदेशकर्णसमसूत्रेण ग्रहबिंब
वाऽदर्शनात्॥ ननुअहर्गणानीतः तत्संबंधेनकर्णमार्गेयः कक्षाप्रदेशस्तन्मार्गेण शीघ्रप्रतिवृत्तस्य ग्रहबिंबद
र्शनात्। स कक्षाप्रदेशभोगः स्पष्टग्रहस्येति भौमादिफलक्रमोपपत्तिः॥१२॥ मध्यग्रहः कक्षावृत्ते मंदस्फुटः
मन्दप्रतिमण्डले। स्पष्टग्रहः शीघ्रप्रतिवृत्ते भ्रमतीति कश्चिदुक्तं। तन्निरस्तं॥ कुतः॥ मध्यमंदस्फुटयोरेव
मंदशीघ्रप्रतिवृत्तयोः क्रमेणदानोक्तेः॥ ननु कक्षेग्रहके ग्रहदानं कक्षायांप्रतिवृत्ते चयुक्तं। त
त्स्पष्टस्वरूपाऽवगमस्यविनातद्दानमशक्यत्वात्। परंतुच्चदानंतत्र किमर्थं। उच्चपदार्थस्याऽऽ
काशे दर्शनाऽभावेनाऽवस्तुभूतत्वादित्यतोवंशास्थवृत्तेन तदुत्तरमाह॥ मू॥ भ्रमन्ग्रहः
स्वप्रतिमंडलेनभिः सयत्रकक्षावलये विलोक्यते॥ स्फुटोहि तत्रास्यफलोपपत्तये।
प्रकल्पितं तुंगमिहाद्यसूरिभिः॥१३॥ टी॥ स्वप्रतिमंडले। नाम। स्वकीयमंदशीघ्रप्र
तिवृत्ते (सि॰ पद्ः क्रमेण अर्थात्) अहर्गणानीतमध्यमंदस्फुटः सः ग्रहः क्रमेण भ्रमन्
नाम। प्रवृत्तो गच्छन् सन्। नभिः भूपृष्ठस्थैर्जनैः कक्षावलये। कक्षावृत्ते। यत्र ना
म। कक्षावृत्तस्य यस्मिन्प्रदेशे। विलोक्यते। दृश्यते। अर्थात्। कक्षावृत्तस्य यः प्रदेशः क
र्णसमसूत्रेण भूगर्भसंबन्धद्वारा दृश्यते। तत्र नाम। कक्षाप्रदेशे। सग्रहः हि यतः कार
णात्। स्फुटः। नाम। स्पष्टो भवति। यथायोग्यं मंदस्य स्पष्टग्रहयोर्भोगो भवति। अतः कार
णात्। अस्य ग्रहस्य कक्षावृत्ते। मंदस्फुटयोरंतररूपफलस्योपपत्तये। नाम। फलोत्पादना
र्थं। इह। नाम। कक्षावृत्ते प्रतिवृत्ते च। आद्यसूरिभिः प्राचीनगोलतत्वाभिज्ञैः। तुंगं। नाम। यथायोग्य

ᳰ अर्थात् तत्रकक्षाप्रदेशे। हि। यतः ᳰ = ग्र॰ ३ पं॰॥

॥ᳰ उपपत्त्यांगीकृतमित्यर्थः॥ तथा च भाष्ये॥ उच्चप्रदेशात् क्रमेण चलितस्य फलप्रवृत्तिर्दृश्यतेऽतस्तुंगं कल्पितमिति॥ᳰ=

श्रीं ८६

81

॥ तथा च ॥ मध्यस्फुटग्रहयोरंतररूपफलस्य मध्यमे स्फुटभुजांतररूपत्वेन दर्शनात्. तस्योच्चरेखाधी
नत्वात्. तद्ज्ञानार्थमुक्तरीत्या वृत्ते उच्चस्थानमावश्यकम्. ॥१३॥ ननु फलवासनार्थं ऊर्ध्वरेखासंबंधु
च्चं कुतः कृतं तद्भिन्नरेखायां कथं न कृतं. कारणाभावात्. इत्यतस्तदुत्तरं उच्चगत्युपपत्तिं च उपजा
तिकयाह ॥ मू ॥ यः स्यात्प्रदेशः प्रतिमंडलस्य दूरे भुवः तस्य कृतोच्चसंज्ञा ॥ सोपि प्रदेशश्चलतीति त
स्मात्प्रकल्पितातुंगगतिर्गतिज्ञैः ॥१४॥ टी ॥ भुवः सकाशात्. भूगोलगर्भात्. प्रतिमंडलस्य यः प्रदेशः
दूरे स्यात्. तस्य प्रतिमंडलसंबंधिप्रदेशस्य उच्चसंज्ञा कृता ॥ उच्चत्वात् ॥ तथा च ग्रहा
ऽधिष्ठितप्रतिवृत्तस्य भूगर्भे मध्यत्वाऽभावात् भूमध्यात् प्रतिवृत्तमेकदेशेनोच्चोभवत्ये
वेति ॥ उन्नतप्रदेशादधोभागे पृथुच्चरेखा ॥ याः नाम वृत्तस्योर्ध्वरेखायाः केन्द्र भूकेन्द्रप
र्यंतं भुजज्यादीनां मूलत्वाद् अतः तत्र देशे मेषादिभोगमिति ज्ञानार्थमुच्चमहर्गणानुपा
तसिद्धमुक्तम्. ॥ तत्रोच्चभोगज्ञानार्थमेव कक्षायामुच्चप्रदेशाभावेऽपुच्चस्यानर्थकत्व
मिति भावः ॥ ननूच्चप्रदेशस्यैकत्वेनाऽहर्गणाऽनुपातसिद्धोच्चं प्रतिदिनविलक्षणं कथं ॥
न हि कक्षावृत्तं विलोमगत्या प्रत्यहं किंचिच्चलति येन तदुपपत्तिः स्यात्. कक्षाप्रदेशस्याऽऽ
काशरूपत्वेन चलनाऽसंभवादित्यत आह ॥ सोऽपि यतः सोऽपि नाम प्रतिवृत्तसंबं
धी प्रदेशश्चलतीति नाम कक्षायामितस्ततः पूर्वगत्या भवति ॥ तस्मात्कारणात्.
तुंगगतिः नाम उच्चस्य गतिः प्रत्यहं. गतिज्ञैः प्रकल्पिता ॥ अनेनाऽवस्तुभू
तमपि दृष्टफलोपपत्तिप्रतिपादनार्थमंगीक्रियते. देवतारूपोच्चमुच्चं इति ॥ अपि
शास्त्र. प्रतिवृत्तप्रदेशस्याऽऽकाशरूपत्वेपि चलनाऽभावात् दूरमत्र अन्यथाऽनुपपत्त्या

कल्प्यते इति सूचितम् ॥ तथा च· भूगर्भादंत्यफलज्यांतरे
प्रतिवृत्तमध्यमनुदिनं मंद्येन चलतीति कल्पनात् प्रतिवृत्त
मेवचलितं· तच्चलनेन कक्षायामुच्चं चलतीति सिद्धम्. ॥१४॥

विग्र·

मग्र·

॥ प्रतिवृत्तम्॥

॥ कक्षावृत्तम्॥

श्री वं ८६

॥ ननु अनुभवविरुद्धमुच्चचलनं कथमंगीक्रियत इत्यतोऽस्य कक्षोपपत्त्या प्रकल्पितं तुंग

मिति कुत इति पूर्वपक्षो तत्कथनच्छलेनेन्द्रवज्रयात्तदुत्तरमाह ॥ मू ॥ उच्चात् भषट्कांतरि

तं च नीचं मध्यः स्वनीचोच्चसमो यदा स्यात् ॥ कक्षास्य मध्योपरि कर्णसूत्रपातात् स्फुटो मध्य

समस्तदानीम् ॥ १५ ॥ टी ॥ प्रतिवृत्ते वा कक्षायां उच्चात् नाम उच्चस्थानात् द्भषट्कां

तरितं नीचं स्यात् ॥ षड्राश्यंतरेणायत्स्थानं तत्र नीचं ज्ञेयं ॥ चकारादुच्चवत् नीचोपि

चलति ॥ कुतः उच्चनीचयोरूर्ध्वरेखाभवन्धेन षड्राश्यंतरनियमात् ॥ पुनः यदा नाम यस्मि

न्काले मध्यः नाम अहर्गणानीतः मध्यग्रहः वा मन्दस्फुटो ग्रहः स्वनीचोच्चसमः स्यात्

तदानी नाम तस्मिन्काले स्फुटः नाम स्फुटो ग्रहः मंदफलसंस्कृतः शीघ्रफलसंस्कृतो वा

मध्यसमः स्यात् ॥ अर्थात् अहर्गणानीतेन समः स्याद्वा मंदस्फुटेन समः नाम तुल्यः

स्यादित्यर्थः ॥ एतदुक्तं भवति ॥ अहर्गणानीतो मध्यग्रहः यदा स्वनीचोच्चसमस्तदा स एव मन्द

स्फुटो भवति मन्दफलाऽभावात्तत्र ॥ पुनश्चेद्यदि मन्दस्फुटः ग्रहः स्वशीघ्रनीचोच्चसमः

तदा तन्नीचोच्चरेखास्थकक्षावृत्तचिन्हे स्थितः स्यादिष्टत्वात्तत्र च शीघ्रफलाऽभावात् स एव मन्द

स्फुटः ग्रहः स्पष्टो भवतीत्यर्थः ॥ कुत इत्यतो भास्कराचार्य एव हेतुमाह ॥ कक्षास्य मध्योपरि

कर्णसूत्रपातात् ॥ अर्थात् भूगर्भात् प्रतिमंडलगतग्रहोपरि नीयमानं यत्सूत्रं स कर्णः ॥ कक्षाव

त्तेयत्र मध्यग्रहस्थानं तत्रैव कर्णसूत्रसंपातसत्त्वात् संबंधात् ॥ कक्षाप्रदेशे कर्णसूत्रसंपाते व तु स्पष्टग्रहस्थानं

(श्रीः ८)

87

॥ ननु फलाऽन्यथाऽनुपपत्त्या ग्रहस्य स्थितिः प्रतिवृत्ते अस्तीति कल्प्यते नवस्तुतस्तत्र तस्य स्थितिरित्युक्त उपजातिकयाह ॥ मू ॥ उच्चस्थितो व्योमचरः सुदूरे नीचस्थितः स्यान्निकटे धरित्र्याः ॥ अतोऽणुबिम्बः पृथुलश्च भाति भानोस्तथासन्नसुदूरवर्ती ॥ १६ ॥ टी ॥ उच्चस्थितो व्यो

^प्रतिमंडलस्य=४ मचरः नाम ^ उच्चप्रदेशे स्थितो यः बिंबरूपो ग्रहः धरित्र्याः सकाशात् नाम बिंबरूप भूगोलात् सुदूरे नाम अतिदूरे स्यात् यतः ॥ पुनः नीचस्थितः नाम प्रतिमंडलस्य नीचप्रदेशे स्थितो व्योमचरः नाम बिंबरूपो ग्रहः धरित्र्याः सकाशात् भूगोलात् यतः निकटे नाम अतिसमीपे स्यात् ॥ अतः नाम धरित्र्याः सकाशात् दूरनिकटस्थत्वात् क्रमेण अणुबिंबः सूक्ष्मबिंबः ग्रहस्य भाति च पुनः पृथुलबिंबः नाम स्थूलबिंबः भूपृष्ठस्थमनुष्याणां भाति भासते इत्यर्थः ॥ चकारात् उच्चात् ग्रहस्य यथांतरं तथा बिंबं वर्धते नीचाद्यथांतरं तथा ह्रसतीति सूचितम् ॥ भातीत्यनेन ग्रहबिंबस्याऽविकृतस्य तथा दर्शनं भवति वस्तुतस्तु समानरूपत्वस्य सर्वदा एव ॥ अथ ग्रहस्य कक्षावृत्तस्थत्वे तु भूमितोऽभितः तत्कक्षांतरत्वात् अविकृतग्रहबिंबदर्शनापत्तेः सर्वदा एव ॥ ननु नीचस्थापि कदाचित् सूक्ष्ममूर्तिर्दृश्यते इत्याशं

^किं वत्=३ क्याह ॥ भानोरिति ^ यथा भानोः सकाशात् सूर्यात् आसन्नसुदूरवर्ती ग्रहः पूर्वापरांतरेण क्रमात् यथा अणुबिंबो महद्बिंबश्च ग्रहस्य भाति तथा उच्चनीचस्थग्रहः धरित्र्याः सकाशात् दूरनिकटस्थत्वात् अणुबिंबः पृथुलबिम्बो रूपेण भासते नवस्तुतः इत्यर्थः ॥ १६ ॥ श्रीः ॥

शिव ८

४ पः=२

॥ अथोक्तमुपसंहरन्नुपपत्ति प्रतिपादक प्रकारांतर मिन्द्र वज्रया प्रतिजानीते॥ मू॥
उक्ता मयैषा प्रतिवृत्तभंग्या युक्तिः पृथक् श्रोतुरसम्भ्रमार्थं॥ स्पष्टीकृतेस्तां पुनर
न्यथाहं नीचोच्चवृत्तस्य च वच्मि भूयः॥१६॥टी॥ प्रतिवृत्तभंग्या॰ नाम॰ प्रतिवृत्तरच
नया॰ स्पष्टीकृतेः नाम॰ स्पष्टाधिकारोक्त गणितक्रियायाः एषा पदार्थस्वरूपा युक्तिः
मया॰ नाम॰ भास्कराचार्येण॰ श्रोतुः नाम॰ स्पष्टक्रियायाः वासना जिज्ञासोः असंभ्रमार्थं
नाम॰ अनज्ञानार्थं॰ भ्रमदूरीकरणार्थमित्यावत्॥ पृथक् नाम॰ नीचोच्चवृत्तव्यति
रेकेण॰ अर्थात्केवल॰ प्रतिवृत्तभंग्या एव॰ एषा युक्तिः मया उक्ता इत्यर्थः॥ तथा च॥ग्र
हपरफलमौर्व्यादत्तयोर्ध्वकुमध्यात्प्रतिवलयमिदंस्याद्यासखण्डेन रवृत्ते॥भवति हि निजक
क्षामंडलाग्रेयदन्यत्परफलगुणवृत्तंसोच्चनीचाख्यमेतत्॥१ इत्यादिना पूर्वाचार्यैः प्रतिवृ
त्तनीचोच्चवृत्ताभ्यां स्पष्टक्रियायाः युक्तिः प्रदर्शिता॰ मया तु॰ एकैवग्रहः॰ उभयत्र कथं

४ एककालावच्छे
४ देन=५

४ भ्रमतीति संदेहवारणार्थं प्रतिवृत्तभंग्या एव उक्ता॥ ननु नीचोच्चवृत्ते यत्तज्ज्ञाने तत्प्रति
वृत्ते कथं स्यात् इत्येतत्त्यागोऽनुचित इत्यत आह॥ तां॰ नाम॰ स्पष्टीकृति वासनां॰ पुनः नाम॰
द्वितीयवारं॰ अन्यथा॰ नाम॰ उक्तरीत्यन्यारीत्या॰ नीचोच्चवृत्तस्य भंग्या॰ रचनया॰ अहं भास्करा
चार्यः समनंतरमेव वच्मि॰ चकारादत्रापि॰ पृथक् श्रोतुरसंभ्रमार्थमित्यन्वीतः॥ तेन॰ प्रतिवृत्त
त्यागात्॰ श्रोतुस्तत्ववोधार्थं वासनायाः प्रतिवृत्तव्यतिरेकेण॰ केवलनीचोच्चवृत्तभंग्या एव युक्तिं व
दामीत्यर्थः॥ ननु एककालम् उभयलिखनं पूर्वाचार्योक्तं
युक्तं लाघवात् त्वदुक्तं च गौरवाद् अयुक्तम् अत आह॥
भूयः तृतीयवारं॰ च समुच्चये॰ तेन॰ उभयमप्येकत्र लि
खित्वा मिश्रभंग्या॰ तद्वासनां वच्मीत्यर्थः॥ तथा च॰ पूर्वोक्तं

४ नीचोच्च तस्य=४

४ नीचोच्च=३

४ प्रतिवृत्ते नीचोच्चवृत्ते च=६

(श्रीः ८८)

°अत्र प्रथमं = १

मपि लघुभूतमग्राह्यतम् ॥ मयात्तु लीलयैव श्रोतॄणां बोधोत्पत्यर्थं पृथक्कृतमिति उच्चनीचोच्च

वृत्तं अभंगपागुरुभूतमपि पूर्वमत्यावश्यकतयोक्तमिति नायुक्तमदुक्तमिति भावः ॥ १७ ॥ श्रीः ॥

अथ प्रतिज्ञातं विवक्षुः प्रथममुपजातिकया नीचोच्चवृत्तोर्ध्वरेखारचनमाह ॥ मू ॥ कक्षास्य

मध्यग्रहचिन्हतोथ वृत्तं लिखेद्दन्त्युफलज्यया तत् ॥ नीचोच्च [illegible] वृत्तं रचयेच्च रेखां कु

मध्यतो मध्यखगो परिस्थां ॥ १८ ॥ सटीका ॥ अथ नाम त्रिभज्यकासंमितकर्केंद्र इत्यादि

पूर्वोक्तेनाऽभीष्टस्थानेभगणांकितकक्षावृत्तसंपादनाऽनंतरं कक्षास्थमध्यग्रहचिन्हतः

नाम कक्षावृत्ते मेषादिस्थानान्मध्यग्रहभोगेन यत्स्थानं तच्चिन्हात् अंत्यफलज्ये

या नाम परमफलज्याभितव्यासार्धेन वृत्तं लिखेत् ॥ यद्वृत्तं लिखितं यत् वृत्तं तत्तु नी

चोच्चसंज्ञं भवति ॥ अत्र नीचोच्चसंज्ञं रचयेदिति पाठः सम्यगेव ॥ कुतः यत्तदोर्नित्य

संबंधात् ॥ पुनस्तत्रैका मूर्ध्वरेखां कुमध्यतः नाम भूवृत्तमध्यबिंदुस्थानतः मध्यखगोप

°मध्य = ५ रिस्थां नाम कक्षावृत्तस्थग्रहचिन्हस्पृष्टां नीचोच्चवृत्तपरिधिपर्यंतं रेखां रचयेत् ॥

नाम कुर्यादित्यर्थः ॥ चकारात्कुमध्यतः कक्षास्थमध्यग्रहचिन्हपर्यंतं रेखा कार्या एवं

वृत्तमयस्पृष्टेकोर्ध्वरेखा भवति कक्षावृत्ते कुमध्यस्पृष्टात्तिर्यग्रेखा ग्रहचिन्हात्त्रि

भांतरेण कक्षापरिधौ एकदेशासक्ताऽग्राकार्या ॥ १८ ॥ ननु अंत्यफलज्योत्पन्नवृत्तं नीचोच्च


संज्ञं कुतः इत्यस्य उत्तरं तत्सम चतुर्भागकरणं च इन्द्रवज्रयाह ॥ मू ॥ कुमध्यतो दूरतरे

नीचोच्चवृत्तो ग्रहस्तत्र एष दृष्टव्यम् = २

°एवं = ८

शिव ८८

५ परममंदफलज्यामितेपत्यर्थः =३ ५ भूमध्यात् =३



प्रदेशेरेखायुते तुंगमिह प्रकल्प्यं ॥ नीचं तथासन्नतरेथ तिर्यङ् नीचोच्चमध्ये रचयेच्च रेखाम् ॥१९॥

॥टी·॥ कुमध्यतः नाम· भूमध्यबिंदुस्थानात्· ग्रह· नाम· कक्षास्थमध्यग्रहचिन्हात्· मध्यमोत्थफलज्यामितव्यासार्धेन कृतवृत्तपरिधौ· दूरतरे प्रदेशे· नाम· अतिदूर स्थितेयः परिधिप्रदेशैकदेशः तस्मिन्· तुंगं· नाम· उच्चं· प्रकल्प्यं· ॥ प्रकल्प्य मित्यनेन· ग्रहबिंबे तत्स्थेऽणुबिंबदर्शनात् उच्चस्थानं सुज्ञेयमन्यथा तद् ज्ञानमशक्यमाकाशे वृत्तानामदर्शनादिति सूचितम्॥ ननु अतिदूरस्य प्र देशस्याऽस्मिन् वृत्ते कथं ज्ञानं स्यादत आह·॥ किंभूते· दूरतरे प्रदेशे·॥ रेखायु ते·॥ अर्थात्· ऊर्ध्वरेखाग्रसक्तपरिध्येकदेश एव दूरस्थानमिति भा वः· इति बालैरपि ज्ञायते॥ तथा· कुमध्यतः आसन्नतरे· नाम· अ तिनिकटे प्रदेशे· नीचं· प्रकल्प्यं ॥ अर्थात् अंत्यफलज्याव्यासार्ध वृत्तपरिध्येकदेशोर्ध्वरेखायुतप्रदेशे· नीचं ज्ञेयमित्यर्थः ॥ अ त्रापि तत्स्थग्रहस्य स्थूलबिंबदर्शनान्नीचत्वं सुलभं तस्य·॥ अत एवाऽस्य वृत्तस्य नीचोच्चसंबंधात्· नीचोच्चसंज्ञास्य॥ अथाऽनंतरं· नीचोच्चमध्ये· नाम· नीचोच्चसंज्ञकवृत्तमध्ये· चकारात् ऊर्ध्वरेखायाः तिर्यक्· रेखां· ग्रहमध्यचि न्हसक्तां नीचोच्चचिन्हाभ्यामुभयतः समानांतराग्रां· रचयेत्· कुर्यादित्यर्थः॥ मध्ये इत्यनेन तिर्यक्रे खा वृत्ताद्बहिर्नेया· किंतु वृत्तपरिधिसक्ता ॥ कार्यइतिसूचितम्·॥१९॥

ॐ अस्मिन् नीचोच्चवृत्ते = ग्रु.९ पं.

॥ अथाग्रफलोपपत्त्यर्थं कर्णस्वरूपं विवक्षुः प्रथमं तदुपपादकं भुजकोटिज्यास्वरूपसंस्थानमि
न्द्रवज्रोपजातिकाभ्यामाह ॥ मू. ॥ नीचोच्चवृत्ते भगणाङ्किते स्मिन् मान्दे विलोमं निजकेन्द्रगत्या ॥
शैघ्रे ऽनुलोमं भ्रमति स्वतुङ्गादारभ्य मध्यद्युचरो हि यस्मात् ॥ २० ॥ अतो यथोक्तं मृदुशीघ्र
केन्द्रं देयं निजोच्चात् द्युचरस्तदग्रे ॥ दोर्ज्या च रेखावधि खेटतः स्यात् तिर्यक् स्थरेखावधि
कोटिजीवा ॥ २१ ॥ टी. ॥ यस्मात्कारणात् मध्यद्युचरः नाम अहर्गणनीतो ग्रहः मान्दे
नीचोच्चवृत्ते मन्दकेन्द्रगत्या स्वतुङ्गादारभ्य नाम मन्दोच्चस्थानादारभ्य तदुच्चस्थानं पूर्वावधि
कृत्य विलोमं नाम कक्षायां येन क्रमेण गच्छति तस्माद्विपरीतमार्गेण प्रत्यहं भ्रमति गच्छ
तीत्यर्थः ॥ पुनः शैघ्रे नाम शीघ्रनीचोच्चवृत्ते निजकेन्द्रगत्या नाम शीघ्रोच्चगत्या स्वतु
ङ्गादारभ्य नाम शीघ्रोच्चादारभ्य तदुच्चस्थानं पूर्वावधि कृत्य अनुलोमं नाम कक्षायां यत्क्र
मेण ग्रहश्चिह्नं भवति तन्मार्गेण प्रत्यहं मध्यद्युचरः यस्मात्कारणात् भ्रमति नाम ग
च्छति ॥ हि निश्चयेन ॥ अतः नाम अस्मात्कारणात् मृदुशीघ्रकेन्द्रं निजोच्चात् यथोक्तं देयं ॥
अर्थात् मन्दनीचोच्चवृत्ते मन्दोच्चस्थानात् मृदु नाम मध्यकेन्द्रं विलोमं देयं शीघ्रनीचोच्चवृ
त्ते शीघ्रोच्चस्थानात् शीघ्रकेन्द्रं अनुलोमं देयं केन्द्रभागगणनया वृत्ते चिह्नं कार्यमित्यर्थः ॥
किम्भूते वृत्ते भगणाङ्किते ॥ द्वादशराश्यंशाङ्किते ॥ पुनस्तदग्रे नाम उच्चस्थानात् केन्द्रभोगान्तरेण

[illegible]

ग्रहचिन्हद्वयोजनमाह ॥ खेटतः उच्चरेखावधिः दोर्ज्या स्यात् । अर्थात् ग्रहचिन्हात् उच्चरेखा
ऽवधि । ऊर्ध्वरेखापर्यन्तं अर्ज्वीरेखाऽर्धज्याकारा भुजज्या स्यात् ॥ खेटतः तिर्यक्स्थरेखा
वधि कोटिजीवा स्यात् ॥ नाम । ग्रहचिन्हान्नीचोच्चवृत्तस्थ तिर्यक्रेखापर्यन्तं अर्धज्याकारा
ऊर्ध्वरेखाकोटिज्या स्यात् ॥ २१ ॥ ननु गणितसिद्धयो भुजकोटिज्ययोस्त्रिज्याप्रमाणव्यासार्धवृ
त्ते सिद्धत्वादंत्यफलज्याव्यासार्धवृत्ते तयोरवस्थानं असंगतमित्यत तदुत्तरं फलवासनां च
इन्द्रवज्रोपजातिकाभ्यामाह ॥ मू ॥ ये केन्द्रदोःकोटिफले कृते ते नीचोच्चवृत्ते भुजकोटि
जीवे ॥ त्रिज्यार्धतः कोटिफलं मृगादौ कर्क्यादिकेन्द्रे तदधो यतः स्यात् ॥ २२ ॥ अतस्तदैक्यां
तरमत्र कोटिर्दोर्दिः फलं भूग्रहमध्यसूत्रं ॥ कर्णो ग्रहमध्यग्रहकर्णमध्ये फलं धनर्णे तदि
होक्तवच्च ॥ २३ ॥ टी ॥ स्पष्टाधिकारे स्वनाहतेपरिधिनेत्यादिना । कृते ये केन्द्रदोःकोटिफले । नाम ।
केन्द्रभुजे कोटिफले । यत्त्रौक्ते । ते एव । नीचोच्चवृत्ते । भुजकोटिजीवेस्तः नाम दोर्ज्या उच्चरेखाऽ
वधि इत्यादिना पूर्वं प्रतिपादिते भुजकोटिज्ये स्यातां ॥ तथा च । न हि ते त्रिज्याप्रमाणसिद्धभुज
कोटिज्ययोरभावात् तद्वृत्तपरिणतयोस्तत्त्वतोऽवस्थानं युक्तमिति भावः ॥ अथ कर्णस्वरूपज्ञानार्थं
कोटिस्वरूपमाह ॥ मृगादौ नाम मकरादिषड्भान्तर्गते केन्द्रे त्रिज्यार्धतः । यतः कोटिफलं भवति । कर्क्या
दि नाम कर्कादिषड्भान्तर्गते केन्द्रे तदधः नाम त्रिज्याधः । यतः कोटिफलं स्यात् ॥ एतदुक्तं भवति ॥ नी
चोच्चवृत्ते या तिर्यग्रेखा सा कक्षावृत्ते यत्र मध्यग्रहचिन्हं तत्रैव नीचो [illegible] तिर्यग्रेखा कक्षावृत्ते न संलग्ना भव
ति । मृगादौ केन्द्रे नीचोच्चवृत्तगत [illegible] तिर्यग्रेखातः उपरि ग्रहचिन्हं भवति । ९ क कक्षावृत्तस्य तिर्यग्रेखा । अथ च ।

(श्रीः ९.)

९०

॥अतः कारणात् तदैक्यान्तरं यत् सा कोटिः स्फुटा भवति॥नाम पूर्वोक्तकोटिफलत्रिज्ययोः
ऐक्यान्तरात्स्फुटा कोटिः इत्यर्थः॥अथ भुजस्वरूपमाह॥ दोःफलं नाम कोटिमूलभूगर्भचि
ह्नान्तरभुजफलतुल्यः कक्षावृत्तस्य तिर्यग्रेखैकदेशरूपो भुजः॥अथ कर्णस्वरू
पमाह॥ भूग्रहमध्यसूत्रं कर्णः॥नाम भूगर्भचिह्नात् नीचोच्चवृत्तस्थग्रहचिह्नपर्यन्तं तिर्यग्रे
खारूपः कर्णः॥ भुजकोट्योर्वर्गयोगपदं रूपम् इत्यर्थः॥अथ कर्णप्रयोजनभूतां फलवासनामा
ह॥ अथेत्यनन्तरं इह नाम कक्षावृत्ते मध्यग्रहः पुनः कर्णः अनयोर्द्वयोर्मध्ये अन्तराले फलं
भवति॥नाम कक्षावृत्ते कर्णसूत्रसक्तप्रदेशे ग्रहदर्शनात् कक्षास्थमध्यग्रहदर्शनाच्च॥कक्षावृ
त्ते यत्र मध्यग्रहचिह्नं यत्र च कक्षावृत्ते कर्णसूत्रस्य संपातः अनयोरन्तराले कक्षावृत्तस्य प
रिध्येकदेशरूपं यत् तत् मान्दं शैघ्र्यं वा फलं स्यात्॥ तस्य फलस्य उक्तवच्च नाम प्र
तिवृत्तभङ्गीधनर्णप्रतिपादनरीत्या धनर्णं ज्ञेयम् ननु भिन्नरीत्या॥ननु नीचोच्चवृत्तप्रति
वृत्तयोरेकसंस्थानाऽभावात् फलस्य धनर्णत्वमत्र कथं ज्ञेयमित्यत आह॥उक्तवत् नाम मध्येऽ
ग्रगे स्पष्टखगादृणं तत्पृष्ठस्थिते स्वमिति प्रतिवृत्तोक्तमार्गेण फलस्य धनर्णत्वं ज्ञेयमिति॥ चकारस्तु
पूर्वप्रतिपादितफलं यत् तदभिन्नमिदमपि फलमित्यर्थकः॥२३॥ इति नीचोच्चवृत्तभङ्गी॥ ननु
स्वरूपद्वैविध्याऽभावात् एकस्य ग्रहस्य उभयत्राऽवस्थानं विरुद्धमित्यतः प्रतिवृत्तनीचोच्चवृत्तयोर्ग्रहग
मनाऽवस्थानकथनपूर्वकमेकत्रैव तत्त्वतस्तदवस्थानमुपजातिकेन्द्रवज्राभ्यामाह॥ मू॥ मन्दोच्चतोग्र

प्रतिमंडले प्राक्ग्रहोऽनुलोमं निजकेन्द्रगत्या॥ शीघ्राद्विलोमं भ्रमतीव भाति विलम्बितः
पृष्ठत एव यस्मात्॥ २४॥ नीचोच्चवृत्ते पुनरन्यथाते तस्याऽनुलोम प्रतिलोमयाने॥ एका
गतिः सा प्रतिभानमन्यत् प्राज्ञैः कलार्थं प्रविकल्पितं तत्॥२५॥ टी०॥ प्रतिमंडले नाम
पूर्वोक्तप्रतिमंडले प्राक् नाम पूर्वाभिमुखं ग्रहः स्वगत्या गच्छन् सन् मंदोच्चतः
नाम मंदप्रतिवृत्तस्य उच्चस्थानात् अनुलोमं नाम कक्षास्थराशिक्रममार्गेण निजकेंद्र
गत्या भ्रमति नाम गच्छतीव भाति॥ अनेन स्वगत्या वस्तुतो गच्छतो ग्रहस्य मंदकेंद्रगत्या
गमनस्य संभवाद्येति मंदोच्चतः केंद्रगत्याऽनुलोमगमनभानादित्युक्तं भवतीति सूचितम्॥
कुतस्ततोऽनुलोमगमनभानमत आह॥ अग्रे इति॥ मंदोच्चग्रहयोः प्रागमनात्सैद्धुच्च
गतेरल्पत्वात् मंदोच्चादग्रे एव केंद्रगत्या भवति इत्यनुलोमगमनभानं तत्र सम्यगेवे
तिभावः॥ अवतरार्थीक्त॥ ग्रहः प्रतिमंडले प्राक् निजगत्या भ्रमति परंतु मंदोच्चतः अग्रे अ
नुलोमं केंद्रगत्या भ्रमतीव भाति॥ इत्यर्थः॥ एवं शीघ्रात् नाम शीघ्रप्रतिवृत्तस्योच्चस्थानात्
विलोमं नाम कक्षास्थराशिक्रममार्गाद्विपरीतमार्गेण निजकेंद्रगत्या नाम शीघ्रकेंद्रग
त्या भ्रमतीव भाति नाम गच्छतीव भाति॥ अत्रापि शीघ्रप्रतिवृत्ते ग्रहस्य स्वगत्या पूर्व
गमनात् केंद्रगत्या ततो विलोमगमनभानमित्युक्तं भवतीति ध्येयम्॥ अत्र हेतुमाह॥
यस्माद्धेतोः शीघ्रात् नाम शीघ्रोच्चात् पृष्ठत एव ग्रहो विलम्बितः॥ नाम पश्चादेव विलम्बितः
एवकारस्तु कदाचिच्छीघ्रोच्चात् ग्रहः पुरतो न भवतीत्यर्थः॥ अर्थात् शीघ्रोच्चात् शीघ्र

प्रतिवृत्ते ग्रहः यस्मात्कारणात् पृष्ठतः पश्चादेव विलं
बितो भवति अतः कारणात् शीघ्रोच्चात् केंद्रगत्या ग्रहः
विलोमं भ्रमतीव भाति॥ शीघ्रोच्चग्रहयोः पूर्वग ५
५ वक्रतः ग्रहस्य पूर्वगमनमेव ५ =

मनात् तत्र शीघ्रोच्चगतेराधिक्यात् शीघ्रोच्चात्पश्चादेव
ग्रहो भवतीति विलोमगमनभानं युक्तमिति
॥ भाव॥ २४॥ श्रीरामाय नमः॥

श्रीः ९

९१

॥ अथ नीचोच्चवृत्तस्य स्थितिमाह ॥ नीचोच्चवृत्ते इति ॥ टी ॥ तस्य नाम प्रतिवृत्तस्य
ग्रहस्य अनुलोमप्रतिलोमयाने नाम मंदोच्चात्पूर्ववत् शीघ्रोच्चात्पश्चादिति गमने ते नाम
पूर्वश्लोकप्रतिपादिते नीचोच्चवृत्ते पुनः वाक्यालंकारे ॥ अन्यथा नाम वैपरीत्येन भवतः ॥
अर्थात् प्रतिवृत्तस्य ग्रहस्य पूर्वोक्तगमने पुनः नीचोच्चवृत्ते अन्यथा ज्ञेये इत्यर्थः ॥ तथा च ॥
मंदप्रतिवृत्ते मंदोच्चादनुलोमगमनं ग्रहस्य उक्तं पूर्वम् तदत्र मंदनीचोच्चवृत्ते मंदोच्चात्
केंद्रगत्या विपरीतगमनं ग्रहस्य ज्ञेयं ॥ पुनः शीघ्रप्रतिवृत्ते तु शीघ्रोच्चात् विपरीतभ्रमणं ग्रहस्य
पूर्वं प्रतिपादितं ॥ तच्छीघ्रनीचोच्चवृत्ते अनुलोमगमनं ग्रहस्य बोध्यम् ॥ अत एव नीचोच्चवृत्ते भग
णांकितेस्मिन्नित्यादिना ग्रहचिन्हदानं यदुक्तं तत्प्रतिवृत्तस्थितिवैपरीत्येनैवोक्तम् ॥ प्रतिवृत्तस्थित्य
नुरोधात् नीचोच्चवृत्ते ग्रहचिन्हकरणे तु कक्षास्थमध्यग्रहचिन्हात् प्रतिवृत्तसंबंधिकर्णसूत्रकक्षा
संपातरूपस्पष्टग्रहस्थानं यदंतरेण यद्दिशि तदंतरेण नीचोच्चवृत्तसंबंधिकर्णसूत्रकक्षासंपात
रूपस्पष्टग्रहस्थानं तद्विपरीतदिशीति फलस्य धनर्णतावैपरीत्यापत्तेः ॥ अतः प्रतिवृत्त
नीचोच्चवृत्तस्थित्यैक्यसंपादनार्थं नीचोच्चवृत्ते तद्विपरीतगमनं ग्रहस्याऽभ्युपेयमवश्यमिति भावः ॥
ननु तथाऽप्येकरूपग्रहस्योभयत्राऽवस्थानाऽसंभव इत्याऽऽशंकातु अनायासतः सिद्धास्त्वेत्यत आह
एकेति ॥ सा गतिः नाम कक्षास्थराशिक्रममार्गरीत्या वगत प्रतिवृत्तमार्गसंबंधिनी ग्रहस्य सा गतिः
एका एव मुख्या ग्रहस्य स्वशक्त्या पूर्वाभिमुखगत्यंगीकारात् ॥ तस्माच्च प्रतिवृत्ते प्रत्यक्षत्वात् ॥
ग्रहस्य प्रतिवृत्तस्थस्यैव भ्रमतीति भावः ॥ ननु फलस्वरूपस्य तदुभयप्रकारेणैक्यात् नीचोच्च


शिव

सा गतिः एका एव मुख्या = १

परं तु नीचोच्चवृत्ते ग्रहस्य अन्यत् गमनं नाम प्रतिवृत्तादि विलोमगमनं यदुक्तं तत्प्रतिभानं एव नाम नीचोच्चवृत्तस्थित्या प्रतिभासमात्रमेव प्रतिलोमगमनं न वास्तवं ततः ॥ यदेतन्नीचोच्चवृत्तं तत्प्राज्ञैः प्रकृष्टं जानन्तीति प्रज्ञाः तैः प्राज्ञैः पूर्वाचार्यैः ॥ प्रवृत्तादिभ्योऽण् इति प्राज्ञाः ॥ फलार्थं नाम फलवासनाबोधनिमित्तं प्रविकल्पितं परिकल्पितमित्यर्थः ॥ न वास्तवभूतं उक्तं अर्थात् नीचोच्चवृत्तं वास्तवभूतं न ॥ प्रतिवृत्तकल्पनं तु यथार्थानुभवसिद्धमित्यर्थः ॥ अत एव ग्रहः प्रतिवृत्तस्य एव भ्रमति ॥ इति ॥ २५ ॥ ननूभयत्र फलस्वरूपाऽभेदात् भंगीद्वयेनैव स्पष्टग्रहस्यानेकत्वैव भवतीति तत्कथं ज्ञेयं प्रतिवृत्तनीचोच्चवृत्तयोर्महत्त्वघो ग्रहगमनस्योऽन्यथा प्रतिपादनादिति मंदाशंकायाः उत्तरं मिश्रभंगीकथनरूपमुपजातिकयाऽऽह ॥ मू ॥ भंगीद्वयं चेल्लिखितं विमिश्रं वृत्तद्वये यत्र यथोक्तदत्तैः ॥ नीचोच्चवृत्तप्रतिवृत्तयोगे भवत्यऽवश्यं द्युचरस्तदानीम् ॥ २६ ॥ टी ॥ चेद्यदि विमिश्रं यथा स्यात्तथा लिखितं यत्र भंगीद्वयं अत्र नाम भंगीद्वये यत्र प्रतिवृत्तनीचोच्चाख्यं वृत्तद्वयं अस्मिन् वृत्तद्वयेऽपि यथोक्तरीत्या दत्तः यः द्युचरः नाम ग्रहः स द्युचरः नीचोच्चवृत्तप्रतिवृत्तयोगे तदैनी अवश्यं भवतीत्यर्थः ॥ अर्थात् ॥ यथोक्तग्रहदानेन पूर्वग्रहचिन्हे चिन्हमायाति न वा इति तद्वृत्तसंपाते ग्रहचिन्हं भवति अतो द्वितीयवृत्ते पृथग्ग्रहदानं कृत्यस्य सवारणार्थकः अपि शब्दः द्वितीयवृत्ते यथोक्तग्रहदानेन पूर्वग्रहचिन्हे चिन्हमायाति न वा इति संशयनिरासादिति ॥

९२

॥ ननुप्रतिवृत्तेग्रहस्यगमनान्नीचोच्चवृत्तेग्रहगमनेविपरीतफलवासनाऽन्यथानुपपत्त्यायत्क
ल्पितं तन्नयुक्तं कुतः ॥ एकस्यग्रहस्यविरुद्धक्रियात्वाऽऽ॥ अयुक्तत्वाऽसंभवेन वस्तुतस्तदऽसं
भवात् अतः दृष्टान्तेनोपजातिकयातत्साधयति ॥ मू॰ ॥ यथाभवेत्तैलिकयन्त्रमध्ये काष्ठ
भ्रमोगोभ्रमतोविलोमः ॥ नीचोच्चवृत्तभ्रमणं तथान्यत् स्याद्गच्छतोऽपि
प्रतिमण्डलेन ॥ ३७ ॥ टी॰ ॥ यथातैलिकयंत्रमध्ये नाम कोल्हू इतिहि
गर्त्तभाषयाप्रसिद्धयंत्रमध्ये यथा काष्ठभ्रमः नाम तिलपीडननि
मित्तऊर्ध्वकाष्ठं प्रदत्तं तस्यस्वतो भ्रमः सभ्रमः गोभ्रमतः ना
म बलीवर्दभ्रमणात् विलोमः नाम [illegible] विपरीतोभवति ॥ अर्थात्
यत्र गौरपसव्यं भ्रमति तत्र ऊर्ध्वकाष्ठं तथा भ्राम्यमाणमपि
[illegible] स्वांगेनसव्यं भ्रममुत्पादयतीत्यर्थः ॥ यथा ॥ तथा प्रतिम
डलेन नाम प्रतिमंडलमार्गेण गच्छतोपिग्रहस्य नीचोच्चवृत्त
भ्रमणं अन्यत् नाम ऊर्ध्वकाष्ठभ्रमणवत् स्यात् ज्ञेयमित्य
र्थः ॥ अर्थात् नीचोच्चवृत्तेग्रहस्यभ्रमणंन वस्तुभूतं किंत्वायास
मात्रं सूचितं ॥ तथाच ॥ प्रतिमंडलग्रहगमनवत्कक्षायामपिम
ध्यग्रहगमनात् तदनुरोधेन नीचोच्चवृत्तस्यापि तत्रभ्रमणात् तत्र
ग्रहभ्रमणं विपरीतं दृष्टान्तात्सिद्धमितिभावः ॥ ३७ ॥ श्रीकृष्णायनमः ॥



॥ भिन्नभङ्गीयम् ॥

५१ममंदफलज्यापरमशीघ्रफलज्याव्यासार्धाभ्यां =२

॥ ननु मध्यग्रहचिन्हात् मंदनीचोच्चवृत्ते शीघ्रनीचोच्चवृत्तदयस्योल्लिखनात्तदनुरो
धेन नीचोच्चवृत्तमध्यात् नाम केंद्रात् स्पष्टग्रहस्थानद्वयं भवति स्थानद्वयाच्च मंदशीघ्रा
त्मके फलद्वये सिद्धे ॥ तत्र केन फलसंस्कारेण ग्रहस्य स्पष्टत्वं भवतीत्यत आह ॥ मू॥
मध्यगत्या स्वकक्षायां वृत्ते व्रजेन्मंदनीचोच्चवृत्तस्य मध्ये यतः ॥ तद्वृत्तौ शीघ्रनीचोच्चम
ध्ये तथा शीघ्रनीचोच्चवृत्ते स्फुटः खेचरः ॥ २० ॥ टी ॥ स्वकक्षावृत्ते मध्यगत्या ग्र
हः व्रजेत् गच्छेत् ॥ ननु कक्षावृत्ते ग्रहावस्थानाभावात्तत्र कथं गच्छतीत्यत आह ॥
यतः कारणात् मंदनीचोच्चवृत्तस्य कक्षास्थमध्यग्रहचिन्हं मध्यं केन्द्ररूपो भवति ॥
तथा च ॥ ग्रहावस्थानाभावेपि मध्यग्रहभोगस्थानस्य कक्षायां सत्वात्कल्प्यते मध्यग्रह
गमनं मध्यगत्या ॥ अन्यथा मंदनीचोच्चवृत्ते फलज्यानार्थं किंयमुल्लेख्यमितिभावः ॥ ए
तेन मध्यग्रहस्थाने शीघ्रनीचोच्चवृत्तं नोल्लिखेदिति सूचितं ॥ ननु तत्कस्मान्नोल्लिखेदत
आह ॥ पुनः तद्वृत्तौ नाम मंदकर्णसूत्रसक्तकक्षावृत्तपरिधिप्रदेशे मंदस्फुटस्था
ने शीघ्रनीचोच्चवृत्तस्य मध्यं स्याद्यतः ॥ यथा मध्यग्रहस्थाने कक्षायां मंदनीचोच्च
वृत्तस्य मध्यमुचितं तथा मंदस्फुटग्रहस्थाने कक्षायामेव शीघ्रनीचोच्चवृत्तस्य म
ध्यं भवतीति ॥ तत्तत्समुल्लेख्यम् ॥ यथा मंदनीचवृत्ते मंदस्फुटः ग्रहो भवति तथा शी
घ्रनीचोच्चवृत्ते मंदस्फुटग्रहभोगस्थानेनयस्थानं तत्र स्फुटः किंरूपः खेचरः ना
म ग्रहो भवति ॥ तथा च ॥ मध्यग्रहस्थाने उभयोः फलयोरभावात्केन फलेन स्पष्टत्वमित्याशंका

विमंदलेग्रहावस्था नम् =८

क्षावृत्ते =८

शीघ्रनीचोच्चवृत्तम् =

शेयः१

(श्रीः)
८३

93

॰ मंदस्पष्टग्रहस्य च = १

॥ ननु शीघ्रनीचोच्चवृत्ते स्फुटग्रहाऽवस्थानात्तस्य च मंदफलसंस्कारेण ज्ञानाच्छीघ्रफलं व्यर्थमित्यतः फलद्वयसंस्कारक्रमोपपत्तिकथनच्छलेन तदुत्तरं तत्प्रसंगादन्यदपि प्रश्नगर्विणाह ॥ मू ॥ शीघ्रनीचोच्चवृत्तस्य मध्यस्थितिं ज्ञातुमादौ कृतं कर्म्म मान्दं ततः ॥ खेटबोधाय शैघ्रं मिथः संश्रिते मान्दशैघ्रे हि तेनाऽसकृत्साधिते ॥ २९ ॥ टी ॥ कक्षावृत्ते शीघ्रनीचोच्चवृत्तस्य मध्यस्थितिं नाम केन्द्रावस्थानरूपां मध्यस्थितिं ज्ञातुं अर्थात् शीघ्रनीचोच्चवृत्तस्य मध्यकक्षायां कुत्र वर्त्तत एतादृशज्ञानार्थं आदौ नाम प्रथमं मान्दकर्म्म

=शीघ्रनीचोच्चवृत्तस्य=
॰ स्फ =

मध्यग्रहे कृतम् ॥ मंदस्फुटग्रहस्यानस्य शीघ्रवृत्तमध्यत्वात् ॥ ततः नाम तस्मादनंतरं खेटबोधाय स्पष्टग्रहज्ञानाय अर्थात् शीघ्रनीचोच्चवृत्तस्थितो ग्रहो येन कक्षाप्रदेशमार्गेण भूपृष्ठस्थजनैः दृश्यते तं कक्षाप्रदेशं तस्य ग्रहस्य स्फुटभोगस्थानज्ञानाय शैघ्रं कर्म्म मंदस्फुटे कृतम् ॥ हि नाम यतः कारणात् मान्दशैघ्रे फले मिथः नाम परस्परं संश्रिते नाम सापेक्ष्ये तेन कारणेन ते मान्दशैघ्रफलेऽसकृत् नाम अनेकवारं साधिते ॥ अयमर्थः ॥ मध्यग्रहस्य स्थूलत्वात्तत्साधितमंदफलं स्थूलं तेन संस्कृतः मंदस्पष्टोपि स्थूलः ॥ अतः असकृत्साधनेन उत्तरोत्तरं ग्रहस्य सूक्ष्मत्वसिद्धिरिति स्पष्टाधिकारे वक्ष्यते तत्रैव द्रष्टव्यमित्यलम् ॥ एवं नास्ति ॥ मंदप्रतिवृत्ते यत्र शीघ्रोच्चभोगस्थानं तदभिमुखं मंदप्रतिवृत्तकेन्द्राच्छीघ्रोत्पन्नफलज्यान्तरेण यत्स्थानं तन्मध्यत्वेन त्रिज्याव्यासार्धवृत्तं शीघ्रप्रतिवृत्तं ॥ इत्यादि विश्वरूपकृतवृहट्टीकायां द्रष्टव्यम् ॥ एवं नमतं तत्र सम्यगुपपादितम् ॥ मया तु भंगया

+

शिव.
८३

॥ यथा भौमस्पष्टफलज्या २३।२० भुजज्या ११८ भुजफले २२।५६।४० मंदकलांशाः १०।२० कर्णः ११८ अनुपातात् भुजफलम् २३।२०
= मंदकलांशाः २२।१० अनयोरंतरं दश १० कला अतः स्वल्पांतरान्न कृतः = १३

॥ ननु मंदशीघ्रफलवासनायामुक्तरीत्या ऽभेदाच्छीघ्रफला
नयने कर्णानुपातवन्मंदकलानयने कर्णानुपातः कथं नो
क्तः इत्याशंकाया उत्तरमिन्द्रवज्रोपजातिकाभ्यामाह ॥ मू ॥
स्वल्पान्तरत्वान्मृदुकर्म्मणीह कर्णः कृतो नेति वदन्ति
केचित् ॥ त्रिज्योद्धृतः कर्णगुणः कृतेपि कर्णे स्फुटः स्या
त्परिधिर्यतोऽत्र ॥ ३० ॥ तेनाद्यतुल्यं फलमेति तस्मात्कर्णः
कृतो नेति च केचिदूचुः ॥ नाशंकनीयं न चले किमित्थं यतो
विचित्रा फलवासनात्र ॥ ३१ ॥ टी ॥ इह नाम गणिताध्या
ये मृदुकर्म्मणि नाम मंदफलानयने कर्णः नाम मंदक
र्णोऽनुपातः स्वल्पांतरत्वात् नाम विनानुपातं यत्फलं
यश्चानुपाताज्जाते फलं ॥ अनयोरननुपातानु
पातजयोः फलयोरल्पांतरत्वात् मन्दकर्णानुपातः
न कृतः नाम नोक्तः इति नाम एवंप्रकारेण मंदकर्णानुपा
तोऽनुक्तिः केचिदुपपत्तिज्ञाः गणकाः वदंति ॥ अस्मादून
स्य देशांतरोदयांतर भुजांतर चरादिकस्य संस्कारो दत्तजलौज
लिकः स्यादिति नैकथमुक्ताः ॥ त्वेयत्योऽस्वरसात्केचिदित्युक्तिः

॥ अथ वलनमते भंगयाछाद्यः ॥

स्थिता ॥ अथ ग्रन्थं ... तस्माद्ग्रन्थमानमाह ॥
ग्राह्यमिति ॥ तन्नु मंदस्पष्टः मंदकर्णेन त्रिज्यया ऽपि ... त्तत्वं

(श्रीः ९४)

९५

१ कर्णेकृते नाम ५ = १ ॥ १ अपि शब्दाद्दोर्ज्योह्रसते एव = १

त्रिज्यातुल्यत्वाऽभावात् १ मंदकर्णानुपाते कृते सति मंदफलेऽवशेषायुज्यते एव इत्यतो हेतुमाह ॥

त्रिज्येति ॥ यतः कारणात् अत्र नाम मंदकर्मणि परिधिः नाम प्रागुक्तमंदपरिधिः क

र्णगुणः नाम मंदकर्णगुणः त्रिज्योद्धृतः नाम त्रिज्याभक्तः स्फुटः स्यात् नाम स्फुटो

मंदपरिधिर्भवति ॥ एतदुक्तं भवति ॥ त्रिज्याभक्तः परिधिः कर्णगुणः इत्यादि मंदकर्मणि

मंदकर्णतुल्येन व्यासार्धेन यद्वृत्तमुत्पद्यते तत्कक्षामंडलं तेनैव ग्रहो गच्छति ॥ यो मंदपरिधिः

(पाठपठितः स त्रिज्यापरिणतः अतोऽसौ कर्णव्यासार्धपरिणाम्यते ~~ततोऽनुपातः~~ ॥ ग्रहाणां

इदृश्यत्वात् = ६ कर्णाग्रे स्थितत्वात् व्यधिकरणपरिधिनाफलानयनस्याऽनुचितत्वाच्च ॥ ततोऽनुपातः ॥

यदि त्रिज्याव्यासार्धे उक्ताः परिधयः तदा कर्णव्यासार्धे के ॥ एवं कर्णव्यासार्धवृत्ते स्फुटप १रू१ = ८

रिधिर्जाता ॥ अर्थात् पाठपठितपरिधेः कर्णगुणः त्रिज्याहरः कर्णव्यासार्धवृत्तरूपस्पष्ट

इष्टग्रहभुजज्यात्वर्थः = ६ परिधिः ॥ अनेन स्पष्टपरिधिना दोर्ज्या गुण्या भांशै ३६० र्भाज्या ॥ एवं स्फुटपरिधिरूप

वृत्ते दोर्ज्या लब्धा ॥ अर्थादत्रापि अनुपातः ॥ भांशमिते ३६० परिधौ इष्टग्रहसंबन्धिनीयं +

दोर्ज्या तदा कर्णव्यासार्धवृत्तरूपस्फुटपरिधौ का ॥ एवं स्पष्टपरिधौ भुजज्या सिद्धा ॥

पुनरप्यनुपातः ॥ यदि स्वकर्णव्यासार्धवृत्ते इयं दोर्ज्या तदा त्रिज्या ३४३८ व्यासार्धवृत्ते

का ॥ एवं स्फुटपरिधिदोर्ज्या त्रिज्यया गुण्या कर्णेन भाज्या जाता त्रिज्याव्यासार्धवृत्ते

दोर्ज्या ॥ एवमत्र त्रिज्यातुल्ययोः कर्णतुल्ययोश्च गुणहरयोस्तुल्यत्वान्नाशे कृते पूर्व

(शिव ९४)

फलतुल्यमेव फलमागच्छतीति ब्रह्मगुप्तमतम्॥ अनुपातानां दर्शनञ्च॥ त्रि·व्यासार्धे। कर्ण·ज्या। पा·परि·

(पा·परि)×(कर्ण·ज्या·) / (त्रि·व्यासार्ध·) कर्णवृत्ते स्फुटपरिधिर्जाता॥ पुनः भांश·प· / १ | पा·परि·×कर्ण·ज्या· / त्रि·व्यासार्ध· | दोः ज्या / १

{पा·परि·×कर्ण·ज्या· / त्रि·व्यासार्ध·१} × {दोः ज्या / भांश·प·१} स्फुटपरिधौ दोर्ज्यास्वरूपं·

॥ पुनरन्योऽनुपातः॥ कर्णव्यासार्धे | त्रिज्या·व्यासार्धे | पा·परि·×कर्ण·ज्या·×दोः ज्या / त्रि·व्यासार्ध·१×भांश·प·१ स्फुटपरिधौ दोर्ज्या·

(पा·परि·×कर्ण·ज्या·×दोर्ज्या·×त्रि·व्यासार्ध· / त्रि·व्यासार्ध·×भांश·परि·१×कर्ण·व्यासार्ध) तुल्ययोर्गुणहरयोर्नाशात् जातं पा·परि·×दोर्ज्या / भांश·परि·१

इयं त्रिज्याव्यासार्धे स्पष्टपरिधेः दोर्ज्यास्वरूपं सिद्धं एवम्पूर्वफलतुल्यमेव फलमायातमिति ब्रह्मगुप्तमतं॥

तेन स्फुटपरिधिना· यतः हेतोः आद्यतुल्यं फलं स्यात्· तस्मात्कारणात्· अतस्तेषमते न ~~करणी~~

कर्णानुपातयोराद्यं तयोर्नाशं भवाल्लाघवात्· कर्णः नाम मंदकर्णानुपातः फलानयने

न·कृतः इति· नाम· एतस्मात्कारणात् मंदकर्णानुपातपरिहारः· केचित् नाम· ब्रह्मगुप्त

श्रीपतिभट्टादयः ऊचुः नाम ~~चैकि~~ ॥ ऊचुः॥ ~~न चैवं शीघ्रकर्मण्यपि स्वल्पान्तरत्वात्तत्साम्य~~

वदुः ~~॥ अथवा मन्दस्पष्टपरिधेः कर्णेन स्फुटत्वं तर्हि किं शीघ्रकर्मणि न कृतम्~~

~~च~~ चतुर्वेद ~~आह~~ ॥ ~~१~~=१

~~तत्र परिधेरतिमहत्वेन बहुभागांतरत्वादिति स्वल्पांतरत्वान्मंदकर्मणि स्वनकार्यो~~ ॥ मध्यमैव य
द्येवं परिधेः कर्णेन स्फुटत्वं तर्हि शीघ्रकर्मणि कथं नकृतं अतः किं कल्प्यते किं त्रिभगुणा
दिभिराद्यसंमस्फुलमागकृति इत्युक्तं यत्तदेतदन्येषां प्रतारणपरं मिदमुक्तं वाक्यतः तद
ऽसत् इति चतुर्वेदाचार्याह ॥ अथ तत्र शीघ्रकर्मणि परिधेरतिमहत्वेन बहुभागांतरत्वादिति
९८ स्तु=५ हेतोः स्वल्पांतरत्वान्मंदकर्मणि स्वनकार्यस्तु नः त्रिज्योद्धृतः कर्ण इत्यादि पद्यं प्रतिमंडल तु=५
कक्षामंडलयोः फलस्य स्वल्पांतरप्रतिपादनपरं ~~इति चतुर्वेदाभिप्रायः~~ ॥ अतः पूर्वोक्तं स
माधाने स्वल्पांतरत्वादित्यात्मकं युक्तं इति चतुर्वेदाभिप्रायः ॥ अस्योपरि भास्कराचार्याह ॥
इत्यभिप्रायस्य पुनरावृत्ते ॥ ~~इत्थं~~ चले नाम शीघ्रफलानयने इत्थं नाम एवं मंदकर्णानु
पातपरिहारवत्परिहारः किं नाम कुतो नकृतः एवं चतुर्वेदाचार्योक्त्या शंकनीयं किं
तु न आशंकनीयं अर्थादेवमाशंका न कार्येत्यर्थः ॥ अत्र भास्कराचार्यो हेतुमाह ॥ यत इति ॥
यतः नाम यस्मात्कारणात् अत्र नाम स्पष्टक्रियागणितोपपत्ति विचारे फलवासना नाम
मंदशीघ्रफलयोरुपपत्तिः विचित्रा नाम नानाविधाः नैकरूपेत्यर्थः ॥ तथाहि ॥ प्र
तिमंडलादिकं फलोत्पादनार्थं बुद्धिकृताकाशविभागेन कल्पितं तथाक्षामंदपरिधयोप्याचार्यैर्ग्रंथे
कर्णानुपातानुक्तिदर्शनात्त्रिज्यावृत्ते मध्यमकक्षावृत्ते कल्पिता ॥ उक्तशीघ्रपरिधयः कर्णा
ऽनुपातोक्तिदर्शनात्परमशरकलावत्तत्कर्णाग्रे कल्पिताः ॥ इति ~~शं~~काऽनवकाशः ॥ आरोपे सति
निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इत्याशय अर्थात् ग्रंथेऽनुपातानुक्तिदर्शितात्तत्र

२ कारा: २　　　　　　　　　　　　　　२ तथा च श्रीपतिः =२

तथा च
~~अथ वर्त्मनान्तु~~ ब्रह्मगुप्तश्रीपतिभट्टाद्यैः [illegible] ॥ [illegible] ॥ त्रिज्याभक्तो कर्णः परिधिगुणो वाहु
कोटिगुणः ~~स्फुटकर्णः~~ । असकृन्मांदतत्फलमाद्यसमं नात्र कोटिऽस्मात् ॥ त्रिज्यागुणः स्फुटि(?) ह
तः परिधिर्यतो दोः कोटयोर्गुणोमन्दुफलानयने ऽसकृत्स्यात स्यान्मंदमाद्यसममेव फलं त
४ पूर्वमतात् = तस्मात्कर्णः कृतोनमन्दुकर्मणि · तत्र कारैरित्यादिवाक्यैरुक्तं स्फुटं ॥ ब्रह्मगुप्तमते ~~[illegible]~~ सम
स्यापि तिवार्थः ॥ इत्यलम् ॥ विस्तरं तु व हृद्दीकायां द्रष्टव्यम् ॥ ३१ ॥ अथ प्रसंगाद्भमंद्रहः स्वे
मत्रेत्युक्त　प्रतिमं मंडलेन्दुभिः सयत्रकक्ष्यावलये विलोक्यते · स्फुटो हि तत्रेत्युक्तं मनुपपन्नं · भूगर्भमिनु
ष्याणामभावादित्याशंकायाः उत्तरं ब्रह्मगुप्तोक्तं नतकर्मेतिकेषांचिद्भ्रांतिनिरस्यन् छेद्य
कलिवित्तभूव्यत्वयो जनंशाद्रूलविक्रीडितेनाह ॥ मू ॥ प्राक्पश्चात्प्रतिमंडलस्य खचरं
द्रष्टा कुमध्यस्थितः कक्षायां वलये यत्र पश्यति नतं नोतत्र भूपृष्ठगः ॥ मध्याह्ने तु कुमध्य
पृष्ठगनरौ तुल्यं यतः पश्यतस्तेनोक्तं नतकर्म लम्बनविधौ या युक्तिरत्रापि सा ॥ ३२ ॥ श्रीः
टी ॥ प्राक् · नाम प्राक्कपाले · मध्यरात्रमारभ्य मध्याह्नपर्यंतं इत्यर्थः ॥ पश्चात् · नाम पश्चिम
कपाले · मध्याह्नमारभ्य मध्यरात्रपर्यंतमित्यर्थः ॥ अत्र ग्रहाणां स्वस्वदिनरात्र्यर्धाभ्यां कपालं
३ स्य = ३　ज्ञेयं ॥ तस्मिन् प्राक्पश्चिमकपालसंबंधिकाले · प्रतिमंडलस्य खचरं · नाम ग्रहं · कुमध्यस्थि
तः नाम · भूगर्भस्थः द्रष्टा · नाम · दृष्टिकर्ता कश्चित्पुरुषः स · कक्षायां · यत्र · नाम · यस्मिन्नमा
५ नतं = १　र्गे यत्कक्षाप्रदेशसमसूत्रे प्रतिमंडलस्थं खचरं पश्यति ॥ तत्र · नाम · तत्कक्षाप्रदेशसम ·

॥ श्रीः ॥
९६

९८

५ नत=५

५ ऽभावा=१

किंतु स कर्णमार्गरूपः सूत्रः

नतं न पश्यति ॥ कुतः ॥ आनीतकर्णमार्गस्य भूगर्भसंबन्धिदृक्सूत्रत्वात् भूपृष्ठस्थानात्
प्रतिवृत्तस्य ग्रह भूपृष्ठचिन्हयोरंतरसूत्रं भूपृष्ठदृक्सूत्ररूपं कक्षायां यत्र देशे लगति
तत्समसूत्रेण भूपृष्ठगजना नतं पश्यत्येव ॥ तथा च ॥ भूगर्भपृष्ठयोः स्पष्टग्रहभेदाऽवश्यं
भावादुक्तरीत्या भूगर्भस्थितस्य स्पष्टग्रहज्ञानात् भूगर्भपृष्ठदृक्सूत्रयोरंतरं भूगर्भस्थग्रहे भूपृ
ष्ठस्थग्रहस्य भोगसिध्यर्थं गर्भपृष्ठसूत्रयोरंतरं संस्कार्यमेवेति भावः ॥ आर्षग्रन्थे एतत्संस्कारा
ऽनुक्तेः पृष्ठगर्भसूत्रयोरन्तरैक्यकल्पनात् भूगर्भपृष्ठे च न स्पष्टग्रहभेद इत्यस्य निरासार्थं कः खलु
शब्दः ॥ तेन केयं भूवृत्तलिखनेन भूगर्भपृष्ठयोः प्रत्यक्षभेदात् यथा भूगर्भे प्रतिवृत्तस्य
ग्रहांतरकर्णसूत्रं तथा भूवृत्तपरिधिरूपभूपृष्ठप्रतिवृत्तस्य ग्रहांतरे भूपृष्ठसंबन्धिग्रहस्य
दर्शनमार्गरूपः कर्णस्तद्भिन्नः प्रत्यक्षः इति कक्षायां ग्रहस्य स्पष्टभोगभेदः प्रत्यक्षसिद्धः
इति भूवृत्तलिखनं सप्रयोजनकं ॥ इति खलुशब्देन द्योतितं ॥ ननु तद्दृक्सूत्रयोरंतरं गणितेनाऽसिद्ध
मित्यत आह ॥ मध्याह्नेति ॥ मध्याह्ने तु मध्याह्ने नाम ग्रहमध्यदिने तुकारात् कपालसं
धिरूपे तेन ग्रहमध्यरात्रेऽपीत्यर्थः ॥ कुमध्यपृष्ठगनरौ नाम भूगर्भपृष्ठगनरौ भूगर्भपृ
ष्ठस्थितौ यौ नरौ तौ तं प्रतिवृत्तस्थग्रहं तुल्यं नाम कक्षायां समभोगरूपं यतः कारणात्
पश्यतः ॥ तेनुकारणेन स्पष्टाधिकारोक्तं उक्तं नतकर्म नाम स्पष्टाधिकारोक्तं ब्रह्मगुप्तसं
म्मतं नतकर्म युक्तियुक्तमित्यर्थः ॥ तथा च कपालसंधौ याम्योत्तरवृत्तस्थे प्रतिमंडलस्य ग्रहे

तस्मा लगति तं सूत्रं गं ॥ तु भूपृष्ठसूत्रं भूगर्भान्नीतं सूत्रं यत्र कक्षायाः प्रदेशे लगति

शिव
९६

हो यद्विनीतं स्वगोलेयाभ्यो न्तरांतरे लगति ॥ तत्रा ऽस्मादृष्टैर्ग्रहो दृश्यते ॥ इति तत्र
सूत्रयोः पूर्वापरांतरा ऽभावात्कक्षायांभोगः स्पष्टस्त्व ऽभिन्न इतितत्सूत्रांतरं नतव
शादुत्पन्नमतोयुक्तं सूर्यचन्द्रयोर्नतकर्मब्रह्मगुप्ताभिमतमुक्तमन्येषांस्वल्पांतरा

८ अत्तः = ४ दुपेक्षितमितिभावः ॥ स्वयमेवाचार्यः सूत्रांतरानयनेकारणंप्रतिपादयति ॥ लंबनवि
धो नाम लंबानयनप्रकारे या युक्तिरस्ति सायुक्तिः अगाप्यस्ति ॥ अत्र नाम
सूत्रांतरानयने सैवयुक्तिः ज्ञातव्या ॥ अपि शब्दस्तदन्यतरेतिव्यवच्छेदार्थकिः ॥
इत्यलम् ॥ विशेषजिज्ञासुभिः भ्रमरीचीद्रष्टव्या ॥ ३२ ॥ अथप्रसंगात्सूर्यग्रंथोक्त
स्पष्टगत्यानयनभिन्नं लोकं स्पष्टगत्यागेनयनप्रकारमुपगीत्या छेद्यकोक्त्यासम
र्थयति ॥ मू ॥ कक्षामध्यगतिर्यग्रेखाप्रतिवृत्तसम्पाते ॥ मध्येवगतिस्स्पष्टापरं
फलेतगवेटस्य ॥ ३३ ॥ टी ॥ कक्षावृत्तमध्ये विद्यमानायास्तिर्यक्रेखा भूबिंदु
स्पृष्टा ऋजुरूपा तस्याः रेखायाः प्रतिवृत्तेनसह युगसंपातः नाम योगः त
स्मिन् संपाते नाम योगे अर्थात् कक्षावृत्तमध्यस्थतिर्यग्रेखासक्तप्रतिवृत्तपरिधौ

कक्षायां ग्रहे सति तस्यैवास्य स्पष्टा गतिः
मध्यास्व मंदस्पष्टगतिरेव स्पष्टगतिर्वीध्या ॥
॥ इतिभावः ॥

(श्री: २७) ९७

एवकारात् तत्र पूर्वग्रंथोक्तप्रकारेणानीतस्पष्टगतिनिरासः ॥ मध्यगतिस्तु मंदस्पष्ट
गतिरेव ॥ कुतस्तत्र मध्यगतितुल्या स्पष्टगतिरित्यत आह ॥ परमिति ॥ तत्र नाम
तादृशगतिरन्तरपरिधेयैकदेशे खेटे सति तस्य खेटस्य यतः परं फलं ॥ यतः कारणात्
तत्र खेटस्य शीघ्रफलं परमं अतः स्पष्टा गतिर्मध्या एव भवतीत्यर्थः ॥ अद्यतन श्वस्त
नग्रहयोरंतरं गतिः ॥ फलयोरंतरं गतिफलं ॥ यत्र ग्रहस्य परमफलं तत्र भुजज्या परमा
कोटिज्याऽभावश्च अतः कोटिज्याऽभावात् गतिफलाऽभावो भवति गतिफलाऽभा
वात् मध्यैव स्पष्टगतिः ॥ यत्र गतिफलं परमं तत्र भुजज्याऽभावात् ग्रहफलाऽभावः
कोटिज्यायाः परमत्वात् गतिफलं परमं ॥ तत्र मध्य एव ग्रहः स्पष्टो भवति ॥ त्रिभिरनव
राशिमित्ते केंद्रे ३।००।००।०० अथवा ९।००।००।०० एतन्मितं यदा ग्रहस्य केंद्रं भवति
तदा परमफलोत्पत्तिरित्यर्थः ॥ एतादृशग्रहस्य
तदा परमफलोत्पद्यते अप्युगमपदांते परमफलोत्पत्तीरित्यर्थः ॥ एतादृशग्रहस्य
मध्यगतिरेव स्पष्टगतिः ॥ कोटिज्याऽभावात् ॥ एतेन ॥ मध्यैव गतिः स्पष्टा वृत्तद्वययोग
गे द्युचरे इति लल्लोक्तं निरस्तं ॥ न हि वृत्तद्वययोगे ग्रहस्य परमफलोत्पत्तिर्दृश्यते ॥ ३३ ॥
अथ प्रसंगाद्वक्रानुविपरीतमुद्भावित्यत्र ग्रहस्य पूर्वगमनात् पश्चिमगतेरसंभावितत्वाशंका छेदयन्

१ कक्षामध्यगतिर्य ग्रे खायुत १=३
१ गतिः ७
१ परमफलोत्पत्ते=५
१ केनाप्युपपत्त्या =२

शिव २७

मू॰ ॥ वंशोद्भवाभिः प्रतिमंडलाद्यं कृत्वा शलाकाभिरिदं यथोक्तं ॥ प्रचाल्य तुंगं खचरं च गत्या वक्रादि सर्वं खलु दर्शयेच्च प्रागदृष्टि॰ ॥ ९४ ॥ टी॰ ॥ वंशोद्भवाभिः शलाकाभिः नाम॰ सरलसिद्धवंशोत्पन्नशलाकाभिः इदं प्रतिपादितं दर्शयेत् । द्राक् प्रतिमंडलाद्यं॰ नाम॰ शीघ्रप्रतिमंडलादिकं ॥ आदित्यादिकक्षावृत्तं तिर्यगूर्ध्वाधरं रेखासमलवकलाविकलाविभागाद्युक्तं नादिकेदीनां ग्रहणं ॥ तेषामंकनादिकं॰ यथोक्तं कृत्वा॰ नाम॰ यथोक्तरीत्या कृत्वा॰ प्रत्यहं॰ तुंगं॰ नाम॰ ग्रहशीघ्रोच्चं॰ खचरं च॰ नाम॰ मंदस्पष्टग्रहं च॰ गत्या॰ नाम॰ स्वगत्या॰ प्रचाल्या उक्तितं कृत्वा॰ पश्चात्॰ वक्रादि॰ ॥ आदिपदान्मार्गगतिः अतिचारगतिश्चैषां ग्रहणं ॥ सर्वं शीघ्रमंदाद्यष्टविधगमनमार्गोक्तं॰ तमष्टविधगमनमार्गं॰ गुरुः ॥ गृणाति तत्त्वं यः स॰ गुरुशब्दवाच्यः ॥ एतादृशः गुरुः॰ शिष्याय दर्शयेत् ॥ खलु इति पदात्॰ अवश्यं तेन वक्रतत्त्वनिश्चयो भवतीति सूचितं ॥ एवं कृते यदा भित्तौ वंशशलाकजं कक्षावृत्ते स्पष्टग्रहस्थानेऽजाते॰ तत्पूर्वदिनजस्पष्टस्थानात् द्वितीयदिनजस्य ग्रहस्थानं अग्रे भवति, तदा ऋजुमार्गप्रवृत्तिः ग्रहस्य ज्ञेया ॥ नीचासन्ने तु पृष्ठत एव भवति॰ तदा वक्रगतिः ग्रहः कक्षावृत्ते ॥ नवक्रतो वक्रागतिः प्रतिवृत्ते ग्रहस्यागमनात् द्वितीयस्पष्टाधिकारे म

१ तस्मिन्नेतादृशे ध्रुवके १ ४ ४

॥ श्रीकृष्णाय ॥ ९४ ॥ उक्तं तत्र च॰ द्रष्टव्या॰ ग्रहमाला

(श्री: ९८)

९४

॥ अथ ग्रहोच्चांतरवशात् ग्रहफलोपपत्तेर्यदंतरं केंद्रसंज्ञं कथमुक्तमित्यत उपजा
तिकयाह ॥ मू ॥ वृत्तस्य मध्यं किल केंद्रमुक्तं केन्द्रं ग्रहोच्चांतरमुच्यतेऽतः ॥ यतोंतरे
तावति तुंगदेशान्नीचोच्चवृत्तस्य सदैव केंद्रमिति ॥ ३५ ॥ टीका ॥ यतः कारणात् वृत्तस्य
मध्यभागः बिन्दुरूपः किलेति निश्चयेन केन्द्रसंज्ञं उक्तं अतः कारणात् ग्रहोच्चां
तरं केन्द्रं नाम केन्द्रसंज्ञं सूर्यादिभिः उच्यते ॥ ननु वृत्तमध्यभागस्य केन्द्रत्वे ग्रहोच्चां
तरस्य केन्द्रत्वं कुत इत्यत आह ॥ यतः कारणात् तुंगदेशात् नाम उच्चदेशात् ताव स्थानात् = (६)
ति अंतरे नाम तावति ग्रहोच्चांतररूपेऽन्तरे कक्षावृत्ते मध्यग्रहस्थाने नीचोच्चवृत्त
स्यैव सदा नाम नित्यं केन्द्रं भवति अतः कारणात् ग्रहोच्चांतरं केंद्रसंबन्धात् केंद्र
संज्ञमुक्तमित्यर्थः ॥ एवकारात् नीचोच्चवृत्तादतिरिक्तवृत्तनिरासः इति सूचितम्
॥ ३५ ॥ ननु ग्रहस्य प्रतिवृत्तस्थत्वात्प्रतिवृत्तस्य प्रवहानिलेन भ्रमणे रात्रिदिनयोः स
दा महदंतरितत्वापत्तिः प्रतिवृत्तप्रदेशयोर्भूगोलाऽभिन्नोच्चहृदल्पयोः सत्त्वादिति
मेतामाशंकामुपजातिकया परिहरति ॥ मू ॥ ग्रहस्य कक्षा चलकर्णनिघ्नी स्फुटा भवे
द्व्यासदलेन भक्ता ॥ तद्व्यासखंडांतरितः कुमध्यात्स भ्राम्यते हि प्रवहानिलेन ॥ ३६ ॥

१८ अत्रोपपत्तिः ॥ त्रिज्याव्यासार्धे ३४३८ मध्याधिकारोक्तायोजनात्मिकाकक्षा लभ्यते तत्र शीघ्रकर्णतुल्यव्यासार्धे किं ॥ ४= अत उक्तं ॥ ग्रहस्य कक्षा चलकर्णनिघ्नी व्यासदलेन भक्ता स्फुटा भवेत् ॥ ४=१

॥ टी ॥ ग्रहस्य योजनात्मिका मध्याधिकारोक्ता कक्षा । चलकर्णनिघ्नी । नाम । शीघ्रकर्णेन गुणिता कार्या । पुनः व्यासदलेन भक्ता सती । नाम । त्रिज्यया ३४३८ भक्ता सती । स्फुटा भवेत् । नाम । स्फुटयोजनात्मिका ग्रहस्य कक्षा भवतीत्यर्थः ॥ सा कक्षा । भूकुमध्यात् । नाम । भूगर्भात् । तत्त्व्यासार्धं डांतरितं । नाम । शीघ्रकर्णाभितः व्यासार्धे नांतरितं । स ग्रहस्य स्फुट कक्षा । हि । नाम यतः प्रवहाऽनिलेन भ्राम्यते । अतः युक्तं स्फुट कक्षा नयनं यदुक्तं तत् ॥ अर्थात्स्फुट कक्षा परिधिमार्गेण ग्रहो भूगोलाद्भितः तुल्यांतरेण भ्रमतीत्यर्थः ॥ ३६ ॥ अथेदानीं भुजान्तरकर्मोपपत्तिं स्वगीर्वाणेनाह ॥ मू ॥ मध्यमार्कोदयात् स्फुटार्कोदयः स्यात् यत्तत्फलेसे यतो ऽन्तरं ॥ तेन भास्वत्फलोत्थात् भुजांतरं त्रयः स्वकलं युक्तियुक्तं निरुक्तं ग्रहे ॥ ३७ ॥ टी ॥ भानोः फलं गुणितम् अर्क युनस्य राशेर्व्यक्षोदयेन खखवनागमही १८०० विभक्तं ॥ गत्या ग्रहस्य गुणितं द्युनिशासु २१६५९ भक्तं स्वर्णं ग्रहे ऽर्कवदिदं तु भुजांतराख्यम् । अर्कस्य यत् भुजफलं । तत् अर्कयुतस्य राशेः व्यक्षोदयेन गुणितं । राशिकलाः खखवनागमहीमिता भवंति । पुनः राशिकलाभिर्भक्तं कार्यं ॥ लब्धं यत् तत् ग्रहस्य गत्या गुणितं अहोरात्रासुभिः २१६५९ भक्तं कार्यं पुनः लब्धं यत् तत् ग्रहे ऽर्क

वक्र नर्णं कार्यम् ॥ अनेन प्रतिपादितं यत् भुजांतरं तस्योपपत्तिरुद्घोष्यते ऽऽचार्यैः रनेन श्लोकेन ॥ अह र्गणोत्पन्ना ग्रहाः मध्यमार्कोदयकालिका भवंति अतएव मध्यमाख्य संज्ञया उच्चारणादिरूपेण प्रवहार ग्रहाणां ॥ ४=

॥ मध्यमार्कोदयिका येग्रहास्ते स्फुटार्कोदयिकाः कर्तुं योग्याः ॥ अतः भुजांतरेण स्फुटार्कोदयिका भवंति ॥ तत्रार्कस्य भुजफलस्यासुकरणे ऽनुपातः ॥ अर्कयुतराशिकलाभिः १८०० अर्कराशेर्निरक्षोदयासवः लभ्यंते तदार्कभुजफलस्यकलाभिः किं ॥ लब्धं भास्वत्फलोत्था ॥ असवो भवंति ॥

श्रीः
९९

अथान्योऽनुपातः ॥ द्युनिशासुभिः २१६५९ गतिकलायस्य कस्य ग्रहस्य लभ्यते ॥ तत्र भास्वत्फ
लोत्थासुभिः कति कलाः ॥ लब्धं भास्वत्फलोत्थासुजातं फलं कलात्मकं स्यात् ॥ मध्यमा कोदयात्
स्फुटाकोदयः यतः प्राक् भवति अतः तत्फले ऋणं भवतः तेनापि हेतुना इदं भास्वत्फलोत्था
सुभिर्जातं फलं कलारूपं हे ग्रहे स्वयं युक्तियुक्तं निरुक्तं ॥ यत्र मध्यमाकोदयात् स्फुटकोदयः

= स्वर्णासुभुजफले

यतः अनंतरं स्यात् अतः तत्फले स्वनामधनरूपे भवतः तेनापि च हेतुना भास्वत्फलोत्थासु
भिर्जातं कलात्मकं फलं ग्रहे स्वं युक्तियुक्तं निरुक्तं ॥ २७ ॥ अथ छेद्यकोपसंहारेण गणकस्य
प्रशंसां वर्णयति इन्द्रवज्रोपेन्द्रवज्रया ॥ मू ॥ ये दर्भगर्भाग्रधियोऽत्र तेषां स्याच्छेद्यकार्थः परमाणु
रूपः ॥ येऽन्ये जडाः कुण्ठधियश्च तेषां स्यादिन्द्रवज्राहतपद्वततुल्यः ॥ २८ ॥ टी ॥ अत्र छेद्य
वास्तुशास्त्रे ये पुरुषाः वा जनाः दर्भगर्भाग्रधियः संति ॥ दर्भगर्भस्याग्रं दर्भगर्भाग्रं तद्व
त्तीक्ष्णं भवति ॥ अर्थात् दर्भगर्भाग्रवत् तीक्ष्णबुद्धयः ये संति तेषां छेद्यकार्थः पर
माणुरूपः स्यात् ॥ सुतीक्ष्णबुद्धिपुरुषाणां पूर्वोक्तछेद्यकार्थः परमाणुरिव तुच्छो भवति
यथा परमाणुस्तुच्छो दृश्यते तथा ॥ येऽन्ये जनाः जडाश्च पुनः कुण्ठधियः लोके संति
तेषां पूर्वोक्तछेद्यकस्यार्थः इन्द्रवज्राहतपर्वततुल्यः स्यात् इन्द्रवज्राहतपर्वतः पर्वतः ॥
[illegible] त्यन्तं स्याविस्मरणं भवतीत्येषां
ते जडाः ॥ कल्पनासमर्थाः कुण्ठधियः ॥ ३ ॥

[illegible] तत्र भास्वत्फलेन भुजफलेन ... ॥ २९ ॥

शिव ९९

ऽऽऽ।।ऽ।ऽ।ऽ।।।ऽऽऽ।ऽऽ।ऽ
ऽऽऽ।।ऽ।ऽ।ऽ।।।ऽऽऽ।ऽऽ।ऽ
ऽऽऽ।।ऽ।ऽ।ऽ।।।ऽऽऽ।ऽऽ।ऽ
ऽऽऽ।।ऽ।ऽ।ऽ।।।ऽऽऽ।ऽऽ।ऽ

॥अथ छेद्यकाधिकारः समाप्तौ टीकाकारः स्वनाम सूचयति॥ गुरोः नमस्काररूपं
मंगलमाचरति. विघ्ननाशनाय॥ श्रीः॥ नत्वा श्रीगुरुपादपद्मयुगलं ध्यात्वा तु
वागीश्वरीं. तेषां पादसरोरुहः स्मरणतो लब्ध्वा च बुद्धेर्लवं॥ सत् सिद्धांतशिरोमणौ
सुधीः=८ लघुतरां टीकां मयूखाभिधां. ग्रामलग्रामसुतः समाप्तिमकरोत्सच्छेद्यके तिस्फु
टाम्.॥१॥ इति श्रीसिद्धांतशिरोमणौ गोलाध्यायस्य मयूखमालाटीकायां ग्रामलग्राम
गणकविरचितायां. ग्रहाणां स्फुटगतौ छेद्यकाधिकारः समाप्तः॥ सं. १९४३ आ
षाढ़ ब. १३॥ जम्बूनगरे॥ श्रीरस्तु सर्वजगताम्.॥ श्रीकृष्णार्पणमस्तु॥ श्रीः॥ श्रीः॥

ऽऽऽ।ऽऽ।ऽऽऽऽऽ
।ऽऽ।ऽऽ।ऽऽऽऽऽ
।ऽऽ।ऽऽ।ऽऽऽऽऽ
।ऽऽ।ऽऽ।ऽऽऽऽऽ

~~अथानंतरं गोलबंधस्य टीका यथा भास्करः स्वीयतत्त्वं... करोमि द्विजा~~
~~...जनैर्... जिज्ञासून्॥ तथाहं सदा प्रार्थितो... [illegible]॥~~ ॥अथातो
ऽनंतरं गोलबंधस्य टीका यथा भास्करेण स्वसारार्थदर्शी॥ करोमि द्विजानां सदारं
जनार्थं. समुद्भिन्नशंका (सुरम्यां स्फुटां भास्करोक्तस्य विस्तेः) ऽवकाशां बुधानां॥१॥
तत्रादौ गोलबन्धेऽधिकारी गणकं मायया ऽऽह.॥ अर्थात् कस्य गोलबंधे
ऽधिकारः केन गोलबंधः करणीयः इति भावः॥ मू.॥ सुसरलवंशशलाकावलयैः

सुधी=१ सिंधोः=४

॥श्रीः॥
१००

10

॥ टी॰॥ गणकः नाम॰ ग्रहगणितवासनानिरूपणप्रदर्शकः कश्चित्तज्जनः ॥ गोलं नाम॰ बुद्धि
कृताऽऽकाशविभागगोलकल्पितपरिधिरूपाऽनेकवृत्तानुकल्पवंशजनितवृत्तानां बंध
नं गोलाकारेण गोलबंधः तं रचयेत्॰॥ शिष्यबोधार्थं वक्ष्यमाणप्रकारेण॰ गोलं नाम॰ गोलबं
धं कुर्यात्॰॥ कैर्गोलं रचयेत्॰ अत आह॰॥ सुसरलवंशशलाकावलयैः॥ सुष्ठु अत्यासौ सरलः
इति सुसरलः॥ पुनः कर्मधारयः॥ सुसरलश्चासौ वंशः इति सुसरलवंशः सुसरलवंशस्य
शलाका इति सुसरलवंशशलाका॰॥ सुसरलवंशशलाकानां वलयः इति सुसरलवंशशला
कावलयः तैः कुंडलाकृतिगोलाकारैः सुसरलवंशशलाकावलयैरित्यर्थः॥ ननु तत्र वहुग्रं
थित्वात्॰ काठिन्याच्च॰ लोकेऽदर्शनीयत्वात् शोभनीयो न भवति॥ अत आह॥ किंभूतैः वल
यैः घृष्टैः नाम घर्षणेन शोभनीयैरित्यर्थः॥ ननु दृष्टांतरूपे सत्ये गोले ग्रहगणितपदार्थ
स्वरूपाऽवगमेऽपि भसंख्याज्ञानं न स्यादत आह॥ पुनः किंभूतैः वलयैः॥ भचक्रभागाङ्कैः॥
चक्रः द्वादशराशयः तेषां भागाः प्रदेशाः तेषामंकाश्चिन्हानि॰ तैः सहितैरित्यर्थः॥ तथा
च वृत्ते द्वादशराशिविभागाद्याः समाः कार्याः॥ आदिपदात् अंशकलाविकलानां ग्रहणं॥ ननु भ्रां
तपुरुषकृतगोलबंधे स्थिति विरुद्धतया शिष्याणामयथार्थज्ञानं स्यादत आह॥ किंभूतः ग
णकः॥ गोले च पुनः शिल्पे नाम॰ आकाशस्थितोऽपि शिल्पकर्त्तव्यतायां च अनल्पं असंतं नैपुणं नाम निपुणता॰ तदऽभिज्ञत्वं यस्यासावित्यर्थः॥ शिल्पाऽभिज्ञतां विना समभागांकनाद्यऽशक्यमिति
॥ तदाऽवश्यकत्वमितिध्येयं॥३॥

^ स्थि = २

॥ अथ गोलबंधक्रममेतिकर्तव्यताकथनद्वारा तदुद्देशं शार्दूलवृत्तेनाह॥ मू॥ कृत्वादौ ध्रु
वयष्टिमिष्टतरुजामृज्वीं सुवृत्तां ततो यष्टीमध्यगतां विधाय^ पृथुलां पृथ्वीमयथ्वीं वा दृढां॥
वध्नीयात्कुशिरासौम्ययाम्यककुभोस्तत्पत्तनारे ज्ये किभानां दृढौ गोलौ तत्परितः श्लथौ च नलिका
संस्थौ खदृग्गोलकौ इति॥२॥ टी॥ आदौ नाम प्रथमं इष्टतरुजां अभीष्टसारवृक्षका
ष्ठसंभूतां॥ तस्याः चिरकालाऽवस्थायित्वात्॥ ध्रुवयष्टिं ध्रुवौ दक्षिणोत्तरदिक्स्थौ गोल
वृत्ताद्वहिरस्थसूत्रयोरग्रसूत्रं वुध्निकृतं सूत्रं तदनुरूपां यष्टिः ध्रुवयष्टिः तां ध्रुवयष्टिं
ऋज्वीं नाम सरलाग्रभागां॥ अन्यथा वृत्ताधीतरेचतदग्ररूपध्रुवाऽनुरूपो न स्यात्॥
सुवृत्तां नाम पर्वरहितसुगोलाकारां॥ यंत्रेण कृतगोलरूपां॥ अन्यथाऽनवरतभ्रम
णाऽनुपपत्तेः॥ कृत्वा॥ ततोऽनंतरं यष्टिमध्यगतां नाम तत् नाम तस्याः यष्टेः मध्य
भागस्थां पृथ्वीं भूगोलं कृत्वा ब्रह्मणा भूगोलस्य ध्रुवयोर्मध्यस्थत्वात्॥ ननु यष्टौ भू^
गोलनिवेशनं ब्रह्मणाऽप्यऽशक्यमत आह॥ किंभूतां पृथ्वीं॥ अ पृथ्वीं नाम यष्ट्यनु
रोधेन लघुगोलरूपां॥ अनुकल्पत्वात्॥ अन्यथा ध्रुवद्वयसंसक्ताग्रयष्टेरप्यऽसंभवात्॥
भूगोलादुभययष्टिभागैकदेशोयथातुल्यौ स्यातां तथा यष्टिमध्ये भूगोलः कल्प्यः॥ इति
भावः॥ नन्वेवं भूगोलस्यापि [illegible] त आह॥ पुनः किंभूतां पृथुलां

^ विधाय = १०

कल्पनामाग
^ त्वात् = ३

॥ अथ तिर्यग् नकेनापि प्रकारेण
नाम यष्टेर संबद्धां॥
गोलभ्रमणदर्शनेन भूगोलोऽचलत्वेन दर्शनीय इ
॥ति भावः॥

श्रीः

101

पुनस्तद्बहिः नाम पृथ्वीगोलादभितः समंततः शशी सौम्यनामबुधः शुक्रस्तथा तत्सूर्यः आर भौम
इज्यो गुरुः अर्कि शनिः भानां नक्षत्राणां क्रमेण उपर्युपरि दृढान् नाम चिरकालावस्थितियोग्या
न् गोलान् यथाकाशे स्थितास्तत्स्थित्यनुकल्परूपान् यष्टिसंबद्धान् अन्यथा तत्भ्रमणे तद्भ्रमणा
नुपपत्तेः बध्नीयात् ॥ वंशादिजनितवृत्तादिसामग्र्या वक्ष्यमाणप्रकारेण निबंधनं कुर्यादित्यर्थः ॥
सर्वोपरि नक्षत्रगोलस्त्वेक एव ॥ न तु भिन्न २ नक्षत्राणां ॥ अन्यथा ग्रहक्रमवत् नक्षत्रक्रमकथनापत्तेः ॥ पुनस्तस्य दिक्तः नाम नक्षत्रगोलादभितः समंततः नलिकासंस्थौ खदृग्गोलकौ नाम खगो

खदृग्गोलकौ = लदृग्गोलौ विधेयौ ॥ किंभूतौ स्तथौ नाम परस्परमसंस्पृष्टौ ॥ अत्र खगोलदृग्गोलयोः
स्थिरत्वात् भगोलस्थानेतन्निबंधनमवकाशमन्यथा तद्भ्रमापत्तेरतो नलिकासंस्थतया स्थिरत्व
बोधार्थं भिन्नौ दर्शितौ न वस्तुतो तौ भिन्नौ इति भावः ॥ २ ॥ अथ गोलस्य स्थिरत्वात् प्रथमोद्दिष्ट
त्वाच्च खतं विवक्षुराद्यौ पंचवृत्तनिबंधनं वशांततिलकयाह ॥ मू ॥ पूर्वापरं विरचयेत्सममंडला
ख्यं याम्योत्तरं च विदिशोर्वलयद्वयं च ॥ ऊर्ध्वाधरं च मिह वृत्तचतुष्कमेतद्दीवेष्ट्य तिर्यगप
रं क्षितिजं तदर्धे इति ॥ ३ ॥ टी ॥ इह खगोलबंधे कर्तव्ये प्रथमं पूर्वापरं सममण्डलाख्यं
नाम सममंडलमेव आख्या संज्ञा यस्य एतादृशं पूर्वापरं [redacted] देशीयं वृत्तं विरचयेत् ॥ द्वि
तीयं ध्रुवद्वयोपरि सूत्रम् वृत्तानुकल्पं याम्योत्तरवृत्तं च विरचयेत् विदिशः वलयद्वयं च नाम

स्वदेशीयं स्वस्थानीयं वा = २

॥ उन्मंडलं निरक्षदेशीयक्षितिजमित्यर्थः ॥ = त्रु. ९ पं.

॥ अ गया म्योत्तरवृत्तं यष्ट्यग्रभागद्वयांतर्गत नलिकाद्वयभेदपूर्वकं कार्यमन्यथा खगोलस्य गोलाकार
त्वाऽनुपपत्तिरिति ध्येयम् ॥ एवं रीत्या इह नाम अस्मिन् खगोलबंधे वृत्तचतुष्कमेतत् स्वस्वमार्ग
गोचरं मध्ये धृ ऊर्ध्वाधः अवेध्य नाम निबंधनेन एकीकृत्य पुनः तदर्धे नाम तेषामुक्तवृत्ता
नां संपाताभ्यामर्धभागे अपरं नाम उक्ताऽतिरिक्तं तिर्यग्वृत्तं नाम स्वस्थानात् दृश्याऽदृश्य
भूगोलार्धसंधिस्थवृत्ताऽनुरूपताऽऽकाशगोलसूक्ष्मवृत्ताऽनुकल्पवृत्तं क्षितिजं नाम भूगर्भक्षित्या
लोपजीव्यं विरचयेत् नाम बध्नीयादित्यर्थः ॥ ३ ॥ अथोन्मंडलनिबंधनं वसंततिलकयाह ॥
मू. ॥ पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्यध्रुवे पललवैः क्षितिजादधः स्थे ॥ सौम्ये कुजादु
परि तैर्लवैर्ध्रुवे तदुन्मंडलं दिननिशोः क्षयवृद्धिकारि ॥ ४ ॥ टीका ॥ यत् वंशादिजं वृत्तं
पूर्वापरक्षितिजसंगमयोः नाम पूर्वापरवृत्तक्षितिजवृत्त अनयोः संपातयोः पूर्वापरदिक्स्थ
योः विलग्नं निबद्धं तत् उन्मंडलसंज्ञं स्यात् ॥ किंभूतं तदुन्मंडलं याम्यध्रुवे दक्षिण
ध्रुवे विलग्नं ॥ किंभूते ध्रुवे याम्ये क्षितिजात् नाम स्वदेशीयक्षितिजात् पललवैः अक्षां
शैः अधः स्थे ॥ पुनः किंभूतं तदुन्मंडलं ~~सौम्ये ध्रुवे विलग्नं~~ ॥ कुजात् स्वक्षितिजात् अ
क्षलवैः अक्षांशैः उपरितः सौम्यध्रुवे विलग्नं ॥ निरक्षदेशादुत्तरदेशे त्विदं दक्षिणभागे तु
क्रमे विपरीतमेनेति ज्ञेयं ॥ ननु ~~[illegible]~~ स्वदेशसंबंधेन यद्वृत्तं तदेवात्र निबंधनीयं न निरक्षदेश
संबंधिः अन्यथातिप्रसंगापत्तेः अत आह ॥ पु
नः किंभूतं तदुन्मंडलं ॥ दिननिशोः अहोरात्र
योः क्षयवृद्धिकारि ॥ तथा च दिनस्याऽल्पाधि

अनुसारभाषा

तत् नाम उन्मंडलसंज्ञं नाम एतत् कारणवशात् तन्नलिकाद्वयभेदकं वृत्तं स्वदेशयाम्योत्तरसूत्रस्थनिरक्षदेशभूगर्भक्षितिजवृत्तानुकल्पं उन्मंडलसंज्ञं स्यात् = त्रु. ५ पं.

३ कुजात् नाम याम्योत्तरक्षितिजवृत्तोत्तरसंपातात् = त्रु. ३ पं.

४ क्षितिजात् नाम याम्योत्तरक्षितिजवृत्तसंपातात् दक्षिणदिक्स्थादित्यर्थः = त्रु. ४ पं.

२ सौम्ये ध्रुवे नाम उत्तरयष्ट्यग्रसमसूत्रस्थतदग्रप्रोतनलिका [illegible] नलिकागर्भसंबंधियाम्योत्तरवृत्तैकदेशप्रदेशे दक्षिणयष्ट्यग्रसम ५
गर्भसंबंधियाम्योत्तरवृत्तैकदेशप्रदेशरूपे = त्रु. २ पं.

५ सूत्रस्वरूपे = त्रु. ५ पं.

॥ श्रीः ॥
१०२

102

कृत्वं मस्मद्देशगोचरमेतद्वृत्तेनैवाग्रे प्रतिपादनीयमस्तीति स्वदेशसंबंधेन एव वृत्तदुद्वृत्त
मिति नाम इति भावः ॥४॥ ननु दिननिशोर्घटिकात्मकत्वात्तन्न्यूनाधिकत्वं गोले ज्ञातुमशक्य
मत्र कस्मिन्नपि वृत्ते घटिकांकनाऽभावात् सर्वत्र राश्यंशानामंकनं दृष्ट्वा तु उपजातिकयाह ॥मू॥
क्षितिजपरस्वस्तिकयोर्विलग्नं स्वस्वस्तिकाद्दक्षिणतोऽक्षभागैः अधश्च तैरुत्तरतोऽङ्कितं च षष्ट्यांगनाडीवल
यं विदध्यात् ॥५॥ टी॰ ॥ अथ गोले पूर्ववृत्ततुल्यमेकं वंशशलाकाजं नाडीवलयं नाम नाडीवृत्तसं
ज्ञं वृत्तं विदध्यात् नाम निबध्नीयात् ॥ कथमत आह ॥ किंभूतं नाडीवलयं क्षितिजपरस्वस्तिकयोर्विल
ग्नं ॥ नाम बहुवृत्तसंपातः स्वस्तिकः इति पूर्वाचार्याणां संकेतः ॥ तद्वृत्तमेकाद्विभिन्नमपेक्षितं अ
त एव पूर्वश्लोके स्वस्तिकपदानुक्तिः ॥ पुनः किंभूतं तत् ॥ स्वस्वस्तिकात् ऊर्ध्वस्थितवृत्तचतुष्कसं
पातात् अक्षांशैः अक्षभागैः दक्षिणतः नाम दक्षिणभागे याम्योत्तरवृत्तप्रदेशे विलग्नं नाम नि
बद्धं कार्यं ॥ पुनः किंभूतं तत् ॥ अधः नाम अधःस्थितत्तद्वृत्तचतुष्कसंपातात् तैः अक्षभागैः
उत्तरतः नाम उत्तरभागे याम्योत्तरवृत्तप्रदेशे विलग्नं कार्यं ॥ च समुच्चये ॥ नन्विदं निरक्षदेश
क्षितिजपरत्वानुकल्पत्वेन ध्रुवद्वयाभ्यासमांतरितत्वात्तन्नाडीवृत्तं कुत इत्यत आह ॥ पुनः किंभूतं
तत् ॥ षष्ट्या अंकितं नाम चिन्हषष्टिसंख्याभिः ६० संपूर्णवृत्तमंकितम् ॥ च समुच्चये ॥ तेन
राशिभागांकननिरासो नेति सूचितं ॥ षड्भागे एका घटिका ॥ इति सिद्धम् ॥ तथा च एतद्वृत्तस्य
प्रवहभ्रमानुकारत्वेन प्रवहभ्रमणं चाहोरात्रे संभवात् घटीवृत्तसंज्ञाप्ययुक्ततरा ॥ इत्यलम् ॥

~~...र्यं = ६~~

४= रं तर्विद्ध कील द्वये प्रोतं श्लथं दृग्वलयं तद्वृत्तः कृत्वाऽ = ३॥४ पं

१ = खगोलमध्ये = १

॥ अथाऽभीष्टदृग्वृत्तनिवेशनमिन्द्रवज्रयाह ॥ मू ॥ ऊर्ध्वाधरस्वस्तिककीलयुग्मे प्रोतं श्लथं दृग्वलयं तदंतः ॥ कृत्वा परिभ्राम्य च तत्र तत्र नेयं ग्रहो गच्छति यत्र यत्र ॥ ६ ॥ टी ॥
तदंतः नाम बद्धखगोलमध्ये ऊर्ध्वाधरस्वस्तिककीलयुग्मे नाम ऊर्ध्वाधरस्वस्तिकयोर्ऽर्थात् खस्वस्तिके चाधः स्वस्तिके चान्तः कीलकौ कृत्वा तस्मिन् कीलद्वये प्रोतं
पुनः श्लथं शिथिलं दृग्वलयं दृग्वृत्तं वंशादिजं कृत्वा यत्र यत्र स्थाने ग्रहो गच्छति
तत्र तत्र स्थाने परिभ्राम्य स्वभ्रमणानुसारेण तद्दृग्वृत्तं नेयं नाम संलग्नं कार्यं ॥ श्लथमित्यनेन दृढं वृत्तं भ्रमयितुं न शक्यं अतः लघुवृत्तं कार्यं यथा तद्वृत्तस्य भ्रमणं भगोलाऽसंस्पृष्टं भवेदिति तस्य चिंतं ॥ ६ ॥ ननु खगोलनिबंधनस्थाने ग्रह भ्रमणाऽभावात्कथमुक्तं तत्रैत्यादीत्युपजातिकयाह ॥ मू ॥ ज्ञेयं तदेवाखिलखेचराणां पृथक् पृथक् कृत्वा
र चेयं तथाष्टौ ॥ दृङ्मण्डलं वित्रिभलग्नकस्य दृक्क्षेपवृत्ताख्यमिदं वदन्ति ॥ ७ ॥
॥ टी ॥ तत्तन्नाम ऊर्ध्वाधरस्वस्तिकांतः प्रोतं यद्दृग्वृत्तं खगोलस्थं तदेव अखिलखेचराणां दृङ्मण्डलं ज्ञेयं ॥ एवकारस्तद्दृग्वृत्तस्य नक्षत्रादिसंबंधाऽभावेन नक्षत्रादिदृग्वृत्ताऽसंभवनिरासार्थकः ॥ अनेनैवैकेन दृङ्मण्डलेन सर्वेषां ग्रहादिकानां स्वस्वोपरिपरिभ्राम्य विन्यस्य दृग्ज्याशंक्वादिकं दर्शनीयम् ॥ ननु मंदवोधार्थं मुक्तं सैतद्दृग्वृत्तस्य ग्रह

२८ दृग् = ६

५ = गोलसंबंधाऽभावेन गोलस्थदऽनवबोधः ५

॥ इत्यस्वरसादाह ॥ पृथगिति ॥

॥वापक्षांतरे॥ पृथक्पृथक् स्वस्वगोले। एकैकदृङ्मण्डलनिबंधनेन। यथाभ्रमद्भोलानाम
ष्टसंख्याभिमतत्वं तथा अष्टौ दृङ्मंडलानि रचयेत् नाम कुर्यादित्यर्थः॥ तथा च॥ खगो
लोर्ध्वाधरस्वस्तिकसमसूत्रेणानदोत्रग्रहगोलेयत्स्थानं तदंतः कीलयुग्मे प्रोतं श्लथं दृग्व
त्तं तत्तत्रभ्रमत्येवेति तेषां सुबोधः॥ अथ विशेषमाह॥ वित्रिभलग्नकस्य नाम वित्रिभल
ग्नस्थानस्य इदं दृङ्मंडलं नाम इदं दृग्वृत्तं परिभ्रमानीतं दृक्क्षेपवृत्ताख्यं नाम दृक्क्
क्षेपसंज्ञं पूर्वाचार्याः वदंति न दृग्वृत्तमिति॥ अतएव वित्रिभलग्नशंकुदृग्ज्या दृक्क्षेप
संज्ञः॥ सूर्यग्रहणाधिकारे उक्तम्॥ ७॥ अथ क्रमप्राप्तं गोलबंधमुपजातिकयाह॥ मू॥
बध्वा खगोलेन लिकाद्वयं च ध्रुवद्वये तन्नलिकास्यमेव॥ बहिः खगोलाद्दृधीत धीमान्
दृग्गोलमेवं खलु वक्ष्यमाणम्॥ ८॥ टी॥ खगोले उक्तप्रकारजनितवृत्तसन्निवेशरूपे
ध्रुवद्वये नाम खगोलसंबंधिया म्योत्तरवृत्ते दक्षिणोत्तरध्रुवचिन्हयोः प्रत्येकं मेकां
नलिकां दत्वा अर्थात् ध्रुवद्वयेन लिकाद्वयं बध्वा तत्तद्दृग्गोलं नलिकास्थं नाम
नलिकाधारं खगोलाद्बहिः नाम उपरि एव वंशादिवृत्तैः धीमान् नाम गणकः।
खलु निश्चयेनावश्यं विदधीत नाम कुर्यादित्यर्थः॥ एवकारात् खगोलादधः दृग्गोल
निबन्धनस्य निरासः॥ धीमानित्यनेन यथा खगोलवृत्तस्पृष्टो न भवेत्तथा नलिकायां
स्थानांतरे दृग्गोलं बध्नीयादिति सूचितं॥ ननु प्रकाशाऽभावात्कथं बध्नीयादित्यत आह॥ वक्ष्य

माणमिति॥ ननु तस्याऽऽकाशवल्लात्निबंधनं कथमित्यत आह॥ खलिक्ति॥ तथा च। दोर्ग्रादिदर्शनार्थमाचक्षकमितिभावः॥

२ वक्ष्यमाणं=११

२ मंगलत्रयांतरे=३

॥नलिकाद्वयंच॰ इतिचकारात् नलिकाछिद्रमार्गेणदृक्सूत्रेण निरासः॥ दृक्सूत्रानंतु॰ याम्योत्तरान्मंड
लभिन्ननलिकामध्यपरिधिरूपं॥अन्यथातद्बंधनाऽनुपपत्तेः॥८॥ अथप्रतिज्ञातगोलस्यनि
बंधनप्रकारं दृग्गोलसंज्ञाहेतुंचोपजातिकयाह॰॥मू॰॥ भगोलवृत्तैः सहितःखगोलो
दृग्गोलसंज्ञोपममण्डलाद्यैः॥द्विगोलजातंखलुदृश्यतेयत्क्षेत्रंहिदृग्गोलमतोव
दन्ति॰॥९॥टी॰॥अपमंडलाद्यैः भगोलवृत्तैःसहितःयुक्तःखगोलःदृग्गोलसंज्ञो
भवति॥अर्थात्॰उक्तप्रकारेणखगोलंबध्वा तत्रभगोलवृत्तानि॰ बध्नीयात्॰ तेन
॰न=८ सिद्धोदृग्गोलोदृग्गोलत्वेनव्यपदिश्यतेइतिभावः॥यतोऽग्रा॰कुज्यासमशंक्वा
द्युत्पन्नक्षेत्रं द्विगोलजातंदृश्यते॰ खलुनिश्चयेन॰अतःकारणादेनंदृग्गोलंव
दन्ति पूर्वाचार्याः॥तथाच॰॥खगोलक्षेत्रंखगोलेप्रसिद्धंभगोलक्षेत्रंभगोले॰
प्रसिद्धं॰तदुभयजंक्षेत्रंतत्र॥तत्राऽदृश्यमतस्तद्दर्शनार्थमयंगोलबंधउप
कल्पितः॰इतिहेतोःदृग्गोलसंज्ञउक्तइतिभावः॥मिश्रगोलंचापि॰॥श्रीः॥९॥
॥अथभगोलवृत्तानांज्ञानेपितन्निबंधनप्रकाराऽभावात्दृग्गोलबंधोऽप्यऽशक्यइत्यतो
भगोलसंबंधंविवक्षुःप्रथमंवृत्तत्रयनिबंधनंवंशस्थतिलकयाह॰॥मू॰॥याम्योत्तरक्षि

104

त्तिजवृत्तसुदृढं विदध्यादाधारवृत्तयुगलं ध्रुवयष्टिबद्धं ॥ षष्ट्यङ्क मत्र सममण्डलवृत्त
त्तृतीयं नाड्याह्वयं च विषुवद्दलसंज्ञितं देव ॥ १० ॥ टी० ॥ याम्योत्तरक्षितिजवृत्त आधारवृत्त
युगलं ध्रुवयष्टिबद्धं ध्रुवयष्टिप्रोतं उभयगोगुलान्तरेण पतिमभागे सुदृढं यथा
स्यात्तथा विदध्यात् कुर्यात् ॥ अर्थाद्यथा खगोले याम्योत्तरवृत्तं पुनः खमध्यात्
याम्योत्तरवृत्तार्धे यथा क्षितिजवृत्तं च निबद्धं तथैवाऽऽधारवृत्तयुगलनिवेशोऽतितात्प
र्यः ॥ अत्र भगोलवृत्तानां निराधाराऽवस्थानाऽयोगात्तत्स्थित्यर्थमिदं वृत्तद्वयमाधा
५ न=६ रार्थं खगोलसंबंध्युक्तम् ॥ एकैकवृत्तैर्यष्ट्या शिथिलता स्यात् ॥ पुनः अत्र आधारवृ
त्तयुगले षष्ट्यङ्कं नाम षष्टिचिन्हाङ्कितं तृतीयं वृत्तं सममंडलवृत्त नाम यथा खगोले याम्यो
त्तरक्षितिजवृत्ताभ्यामर्धार्धे सममंडलमस्ति तथेदं वृत्तमाधारवृत्तयुगलार्धार्धे नि
बद्धं नाड्याह्वयं भवति ॥ ननु भगोलवृत्ते खगोलवृत्तस्याऽप्रयोजनात् किमर्थं भगोले नि
बद्धं ॥ अत आह ॥ तत् नाम यत् षष्ट्यङ्कं वृत्तं निबद्धं तत् एव विषुवद्दलयम् एवका
रात्तदतिरिक्तवृत्तनिरासः ॥ चकारो वार्थकः ॥ तेन खगोले एतदनुकारवृत्तं नाड्याह्व
यं स्थिरत्वात् भगोले एतदनुकारवृत्तं विषुवत्संज्ञं चलत्वादित्यर्थः ॥ षष्ट्यङ्कनं चाग्र
क्रांतिवृत्तनक्षत्रादीनां च भ्रमणे षष्टिनाडीत्र घटीभिरितिदर्शनार्थमितिध्येयम् ॥ १० ॥

॥ अथ भगोले क्रांतिवृत्तबंधनार्थं प्रथमं क्रांतिवृत्तस्वरूपेणासिद्धं कुर्वन् स्वगविपाणाह॥
॥ मू॰॥ क्रांतिवृत्तं विधेयं ग्रहाक्ष्यभ्रमत्यत्र भानुश्च भार्धे कुभा भानुतः॥ क्रांतिपातः प्रतीपं
तथाप्रस्फुर्येटाः क्षेपपाताश्च तत्स्यानकान्यत्र येत॥ ११॥ टी॰॥ यद्दिक्षुवद्वृत्तसमं वेलाद्दिज
मन्यद्वृत्तं॰ ग्रहाद्भुं चक्रांशाद्यंकितंमप्यऽभीष्टस्थानान्मेषादि द्वादशराशिप्रथमा द्वादशांकितं
विधेयं तत्क्रांतिवृत्तम्॰॥ ननु इदं भगोलवृत्तानांमध्येकस्यानुकल्पमतआह॰॥ अत्रना॰
म॰ अस्मिन्वृत्ते॰ भानुः सूर्यः स्वकक्षायां पूर्वगत्या भ्रमतिगच्छति॥ भानुतः भार्द्धे षड्भांत
५ ग = रे कुभा॰नाम॰भूछायाँ स्वकक्षायां रविगत्या भ्रमति॰गच्छति॰ पूर्वं त्येतिभावः॥ चसमुच्चये॰॥
तेन सूर्यभूछाययोरेककालावच्छेदेन गमनम्॥ कुतो भार्धे छाया भ्रमणं॥ भूम्यभितःसू
र्यभ्रमणात् तत्कृतभूछायायाः ततोवृत्तार्धेपतनात्॰ तथा च॥ यस्मिन्वृत्ते ऽर्कः पूर्व
गत्यागच्छति तद्वृत्तानुकल्पमितिभावः॥ अथप्रसंगादेतद्वृत्तभ्रमणपातांतराणाह॥ क्रांति
पातः वक्ष्यमाणस्वरूपः स्वगत्या॰प्रतीपं नाम॰ सूर्यगमनस्थितिविरुद्धं॰तथा॰नाम॰विल
ग्नाणं॰ अर्थात् कदाचित्पूर्वतः कदाचित्पश्चिमतः भ्रमति॥ इत्याचार्याभिप्रायेणार्थः॥ मुंजा
लादिमते॰ प्रतीपं पश्चिमानुक्रमेण॰ तथा नाम॰स्वगत्याभ्रमतीत्यर्थः॥ क्षेपपाताः नाम॰
चंद्रादीनांशरपाताः वक्ष्यमाणस्वरूपाः प्रस्फुटाः नाम॰ ग्रहशीघ्रफलयुक्तसंस्कृताः वक्ष्य

माणस्वरूपाः चकारात् प्रतीपं॰ नाम॰ पश्चिमानुक्रमेण भ्रमंति॥ ननु आकाशे तेषां भ्रमणं मनुकल्पवृत्ते क
नेऽपुनक्तमतआह॥
५ एतेषि ५ = २

श्री:
१०५

105

ॐ अयनांशै रक्रांतिपातः =२

॥ नन्वाऽऽकाशे तेऽतिशये नभ्रमंतु· परंतु अनुकल्पवृत्तकथनप्रसंगे तत्कथनमयुक्तमतआह॥ अत्र वृत्ते तत्स्थानकानि आद्यन्तरांकनेनांकयेत्॥ अर्थात्· तेषां सूर्यकुभाक्रांतिपातश्चर पातानामत्र वृत्ते यत्रस्थानं तत्र तत्र तदाद्यान्तराणि अङ्कयेत् इतिभावः॥ ११॥ अथैतद्वृत्तनिबंधनं स्वरविणाह·॥ मू·॥ क्रांतिपाते च पाताद्भषट्कान्तरे नाडिकावृत्तलग्नं विदध्यादिदं॥ पाततः प्राक् त्रिभे सिद्धभागैरुदक् दक्षिणे तैश्च भागैर्विभागेऽपरे·॥ १२॥ टी·॥ इदं नाम· निर्मितं यत् क्रांतिवृत्तं तत्· क्रांतिपाते नाम· क्रांतिपातचिह्नितप्रदेशे· पातात् नाम· क्रांतिपातात्· भषट्कान्तरे नाम षड्भान्तरितप्रदेशे· चसमुच्चये· नाडिकावृत्तलग्नं नाम· पूर्वोक्तयष्ट्या नाडिकावृत्तप्रदेशाभ्यां षड्भान्तरिताभ्यां संलग्नं विदध्यात् कुर्यात्॥ पुनः पाततः नामक्रांतिपातस्थानात्· प्राक् नाम· राशिक्रमानुमार्गेण त्रिभे विभागे नाम· त्रिराश्यन्तरितक्रांतिवृत्तप्रदेशे· (सिद्धभागैश्चतुर्विंशांशैः) याम्योत्तरवृत्ताकाराधारवृत्तस्थाऽऽसन्ननाडिकावृत्तप्रदेशादुत्तर उदक् उत्तरतः सिद्धभागैः चतुर्विंशांशैः आधारवृत्तप्रदेशेन संलग्नं कार्यं॥ एवं पाततः क्रांतिपातस्थानात्· अपरे विभागे त्रिभे नाम· राश्यंकन विलोममार्गेण त्रिभान्तरितक्रांतिवृत्तप्रदेशे नाडिकावृत्तात् तैर्भागैः नाम· चतुर्विंशांशैः दक्षिणे· आसन्ननाडिकावृत्तप्रदेशात् संलग्नं विदध्यात्॥ चसमुच्चये॥ अस्याधारवृत्तसंबंधेन निबंधनं तु चतुर्विंशां

स्याद्दिनव्यासान्ताच्छ्रमस्त्याघ्नक्रांतिश्च ता·॥
स्तिर्व्यासदिनलिप्तस्रिज्यंतयः॥
ॐ सह=
पातांश

शिव·
१०५

॥ अत्रोपपत्तिः ॥ निरक्षदेशे विषुवद्वृत्ते यद्दिनेऽर्कोभ्रमति तद्दिनमारभ्य उत्तरतः भागच
तुर्विंशैः सूर्यस्यागमनं परमं ब्रह्मादिभिः दृष्टं पूर्वापरवृत्तात् एवं दक्षिणतोपि भागचतुर्विंशैर् ४
: परमोऽपचयो दृष्टः यथोपचयस्तथैवापचयः ॥ अतः उक्तं नाडिकावृत्तात् उदक् सिद्धभागै
रित्यादि ॥ निरक्षदेशीयपूर्वापरवृत्तं नाडिकावृत्तं तदेव विषुवद्वृत्तं ॥ फलादेशेपि सर्वग्रहाणां
क्रांतिवृत्तानुरोधेनैवाद्दतः ॥ १२ ॥ अथ क्रमप्राप्तं विमंडलबंधनं स्रग्विणीभ्यामाह ॥ मू॰ ॥
नाडिकामण्डले क्रान्तिवृत्तं यथा क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत् ॥ क्षेपवृत्तं तु
राश्यंकितं तत्र च क्षेपपातेषु चिन्हानि कृत्वोक्तवत् ॥ १३ ॥ क्रान्तिवृत्तस्य विक्षे
पवृत्तस्य च क्षेपपातेषु षड्भेषु चक्रुत्वायुत्तिं ॥ क्षेपपातागतः षष्ठत्र्यंशवृत्तिभे क्षे
पभागैः स्फुटैः सौम्ययाम्ये न्यसेत् ॥ १४ ॥ टी॰ ॥ नाडिकामंडले यथा क्रांतिवृ
त्तं विनिवेशितं नाम नाडिकामंडलात् उत्तरगोले उत्तरतः दक्षिणगोले दक्षिणतः
यथा क्रांतिवृत्तं न्यस्तं तथा नाम तद्वत् क्रांतिवृत्ते क्षेपवृत्तं नाम शरवृत्तं न्यसेत्
एतदुक्तं भवति ॥ क्रांतिवृत्तप्रदेशाभ्यां शरवृत्तस्य उत्तरदक्षिणगोलप्रदेशौ वृत्ताकार
रूपौ उत्तरतः दक्षिणतश्च क्रमेण यथा भवतस्तथा क्षेपवृत्तं नाम विमंडलं तथा
निवेशनीयमिति भावः ॥ तत्र कश्चकारेण शरोपिग्रहाणां क्रांतिवदेव सिद्धः ॥ श्रीः ॥

स्फुटः॥ नाडिकाच्छन्नात् चतुर्विंशांशैः २४ क्रांतिच्छन्नात् दक्षिणभागयोरेव स्थानोक्तत्वात्॥

न चेष्टापत्तिः॥ ग्रहाणां परमशरस्य चतुर्विंशांशमितानुपलंभात्॥ अतः साधारणोक्तं

विशदयति॥ सौक्षेपवृत्तमिति॥ राशयः किं तं तुकारात् पूर्ववृत्तसमं यत् क्षेपवृत्तं तन्नक्षेपवृ

त्ते। क्षेपपातेषु नाम। स्फुटपातस्थानेषु यत्र रगणितेन आगताः क्षेपपाताः तेषु चिन्हानि ॥ ४ यति=४

(क्षेप=५) उक्तवत्। नाम। क्रांतिवृत्ते शरपातस्थानचिन्हानि यथाकृतानि तथा क्षेपवृत्तेपि क्षेपपातस्था

नेषु कृत्वा ~~पुनः चसमुत्रये तेन~~ पुनः क्रांतिवृत्तस्य विक्षेपवृत्तस्य च। सषड्भे क्षेपपाते। नाम।

अंकितशरपातस्थाने सषड्भे नाम स्वस्वषड्भांतरितस्थानाभ्यां सह वर्तमाने। युतिं नामसं

106 योगं कृत्वा पुनः क्षेपपातात्ऽग्रतः पृष्ठतश्च नाम। क्षेपपातस्थानात्। अग्रतः नाम। दक्षिण

भागे राशिक्रममार्गेण त्रिभे नाम। त्रिराश्यंतरितप्रदेशे। पुनः पृष्ठतश्च नाम। पातस्थानात् पृष्ठ

भागे राश्युत्क्रमविलोममार्गेण त्रिभांतरितप्रदेशे। स्फुटैः क्षेपभागैः नाम। परमैः वक्ष्यमाणैः

स्फुट क्षेपभागैः क्रांतिवृत्तात्। सौम्ययाम्ये। नाम। अग्रपृष्ठक्रमेण। (पूर्वोक्ते) क्षेपवृत्ते शरवृत्ते अ

हे यति। विमंडलन्यसेत्। नाम। निबंधयेत्॥२४॥ अपि च कारौ समुच्चयार्थकौ ज्ञेयौ॥२४॥

४ ष्ट= ननु क्रांतिपातयोरेकत्वात् तयोः सर्वग्रहाणां शरपातांकनात् कयोः शरपातयोः संपाते

कृत्वा विक्षेपवृत्तं निबंधनीयमित्यतः क्षेपपातेषु इति बहुवचनसूचिताभिप्रायं स्फुट

(पु॰ स॰=) क्षेपभागकथनपूर्वकं स्वगर्भव्याख्यया विशदयति॥ मू॰॥ धीघ्रकर्णेन भक्ता स्त्रिभज्या

गुणाः स्युः परक्षेपभागाग्रहाणां स्फुटाः॥ क्षेपवृत्तानि षट्संविदध्यात् यथास्वस्वर

=

त्ते पस्वशरेति नामांतरम्.

[illegible]

॥टी.॥ ग्रहाणां भौमादीनां परत्वेपभागाः नाम. ग्रह छायाधिकारे पठिताः याः परमशरक

लाः ताः षष्टि ६० भक्ताः परमत्वेपभागाः स्युः तेएव परमशरांशाः त्रिभज्यागुणाः त्रिभज्यया

गुणिताः कार्याः पुनः शीघ्रकर्णेन भक्ताः फलं स्फुटाः परमशरभागाः स्युः चंद्रस्य परम

शरांशाः सार्धचत्वार एव ४ १/२ शीघ्रकर्णा ऽभावात् ॥ अत्रोपपत्तिः ॥ (वि ति ता परमशराः कर्णा

ग्रे) ॥ परमशरकलाः आचार्यैः कर्णाग्रे पठिताः ॥ भगोलस्य त्रिज्या व्यासार्धे वर्तते. अतः

भगोले क्रांतिवृत्त शरवृत्तयोः परमांतरज्या नार्था कर्णाग्रे परमशरांशोत्पत्तित्रिज्या

ग्रेकार्या. इत्यनुपातः समंजसः योग्य एवेत्यर्थः चंद्रस्य तु भगोले तद्दियत इति स्फुटः ॥ त्वे

पवृत्तेति ॥ पक्षानाम चन्द्रादिपक्षग्रहाणां त्वेपवृत्तानि नाम शरवृत्तानि ष्टथक्पृथग्वि

दध्यात् कुर्यादित्यर्थः ॥ स्वंस्वं वृत्तं इत्यनुसृत्य ग्रहाः चंद्राद्याः ग्रहाः भ्रमन्ति ॥

एवमेकस्मिन् क्रांतिवृत्ते षट् शरवृत्तानि भवंति ॥ ननु भगोलस्य क्रांतिवृत्ते शरवृत्तानां नि

बंधनं नोचितं. शरवृत्तस्य ग्रहमार्गत्वेन भगोलाधःकक्षामार्गे तन्निबंधनस्योचितत्वा

दित्यत आह ॥ स्वस्ववृत्त इति ॥ ग्रहाः इत्यनुपूर्वी चन्द्राद्याः स्वस्वशरवृत्ते भगोलस्य भ्रम

ति. स्वपृष्ठगत्या गच्छंति ॥ तथा च ॥ चंद्रादीनां भगोलाधो वस्थानेपि तत्र राशीनामभावात् तस्य

ये ता भगोले त्रिज्या एव व्यासार्धं = ९

६ एतन्मिताः = ६

६ नाम [illegible] =

श्रीः
१०७

ऽ क्रांतिवृत्तावधिर्यद्भवतिस=४

॥अथ प्रसंगात्क्रांतिशरयोः स्वरूपं स्पष्टं विवृणोति॥मू०॥ नाडिकामंडलात्तिर्यग्यत्राऽपमः क्रांतिवृत्तावधिः क्रांतिवृत्तात्तु ॥ क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाडिकावृत्तवेधे तदाले ऽपमः ॥६॥टी०॥ अत्र नाम भगोले नाडिकामंडलप्रदेशात् तिर्यक् नाम दक्षिणोत्तरमंतरं अपमः नाम क्रांतिः स्यात् ॥ ~~तत्तु द्वितीयाऽवधेरभावात् अवज्ञानं कथमत आह ॥ क्रांतिवृत्तावधिरिति॥~~ एतेन नाडिकावृत्तप्रदेशैकक्रांतिवृत्तस्थस्पष्टग्रहचिह्नयोरंतरं ध्रुवप्रोतवृत्तस्थं क्रांतिः इत्यर्थः पर्यवसितः ॥ अर्थात् क्रांतिवृत्तेयत्स्फुटग्रह-

ऽयत्स=६

ऽस्थानस्य=७ स्थाने तस्मात् नाडिवृत्तात्तिर्यगंतरं यत् सा क्रांतिः ॥ अथ शरस्वरूपमाह ॥ पुनः क्रांतिवृत्तात् नाम स्पष्टग्रहस्थानसंबंधि क्रांतिवृत्तप्रदेशात् तिर्यक् नाम याम्योत्तरमंतरं क्षेपवृत्तावधिर्यत्तद्भवति सेव शरः ॥ एतेन क्षेपवृत्तस्थस्पष्टग्रहस्थानक्रांतिवृत्तस्थस्पष्टग्रहस्थानयोरंतरं क्रांतिवृत्ताद्याम्योत्तररूपं कदंबप्रोतवृत्तस्थं शरः इति सिद्धं ॥ अथ स्पष्टक्रांत्याः स्वरूपमाह ॥ एवमिति ॥ नाडिकावृत्तवेधेतदाले एवं स्फुटोऽपमः नाम स्पष्टक्रांतिः ॥ अर्थात् नाडिकावृत्तप्रदेशैकदेशग्रहबिंबाश्रयशरवृत्तप्रदेशैकदेशयोरंतरे एवं तिर्यक् नाम ध्रुवप्रोतवृत्तस्थः स्फुटोऽपमः स्पष्टक्रांतिः सिद्धा ॥

सि०वि०
१२

॥ एतेन क्रांतिसंस्कारयोग्यश्चारोपि ध्रुवाभिमुखत्वेनोक्त इति ध्येयम्. ॥ १६ ॥ अथ पातसंगत्या क्रांतिपातस्वरूपमुपगीत्याह. ॥ मू. ॥ विषुवत्क्रांतिवलययोः सम्पातः क्रान्तिपातः स्यात्. ॥ तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे. ॥ १७ ॥ टी. ॥ प्रागुक्तयोः विषुवत्क्रांतिवलययोः विषुवद्वृत्तक्रांतिवृत्तयोः यः संपातः संयोगाश्रितभगोलप्रदेशविशेषः स क्रांतिपातः स्यात्. ॥ अर्थात्. क्रांतिविषुवद्वृत्तसंपातः इत्यगमध्यात्तराणांल्लोपात् क्रांतिपातः इति सिद्धं. ॥ यथा. चक्रपातार्द्धहानेश्चक्राधहानिः इतिवत्. ॥ अथवा. क्रांत्यर्थपातः क्रांतिपातः पातोनाम संपातः कयोः संपातः विषुवत्क्रांतिवलययोरेव. ॥ कल्पे ब्रह्मदिने तद्भगणाः नाम तस्य क्रांतिपातस्य भगणाः द्वादशराशिभोगाः सौरोक्ताः सूर्यसिद्धांतोक्ताः अयुतत्रयं त्रिंशत्सहस्त्र ३ • • • • व्यस्ताः स्युः पश्चिमगत्या एतन्मिताः स्युः अन्यत्र विशेषजिज्ञासुभिः मरीचीद्रष्टव्या. ॥ मयात्तु विस्तरभयान्नोपपादिता. अत्र वक्तव्यं तु भगोलो मूर्त एव. ॥ तत्र दक्षिणोत्तरौ ध्रुवौ कीलकरूपौ स्थिरौ भगोलांतर्गतौ तरेखा वृत्तरूप क्रांतिवृत्तानुकारं मूर्तं वृत्तं प्रतिप्रदेशं मूर्तसूत्रमशलाकाभिर्वृत्तैक

॥ ननु क्रांतिवृत्तस्य चलनात् संपातस्य क्रांतिवृत्तप्रदेशे चलने विसंपातस्य चलना-
भावात् कथं क्रांतिवृत्तभगणा एते उक्ताः सूर्यसिद्धांतादिवचनेभ्यः एषां भचक्रभ
गणसंख्यात्वात् ब्रह्मगुप्ताद्यनुक्तेश्च इत्यतः पूर्वग्रंथसंमत्या क्रांतिपातग्रहं मु
ञ्ज्याः समर्थयति ॥ मू ॥ अयनचलनं यदुक्तं मुंजालाद्यैः स एवायं ॥ तत्पदे
तद्भगणाः कल्पे गोङ्कर्तुनन्दगोचन्द्राः १९९६६९ ॥ १८ ॥ टी ॥ अयनचलने
कल्पादौ संपाते रेवतीतारायां ब्रह्मणा निवेशितत्वान्मेषादिस्तस्मात् त्रिभांतरे कर्का
दिः मकरादिः आकूपरयोस्तयोरुत्तरदक्षिणगमनवृत्तेः परमक्रांतिसंभवात् अ
यनसंधिः एकायनसमाप्तिस्तदितरायनारंभात् अथ कालांतरे कर्कादौ मक
रादौ च सूर्यस्य परमक्रांत्यदर्शनादयनसंध्यभावात् तत्पूर्वस्थाने एव परमक्रां
तिदर्शनादयनसंधिः प्रत्यक्षोदृश्येति तेनायनस्य परमगमनस्य संधिरूपस्य
चलनं स्थानांतरे संभवः इत्यर्थः ॥ व्याख्या ॥ एवं च ईश्वरेण मुंजालाद्यैराचार्यैः
यदयनचलनमुक्तं स एवायं क्रांतिपातः ॥ अतएव अयनचलनक्रांतिपातयोः
अभेदात् सर्वाचार्यसंमतत्वेनोक्तो न मत्कल्पित एवायं क्रांतिपातः ॥ ननु क्रयु
तेः तस्यायनांशा तथापि तद्ज्ञानप्रकारे एवं वृत्तवर्षेन विकलागमनादर्शना

स्यसंकेत्तसंवादात्सिद्धाः ॥ अतएव भास्कराचार्यैः स्वकृतकरणकुतूहले एतद्भगणेभ्य
स्तत्कालेऽयनग्रहभगणाद्यऽनेन ९११२८ अत्र ३० । ५४ । २५ । २३ । ५५ । ४६ । ४८ चानीयभग
णेनांशप्रयोजनाऽभावात्त्यागाद्राशेश्च भूमत्वात्त्यागादंशादिकस्य स्वल्पान्तरेणैकादशांश
नंगीकृत्यप्रतिवर्षितद्गतिकलांचाङ्गीकृत्य अथायनांशाः करणोक्तिप्रायुक्ताभवा इत्य
यनांशसाधनं निबद्धम् ॥ इत्यलम् ॥ आचार्याणांमतोद्घाटनेच्छुभिः मरीचीद्रष्टव्या तद्गति
स्वरूपापरनामकमुनीश्वराचार्यैर्विस्तरेण द्रष्टव्यं सर्वेषामभिप्रायः ॥१८॥ ननु दोर्ज्याते
भगणस्य तद्भुजकेन्द्रभोगानां रेवतीस्थानावधित्वेन ज्ञानात्तत्संपातविलोमगमनस्य
पातांशायनांशानां ग्रहभोगज्ञाने प्रयोजनाऽभावात्तन्निरूपणं व्यर्थं निष्क्रियं नमत्तवत्सं
पातादेव ग्रहो भोगः येन रेवत्यवधित्वेन ज्ञानार्थमयनांशवियोजनमावश्यकमतस्तन्नि
रूपणं सुस्पष्टग्रहस्पष्टशराऽभावे राश्याद्भिभोगाऽभावे रेवतीतारासंयोगदर्शनादित्यत
उक्तीत्याह ॥ मू ॥ तत्संजातं पातं दृक्षाख्येटेऽयमः साध्यः ॥ क्रान्तिवशाच्चरमुदयाश्च
रदलल्लग्नागमेतत्तः ज्ञेय्याः ॥१९॥ टी ॥ तत्संजातं नाम मुंजालाद्युक्तभगणेभ्यो हर्गणा
नुपात्तेन ग्रहवदानीतं भगणादिभोगं भगणाऽपगमेन राश्यादिभोगात्मकं यातं नाम
अयनचलनरूपं क्रान्तिपातं खेटे ग्रहे दृक्षा नाम संयोज्य अत्र अयमः नाम क्रान्तिः साधनी
साध्यः = १

॥ अथ प्रसंगाच्चरलग्नयोरानयनार्थं ग्रहेऽयनांशदानं सकारणमाह ॥ क्रांतिवशादिति ॥
ततः कारणात् चरदललग्नागमे नाम चरार्धलग्नयोरानयननिमित्ते ग्रहे ततः
कारणात् अयनांशरूपः क्रांतिपातः पूर्वं क्षेप्यः नाम योजनीयः कुतः कारणात्
यतः चरमुदयाः क्रांतिवशाद्भवंति ॥ अर्थात् यतः चरकालोऽहोरात्रोदयासवश्च
क्रांतिज्यातः उत्पद्यंतेऽतः क्रमेण तदानयनार्थं तद्दानं नाम क्रांतिपातस्य ग्रहे दानमा
वश्यकमिति भावः ॥ विशेषजिज्ञासुभिः मरीचीद्रष्टव्या इत्यलम् ॥ १९ ॥ श्रीरस्तु ॥
अथ क्रांतिपातसंगत्या शरपातस्वरूपमुपगीत्याह ॥ मू ॥ एवं क्रान्तिविमण्डलयोः
सम्पाताः क्षेपपाताः स्युः ॥ चंद्रादीनां यस्मात् क्षेपानयने तु ते योज्याः ॥ २० ॥ टी ॥
एवमुक्तरीत्या यथा विषुवत्क्रांतिवृत्तयोः संपातः क्रांतिपातः उक्तः तथा क्रांतिविमंडलसं
पाताः नाम क्रांतिवृत्तविमंडल नाम विक्षेपवृत्तयोः संपाताश्चन्द्रादीनां ग्रहाणां क्षेप
पाताः स्युः ॥ क्षेपवृत्तस्य क्रांतिवृत्ते संपात इत्यस्य मध्याक्षरलोपात् क्षेपपाताः ॥ अथ
वा क्षेपार्थं पाताः क्षेपपाता इति वा ॥ ते एव क्षेपपाताः यस्मात् नाम पश्चिमग
तयो भवंति ॥ अर्थात् क्रांतिवृत्ते शरवृत्तस्य पश्चिमगत्या प्रत्यहं चलतीति भावः ॥

तथा च ॥ शरवृत्ते संचरतां ग्रहाणां क्रांतिवृत्तप्रदेशेन
सहयत्तयास्यान्तरमंतरं स शरः क्रांतिवृत्ताच्चरः क्षेप
वृत्तावधिरित्यर्थमित्युक्तत्वात् ॥ २० ॥ श्रीकृष्णाय नमः ॥

पातस्य प्रयोजनमाह ॥ क्षेपानयने तु नाम शरसाधन
निमित्ते तु ते एवं चंद्रादीनां क्षेपपाताः नाम शरपाताः योज्याः यो
जनीयत्वः अर्थः ॥ तु कारस्तु दन्यानिरसार्थकः एवकारपरः ॥

श्रीः २०९

१०५

॥ शिवः ॥

॥ ननु क्रगोलरीत्यायथाक्रांतिपातसंस्कृतात्स्पष्टग्रहात् क्रांतिसाधनं तथापातयुक्तात्स्प
ष्टग्रहाच्छरसाधनमपि युक्तिसिद्धं तत्कथं छायाधिकारे मंदस्फुटात्खेचरतः
स्वपातयुक्तादित्युक्तं संगच्छते इत्यतस्तदुत्तरमुपजातिकयाह ॥ मू॰ ॥ मंदस्फुटो द्रा
क्प्रतिमंडले हि ग्रहो भ्रमत्यत्र च तस्य पातः ॥ पातेन युक्तात् गणितागतेन मन्द
स्फुटात् खेचरतः शरोऽस्मात् ॥२१॥ टी॰ ॥ यतः कारणात् मंदस्फुटः ग्रहः द्राक्प्र
तिमंडले॰ नाम॰ शीघ्रप्रतिमंडले भ्रमति॰ नाम॰ संचरति॰ मंदस्फुटगत्या॰ ॥ अत्र च॰ ॥
चकारश्चार्थे॰ ॥ नाम॰ अस्मिन्नेव वृत्ते॰ अर्थात्॰ द्राक्प्रतिमंडले एव तस्य नाम॰ मं
मन्दस्फुटग्रहस्य पातः नाम शराऽभावस्थानोऽपि॰ अत्र॰ नाम द्राक्प्रतिमंडले
एव भवति॰ ॥ तेन॰ कक्षावृत्ते वक्रभूतग्रहस्य भ्रमणाऽभावात् तदात्मकशराऽभाव
स्थानस्यापि कक्षावृत्ते रेऽभाव इत्यर्थः ॥ एतेन॰ मंदप्रतिवृत्तेऽनुपाताऽऽनीतो मध्य
ग्रहो यथा भवति॰ तथाऽनुपातानीतपातोऽपि मंदप्रतिवृत्तेऽप्याऽऽस्तामिति भावः ॥
अस्मात्कारणात्॰ गणितागतेन॰ नाम अहर्गणानुपातेन॰ मध्यग्रहवत्॰ पात[illegible]णेऽभ्य
स्तानीतेन पातेन॰ भगणत्वागातराश्याद्यात्मकपातभोगेन॰ युक्तात् मंदस्फुटात् खे
चरतः नाम॰ ग्रहात्॰ शरः॰ छायाधिकारे मंदस्फुटात्खेचर इत्यनेन सूचितः द्वितीय

श्लोकेन युक्तियुक्तं साधितमित्यर्थः ॥२१॥ निरस्तमिति॰

श्रीः ११०

110

॥ ननु सकलग्रहपातसमागमात् भुजगुणोथ निजेषुकलाहतः निजचलश्रवणोध्य
हृतो भवेदवममंडलतः स्फुटसायकइति श्रीपतिनास्पष्टग्रहाच्छर धनं कथ
मुक्तमित्यतस्तदुत्तरं चंद्रस्य विशेषं चोपजातिकयाह ॥ मू ॥ यातेथ वा शीघ्रफलं वि
लोमं कृत्वा स्फुटयात्तेन युताच्छरोऽतः ॥ चंद्रस्य कक्षावलये हि पातः स्फुटयादिधोमध्य
मपातयुक्तात् ॥ २२ ॥ टी ॥ यतः शीघ्रश्रुतिवृत्ते गणितागतपातसद्भावकल्पनेन शर
साधनस्य सपातमंदस्पष्टग्रहादुक्तेरिति हेतोः पाते शीघ्रफलं नाम स्वग्रहसं
बंधि शीघ्रफलं पाते विलोमं कृत्वा एतदुक्तं भवति ॥ स्वग्रहसंबंधि शीघ्रफलं ग्रहे चेद्ध
नं कृतं तदा तदेव शीघ्रफलं पाते ऋणं विधेयं अथ ग्रहे चेदृणं कृतं स्यात् तर्हि तदे
व शीघ्रफलं पाते धनं विधेयमित्यर्थः ॥ एवं रीत्या स्वग्रहसंबंधि शीघ्रफलं पाते
विलोमं कृत्वा नाम व्यस्तं संस्कृत्य तैः पुनस्तेन नाम तादृशेन पातेन स्फुटयात्
युतात् शरः अथवा स्यात् ॥ एतदुक्तं स्यात् ॥ तादृशेन पातेन युतात्स्फुटात् ग्रहात्
नाम फलद्वयसंस्कृतमध्यग्रहात् युतात् उक्तरीत्या शरः अथवा नाम प्रकारांतरे
ण सर्वं तुल्यमेव भवति ॥ तथा च ॥ शीघ्रफलं व्यस्तं ग्रहे संस्कृतं चेन्मंदस्पष्टो भवति
तत्र पातो योज्यः ॥ इति पाते एव शीघ्रफलं व्यस्तं कृत्वा तद्युतः स्पष्टग्रहः कृतः ॥ उभयथा

युतात् शरसाधनं श्रीपतिना सम्यगुक्तः ॥ अत एव
स्पष्टयोजनार्थं मृदुचलफलैर्युपातं तस्य विक्षिप्तिर्द्धा
कृष्टिमुत सितपाते शीघ्रमंत्यं परेषामित्यनेन तेनैव
॥ तदग्रे स्पष्टमुक्तम् ॥

॥ बात् सपातमंदस्पष्टग्रहस्यैव सिद्धो भ
वति ॥ अतः स्पष्टपातादस्मात्स्पष्टग्रह विक्षेपात् ॥

तीवं = २

तदा =

१यः चंद्रपातस्तेन १=८

॥ नन्वेवं चंद्रस्य द्राक्कप्रतिवृत्ता ऽभावात् । मंदप्रतिवृत्ते ऽधिष्ठानकल्पनात् । न
त्र च मध्यग्रहभोगसञ्ज्ञावाङ्गणितागतपातयुक्तस्पष्टचंद्रात्तत्साधनमु
क्तं न च तत्रस्फुटचंद्रा ऽनुक्तेः केवलचंद्रपदेन मध्य एवेति वाच्यं । ॥ केवल
चंद्रपदात्सर्वत्र स्पष्टचंद्रस्याप्तेः तस्मान्मध्येत्य ऽनुक्त्या केवलचंद्रपदेन स्पष्टस्यै
वोपस्थितेरित्यत आह । ॥ चंद्रस्येति । ॥ १चंद्रस्य पातः कक्ष्यावलये । नाम । त्रिज्योत्पन्न
कक्ष्याशरवृत्तयोः संपाते ऽ२अर्थात् । प्रतिवृत्तयोः संपाते । न । भवति । नाम । प्रतिवृत्त
संबद्धकर्णव्यासार्धकक्ष्याशरवृत्तसंपाते । यतः न भवति । अतः कारणात् । मध्यम
पातयुक्तान्मध्यग्रहवद्गताऽहर्गणा ऽनुपातसिद्धात्युक्तात्स्पष्टाच्चन्द्रा
च्छरः साधितः । ॥ अन्यथा मंदकर्णाऽनुपातोत्पत्तेः । ॥ अत एव भौमादीनां भगो
ले एव गणितागतपातकल्पनमपि निरस्तं । ॥ एतत्सविस्तरं ग्रहच्छायाधिकारे
शरसाधनवासनायां सम्यग् प्रपंचितम् । ॥ इत्यलम् । ॥२२॥ अथ प्रसंगात्सितज्ञपातौ ।
स्फुटौ स्तः अतश्चलकेंद्रयुक्ताविति तयोरुपपत्तिं चैव संततिलकयाह । ॥ मू । ॥ ये चाग्रपातभगणाः प
ठितास्तु भग्रहे तेषु शीघ्रकेन्द्रभगणैरधिकायतः स्युः ॥ स्वल्पाः सुखार्थमुदिताश्च लकेन्द्रयुक्तौ पा

१हिनामयतः कारणात् २=

१नाम=८

१लि=६

१स्फुटयाद्विधोः नाम=८

१११

॥ नाम ॥ = २

॥टी॰॥ जम्भेज्या: नाम॰ बुधभृग्वोः पातभगणाः अत्र नाम॰ अस्मिन् ग्रंथे मध्यमाधिकारे भगणा
ध्याये गजाष्टिभगैरित्यादिना कुष्माराः ५२१ त्रिनन्दनागाः ८९३ इति येषु यत् संख्यामिताः निबद्धाः
चकारात् सूर्यसिद्धान्तादि ग्रन्थोक्ताः ग्राह्याः ॥ ते भगणाः यतः नाम यस्मात्कारणात् शीघ्र
केन्द्रभगणैरधिकाः सु: नाम॰ स्ते[...]ग्रन्थोक्ताः पातभगणाः स्व २ शीघ्रकेन्द्रभगणैः अधि
काः नाम॰ युताः संतः तत्तद्भगणाः वास्तवाः यतः स्युः अर्थात् बुधभृग्वोः ये पठिताः पातभ
गणाः ते स्वशीघ्रकेन्द्रभगणैः युताः संतः तयोर्भगणाः वास्तवा यतः भवंति ॥ अतः कारणा
त्॰ तयोः बुधभृग्वोः पठितचक्रभवौ नाम॰ पठितभगणोत्पन्नौ तत्पातौ क्रमेण तयोः
बुधभृग्वोश्चलकेन्द्राभ्यां युक्तौ नाम विधेयौ नाम कार्यौ॰ वास्तवपातज्ञानार्थमि
ति तात्पर्यः ॥ नन्वेवं तादृशा भगणा एव कथं नोक्ताः ॥ इत्यत आह ॥ स्वल्पा इति ॥ सुखा
र्थं नाम॰ गणितसौकर्यार्थं स्वल्पाः नाम॰ वास्तवभगणैकदेशखंडरूपास्ते सुखार्थं उदि
ताः नाम॰ उक्ताः ॥२३॥ नन्वेवं स्फुटमध्यात्स्वपातयुक्तात् बुधभृग्वोः शीघ्रादिति॰ ॥ सू = ५
व्रह्मगुप्तेन बुधभृग्वोः शरपातनं शीघ्राच्च साधितशरस्तद्योगात्कथमुक्तं॰ नहि शी ॥ साध = ४
घ्राच्च साधितशरस्तयोः संभवति ॥ अन्यथा भौमगुरुशनीनामपि मध्यसूर्याच्छर
साधनापत्तेरित्यतस्तत्समाधानमुपजातिकयाह ॥ मू॰ ॥ चलादि शोध्या किलकेन्द्रसि
ध्यै केन्द्रे सपातेषु चरस्य योज्यः ॥ अतश्चलात्पातयुतात् जम्भेज्याः सुधीभिराद्यैः शर

॥ कुजादीनां शरसाधनं ॥ सूर्यस्पष्टसाधनं ॥ २४ ॥ स्पष्टाधिकार्य स्पष्टशरप्रमाणे ॥

॥टी॥ किल इति निश्चयेन· चलात् नाम शीघ्रोच्चात् केन्द्रसिध्यै· नाम· केंद्रसिध्यर्थं द्युचरः
नाम· मध्यमग्रहः विशोध्यः नाम· शोधनीयः॥ सपाते· नाम पठितं भगणोत्पन्नपातेन युक्ते·
केन्द्रे द्युचरः नाम· मंदस्पष्टग्रहः योज्यः नाम· योजनीयः अतः नाम· इति पर्यवसितं ता
त् अर्थात् आद्यैः नाम· ब्रह्मगुप्ताद्यैः सुधीभिः नाम चतुरैः लाघवात्· चलात्· नाम· शी
घ्रोच्चात् पातयुतात्· तम्भग्वोः नाम· बुधशुक्रयोः स्फुटसिद्धिः उक्ता· कथिता॥ मध्यग्रहयोः
शोध्यत्वे प्रयत्ने न तन्नाशाद्युच्चगणितागतपातयोगे मंदफलं यथागतसंस्कार्यं· उक्तः मंद
स्पष्टग्रहे मध्यग्रहान्मंदफलसंस्कारस्याऽधिकत्वात्· ~~अस्य~~ गोलभाष्ये· अतो मंदफ
लं पाते व्यस्तं देयं· इत्यत्र व्यस्तमिति पदच्छेदः कार्यः॥ यथागतमित्यर्थः॥ इत्यादि गोल
भाष्यस्य व्याख्यानं सर्वं मरीच्यां द्रष्टव्यम्·॥ ~~तत्राचार्यैर्मतान्तरं~~ तत्र ब्रह्मगुप्तादिम
तनिरासोऽपि कृतः॥ मया तु विस्तरभयात् नोपपादितः॥ गोलभाष्यः॥ इत्यलम्·॥ २४॥
॥ अथ बुधशुक्रयोः शीघ्रकेन्द्रयुतगणितागतपातस्य मध्यमपातत्वसिद्धेस्तस्य मंदस्पष्टग्रह
योजनयोग्यत्वं चेत्तर्हि स्पष्टग्रहयोजनयोग्यस्पष्टपातस्य स्वरूपं किं सिद्धमित्यत्र तस्य द्युतरं
स्फुटमध्यपातयोर्गोले दर्शयंस्तं चोपजातिकाभ्यां प्रतिपादयति·॥ मू·॥ स्फुटोन शीघ्रो
च्चयुतौ स्फुटौ तयोः पातौ भगोले स्फुट एव पातः॥ ग्रहस्य गोले कथितापमंडलप्रकल्प्य कक्षा

^नाम=१

॥ टी · ॥ तयोः नाम · बुधशुक्रयोः पातौ पूर्वोक्तभगोलस्थनौयौ पातौ · तौ · स्फुटोनशीघ्रोच्चयुतौ
क्रमेण बुधशुक्रयोः स्फुटौ पातौ भवतः ॥ स्फुटोनशीघ्रोच्चयुतौ अत्र स्फुटशब्देन स्पष्टौ बुध
शुक्रौ ताभ्यामूनेस्वशीघ्रोच्चे यथागतमंदसंस्कृते ताभ्यां क्रमेण युतौ भगोलस्थनौ पातौ ·
स्फुटौ पातौ भवतः ॥ मध्यशीघ्रकेन्द्रयुतगणितागतपातरूपमध्यमपातस्य व्यस्तशीघ्र
फलसंस्कृतस्य स्पष्टत्वोक्तेस्तस्यात्र सिद्धत्वात् · ॥ इत्यलं विशेषजिज्ञासुभिः मरीची द्रष्ट
व्याऽत्र · ॥ अथ निरुक्तगोले स्फुटपातस्थानं दर्शयति · ॥ भगोले इति · ॥ भगोले नाम उक्तप्रकारे

^स्फु=६

ण निबद्धे भगोले · पातः नाम · शरक्रांतिवृत्तयोः संपातः स्फुटपातः एव · ॥ अत्र एवकार
स्तु · तत्र मध्यपातत्वाऽभावसूचनाय · ॥ तत्संपातस्य स्फुटविक्षेपस्थानांकनेन तत्स्था
नयोर्विरचितत्वात् ॥ अथ मध्यमपातस्थलप्रदर्शनार्थं इत्तविशेषं तत्स्थानमाह ॥
ग्रहस्येति · ॥ ग्रहस्य गोले · नाम · ग्रहगोले · यथोत्तरभवो यः कथितावमंडले · नाम · निरुक्त
प्रकारेण क्रांतिवृत्तं · भगोले तन्निबंधनवन्निबध्यं · तत् कदंबावलयेप्रकल्प्य · पुनः
यथोदितं शीघ्रप्रतिवृत्तं · नाम · यथा · छेद्यकोक्तप्रकारेण निबध्नं शीघ्रप्रतिवृत्तं तस्मात्
तथा निबुध्य · पुनरस्मिन् शीघ्रप्रतिवृत्ते तत्पठिते · ~~प्रसरो~~ नाम · तस्य ग्रहस्य कक्षा
याधिकारोक्तेः शरांशैः षष्टिभक्तशरकलामितैः विमण्डलं निबध्य · अत्र नाम · विमंड
ले · तत्संपाते · द्युसदां नाम ग्रहाणां · मध्यः पातः
नाम · गणितागतः पातः देयः ॥ ननूक्तरीत्या कर्ण ॥ व्यासार्धवृत्तयोः संपाते · ॥

शीघ्रप्रतिवृत्तवि
मंडलयोः संपाते

४त=२

बुधशुक्रयोः अहर्गणात्तुपातसिद्धः पातभोगो न भवत्यन्येषां तु भवतीति कथमेतदनु
गतं नोक्तमतस्त्वाह ॥ तच्छेद्योरिति ॥ तच्छेद्योः नाम बुधशुक्रयोः गणितागतपातौ स्वशीघ्र
केन्द्रेणयुतः सन् देयः नाम स्वस्वमध्यमशीघ्रकेन्द्रेणयोज्यः सन् पातत्वेन ज्ञेयः न केवलस्तथा च ॥
तत्स्वपातेगणितागतयुक्तमध्यमशीघ्रकेन्द्ररूप बुधशुक्रयोः वास्तवमध्यपातभोगस्य दर्शनात्तस्य
स्फुगवेतिभावः ॥ एतेन प्राग्युक्तं छेद्यकं गोलान्तर्गतमित्युक्तं स्पष्टम् ॥ प्रथमद्वितीये आद्यतृतीयच
तुर्थचरणः वंशस्थस्य द्वितीयचरणस्त्विन्द्रवज्रायाः इतीदं छन्दो न प्रचुरप्रयोगविषयं तथापि
तदानंत्यान्न दोषः ॥ आद्यचरणे पातक इति पाठ इंद्रवंशेन्द्रवंशाभ्यां मिश्रितत्वादुपजातिका
या वा ॥ २६ ॥ अथ युरात्रवृत्तनिबंधनं स्त्रिविधमाह ॥ मू ॥ ईप्सितक्रान्तितुल्यान्तरे सर्वतो
नाडिकाख्याद्दहोरात्रवृत्ताकृतिं ॥ तत्र बध्वा घटीनां च षष्ट्याङ्कयेद् स्पविष्कंभ
ङ्घुजीवामिता ॥ २७ ॥ टी ॥ नाडिकाख्यात् नाम विषुवद्वृत्तात् उत्तरतो दक्षिणतो
वा सर्वतोऽस्तद्वृत्ताऽभितस्तद्दिशि ईप्सितक्रान्तितुल्ये अन्तरे नाम अभीष्टक्रान्तितुल्ये
अन्तरे अहोरात्रवृत्ताकृतिं वंशशलाकजं वृत्तं तत्र नाम गोले बध्वा पुनस्तद्वृत्ते घ
टीनां षष्ट्याङ्कयेत् ॥ चकाराद्भागाद्यंकयेत् ॥ पुनरस्य वृत्तस्य विष्कंभार्धं
(२)॥ [illegible] ज्या वेति पादनादेतत्सर्वोक्ततुल्यं नेत्यत आह

अहोरात्र=१

ङं नाम व्यासार्धं ६ विज्ञानामकं ग्रहज्या मतलानामकं
पूर्वं गणितागतं [illegible] ॥२७॥
सत्यसिद्धि ४ जु. १ पं.

(श्रीः)
२२३

113

॥ ननु भगोले वृत्तिदेशं क्रांतिवृत्ते शरवृत्ते वा क्रांति तुल्यांतरस्याऽनेकत्वसंभवात्कस्य
प्रदेशस्य क्रांति तुल्यांतरग्रहणेन द्युरात्रवृत्तं निबंधनीयमन्यथा विनिगमना विरहेण तत्
त्क्रांति प्रदेशानुरोधेन तन्निबंधने पूर्वेद्युवृत्ते नानामाच्छादितत्वेन तत्संस्थाज्ञानस्याऽ
नुपपत्तेरित्यत उपगीत्याह ॥ मू० ॥ अथ कल्प्यामेषाद्या अनुलोमं क्रान्तिपाताङ्का
त् ॥ एषांमेषादीनां द्युरात्रवृत्तानि वध्नीयात् ॥ २८ ॥ टी० ॥ ~~विक्षेपवशेन तत्~~ श्री
अथ नाम उक्तद्युरात्रवृत्तस्वरूपेण तदनेकत्वसंभावनया गोलाद्यादनेसंभवात्तत्
तन्निबंधनमनुचित्तयद्याशंकसे तर्हि क्रांतिपातांकात् नाम क्रांतिपातचिन्हस्था
नात् अनुलोमं नाम सव्यक्रमेण राश्यंकेन क्रमानुरोधेन मेषाद्याः द्वादशराशयः
कल्प्याः ॥ एतेन रेवतीस्थानाद्येमेषादिराशयोंकितास्त एव वास्तवा ग्रहभोगगण
नार्थमेते अवास्तवा गोलाइति स्पष्टं सायनपक्षो निरस्तः ॥ अवास्तवाः किमर्थं
कल्पनीया इत्यत आह ॥ एषामिति ॥ एषां विषुवत्क्रांतिवृत्तसंपातस्थानाऽवधिक
कल्पिताऽवास्तवानां मेषादीनां राश्यंतप्रदेशानां उक्तरीत्या द्युरात्रवृत्तानि वध्नीयात्
वास्तवराशीनामनियतस्थानत्वात् ॥ शरवृत्ते चानियतं अतस्तत्संबंधेन द्युरात्रवृत्ते
तत्संबंधेन कल्प्यमिति शेषः॥२८॥

॥ ननु क्रांतिवृत्तस्य गोले तिर्यक्त्वात् द्वादशराशीनां द्युरात्रवृत्तानि भिन्नानि बहूनि मध्या
क्यानि अतस्तदुत्तरं वदन् उक्तभगोलवंधमुपसंहरंश्चाऽस्पष्टमीत्याह ॥ मू ॥ नाडीवृ
त्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमात्तानि ॥ एष भगोलः कथितः खेचरगोलोऽप्ययमे
व विज्ञेयः ॥ २८ ॥ टी ॥ क्रांतिपातांकादारभ्य त्रिंशता त्रिंशता भागैरन्यान्मेषादीन्
नू ३ कल्प्य तदग्रे शृंक्तवद्दहोरात्रवृत्तानि वध्नीयात् ॥ तानि च नाडीवृत्तोभयते
स्त्रीणि त्रीणि भवंति ॥ तान्येव क्रमोत्क्रमतः सायनांशार्कस्य द्वादश राशीनां वृत्ता
नि ॥ तथाहि ॥ मेषांतवृषांतमिथुनांतप्रदेशानां द्युरात्रवृत्तानि वक्ष्यानि तदनंतरं
कर्कांतानि वृद्ध्युरात्रवृत्तं वृषांतवक्ष्युरात्रवृत्ताकारत्वेन तदभिन्नमेवं सिंहांत ^
द्युरात्रवृत्तं मेषांतद्युरात्रवृत्ताभिन्नं कन्यांतद्युरात्रवृत्तं विषुवद्वृत्तं ॥ एवं दक्षिणगोलस्य
राशिष्वपि ॥ श्लोकार्थः ॥ नाडीवृत्तोभयतः नाम विषुवद्वृत्तात् उभयतः नाम उत्तर
दक्षिणभागे नाडिकावृत्तासन्नक्रमेण त्रीणि त्रीणि तानि वृत्तानि क्रमोत्क्रमात् वध्नीयानि
अर्थात् नाडीवृत्तात् उत्तरभागे मेषवृषमिथुनांतानां द्युरात्रवृत्तानि तान्येव व्युत्क्रमात् कर्कसिंह
कन्यादीनां वृत्तानि ॥ एवं हि नाडीवृत्तात् दक्षिणभागे त्रीणि द्युरात्रवृत्तानि क्रमेण तुलवृश्चिकधन्वं

[तानां तान्येव व्युत्क्रमात् मकरकुंभमीनादीनां इति ष
॥ २८ अतो राश्युदयखंडानि गोले न द्वादशभिन्नानि ॥]

श्रीः
१९४

॥ननु अयं वद्धो गोलो भगोलरूत्तग्रहरूत्तादिसंवंधात् भगोलः ग्रहगोलो वा· इत्यत आह॥ एष इति·॥
१ यः·२ कथितः एषः गोलः स भगोल एव॥ भगोलरूत्तसंवंधात् ग्रहश्चारवृत्तादिकं च प्रसंगादुक्तं न प्रा
धान्येन॥ ननु वध्नीयाच्छशिसौम्ये त्यादिना पूर्वं ग्रहगोलानामुद्दिष्टत्वात् ग्रहगोलाः कथं नो
नोक्ताः इत्यत आह॥ खे च र गोल इति·॥ अयमेव· नाम उक्त भगोल एव ग्रहाणां गोलः विज्ञेयः
115 एवकारोऽपृथे॥ तेनास्य भगोलत्वं ग्रहगोलत्वं च· उभयसंवंधादुभयं· अन्यथा विनिगमना
विरहापत्तेः॥२९॥ ननु तथापि ग्रहाणामत्र भगोलाधः स्थितत्वस्य परस्पराधः स्थिरत्व
स्य परस्पराधः स्थितत्वस्य वा दर्शनादुद्दिष्टगोलक्रमविरुद्धमित्यतो पगीत्याह॥ मू·॥ अ
१ स्ता=६ गाप मंडले वा सूत्राधारे रधश्चतस्यैव॥ शन्यादीनां कक्ष्या वध्नीया दूर्णीनाभजालाभाः॥३०॥
१ नाम=५ ॥टी·॥ अत्र भगोलाख्य निवद्ध गोले अप मंडले क्रांतिवृत्ते· तस्य एव अधः नामः क्रांतिवृत्त
स्याऽनुसूत्वाऽऽकाशमार्गे [illegible] ण एवाऽधो भागे· शन्यादीनां श·गु·भौ·सू·शु·बु·चंद्राणां
१ दि=३ कक्ष्याः वंशशलाकावृत्तात्मकाः वध्नीयात्॥ नन्वाकाशे तदाकारतया कथं तन्निवंधनं
शक्यमत आह॥ सूत्राधारेस्ताः कक्ष्याः वध्नीयात्॥ तथा च·॥ क्रांतिवृत्ते समांतरेण चंदा
दिचिन्हानि कार्याणि लग्नप्रत्येकं सूत्रं वध्वा तत्सूत्रे क्रमेण शन्यादीनां कक्ष्याश्चतुः स्थाने निवं

[illegible]

॥ननु सर्वाः कक्षाः तदधोभागे पंक्तिक्रमेण निबद्धुमशक्याः क्रांतिवृत्तस्य सूक्ष्मत्वादित्यत
आह॥ कक्षाः किंवत् निबध्नीयात्॥ ऊर्णनाभजालाभाः॥ ऊर्णनाभो उदरे यस्यासौ ऊर्ण
नाभः ऊर्णनाभस्य जालः ऊर्णनाभजालः ऊर्णनाभजालस्य आभाः इति ऊर्णनाभजालाभाः
ऊर्णनाभजालशदृशा इत्यर्थः यथा तदृश्मिजाले उपरिमंडलं वृहत्तत् तदधो मंडलं लघुः
पुनस्तदधो मंडलं ततोपि लघुः एवं क्रांतिवृत्तमध्यस्थाने कक्षावृत्तं शनिकक्षावृत्तमध्ये श
निकक्षावृत्तात्लघु भूतं गुरुकक्षावृत्तं तन्मध्येपि भौमादीनां एवं सर्वेभ्यः लघुवृत्तं चंद्रक
क्षायाः वृहत्तरवृत्तं नक्षत्रमंडलस्य क्रांतिवृत्तएव नक्षत्रमंडलमित्यर्थः॥३०॥ ननु नक्षत्रग्र
हाणां भ्रमणदर्शनात् केवलनिबद्धगोले भ्रमणदर्शनमनुपपन्नमित्यतो पगीत्याह॥ मू॥ब
ध्वाभगोलमेवं यष्ट्यांयष्टिं खगोलनलिकांतः॥ प्रक्षिप्य भ्रमयेत्तं यष्ट्याधारं स्थिरौ
खदृग्गोलौ॥३१॥ टी॥ एवं नाम उक्तप्रकारेण यष्ट्यांनाम ध्रुवयष्ट्यां भगोलं ग्रहा
गोलसहितं बध्वा नाम निष्पाद्य पुनः तां यष्टिं खगोलनलिकांतः शिथिलां प्रक्षिप्य
पुनः यष्ट्याधारं खदृग्गोलौ यथास्थिरौ भवतः तथा कृत्वा पश्चात् तं नाम निबद्धं
भगोलं प्रत्यहं भ्रमणानुरोधेन पश्चिमाभिमु
खं भ्रमयेत् नाम चालयेत्॥३१॥ श्रीएक॥

*नाम खगोलदृग्गोलौ=१

॥श्रीः॥
११५

॥अथाऽऽऽर्थोऽधिकारोनिरूपितः इतिकक्षिकयाह॥ मू.॥इतिगोलेगोलवंधाधिकारः॥
इतिस्पष्टं॥ अथस्वनामोल्लाटनंटिप्पणीकारः॥ अनुष्टुभाह॥ आसीज्ज्वालामुखीक्षे-
त्रे शालिग्रामेतिविश्रुतः॥ तेनसम्यक्कृताटीकासंक्षिप्तागोलवंधने १ मयूखमाल
यासार्धंयेपठंतिशिरोमणिं॥ तेषांतत्त्वतयाज्ञानंबालानांजायतेक्षणात्॥२॥इ
तिश्रीदैवज्ञशालिग्रामविरचितायांसिद्धांतशिरोमणिटीकामयूखमालायांगो-
लाध्यायेगोलवंधाधिकारःसमाप्तः॥संवत्.१९४४ आश्विनप्र.२४ जम्बूक्षेत्रे॥श्रीः

115



॥ॐश्रीगणेशायनमः॥संवत् १९४५ आषाढ़ प्र ८ प्रारंभः॥ महदह॰ किमहोरजनीतनु
रित्यादि॰ दर्शयन्ते ऽसंख्यामित्यंतं निबद्ध प्रश्नानामुत्तरं विनागोलज्ञानमशक्यमतः
प्राक् गोलनिबंधनं निरूप्य पश्चात् तत्प्रश्नोत्तरोपपादनाधिकारोयस्तदध्यो व्याख्या
यते॥ तत्रमहद्दहरित्यादि प्रश्नोत्तरं विवक्षुः प्रथमं तदुपयोगी श्वोऽवशिष्टप्रश्नस्य
किं चरमित्यस्योत्तरं चरस्वरूपप्रतिपादनमुपजातिकयाह॥ मू॰॥ उन्मण्डलक्ष्मावल
यान्तराले द्युरात्रवृत्ते चरखण्डकालः॥ तज्ज्याग कुज्या चरशिञ्जिनीस्याद्द्यासार्द्ध
वृत्तेपरिणामितासा॥१॥टी॰॥ क्षितिजोन्मण्डलयोर्मध्ये द्युरात्रवृत्ते नाम अहोरात्रवृ
त्तप्रदेशे यावान्कालः स चरखंडकालः चरार्द्धकाल इत्यर्थः षष्ट्यंकितत्वात्॥ ननु तद्
ज्ञानमशक्यमत आह॥ तज्ज्येति॥ तस्यकालस्य [illegible] या ज्या नाम या ऽर्द्धज्या अर्थात् उन्मं
डलात् उभयश्चरार्धकालतुल्यांतरेण द्युरात्रवृत्तचिन्हयोर्बद्ध सूत्रार्धरूपाऽत्र नामद्यु
रात्रवृत्तेद्युज्यामिततिज्याप्रमाणेन या ज्या सा कुज्या॥ अत्र शास्त्रे सर्वत्र ज्या शब्देनार्ध
ज्यायाः स्वीकारात्॥ तथा च॥ स्पष्टाधिकारोक्ता या कुज्या सैवएतच्चरस्य ज्या॥
तच्चापमेमयी थी चरखंडकालस्त दृज्ञानमशक्यं नेति भावः॥ ननु तथापि

द्युज्याप्रमाणसिद्ध ज्यायाः उक्तप्रकारेण धनुः कथं भवति तस्य त्रिज्यानुरुद्धत्वेन द्युज्यानु
रुद्धत्वाऽभावादित्यत आह ॥ चरशिंजिनीति ॥ सा कुज्या व्यासार्धवृत्ते परिणामिता स ॥ अनुपातेन=२
ती चरशिंजिनी चरज्या स्यात् ॥ तथा च ॥ द्युज्यया इयं कुज्या तदा त्रिज्यया व्यासा ॥ नाम=३
र्धेन का इत्यनुपाततः तस्याः कुज्यायाः त्रिज्यानुरुद्धत्वात् ॥ अतस्तस्याः कुज्या-
याः चापमुक्तप्रकारेण युक्तमेवेति भावः ॥ एतेन उन्मंडलक्षितिजवृत्तसंलग्न
द्युरात्रवृत्तप्रदेशयोर्बद्धसूत्रं कुज्या इति कस्यचिदुक्तं निरस्तं ॥ तस्य पूर्णज्यात्वेन
तच्चापकरणाऽनुपपत्तेः ॥ १ ॥ ननु चरकालस्य तथात्वेऽपि सिद्धे परं तु ग्रहे तच्चालन
फलसंस्कारः किमर्थमत उपजातिकयाह ॥ मू ॥ निरक्षदेशे क्षितिजाख्यवृत्तमुन्मं
डलं तज्जगुरन्यदेशे ॥ स्वे स्वे कुजेऽर्कस्य समुद्गमोऽस्माच्चरार्धमर्कोदययोस्तु मध्ये ॥ २ ॥
॥ टी ॥ निरक्षदेशे यत् क्षितिजसंज्ञं वृत्तं तद्वृत्तमन्यदेशे नाम तत्क्षितिजसंबंधि निर
क्षदेशादुत्तरस्थन्यस्मिन्देशे उन्मंडलसंज्ञं जगुः पूर्वाचार्याः ॥ एतेन लंकाक्षितिजं रे
खादेशे उन्मंडलं नान्यत्र एवमन्यत्राऽप्यूह्यम् ॥ तथा च ॥ उन्मंडलक्ष्मावलयांत
राले इत्यादिना स्वदेशास्वनिरक्षदेशक्षितिजवृत्तयोरंतरालस्थितद्युरात्रवृत्तप्रदेशा

॥ का॰ प्र॰ २६ प्रारंभः ॥

॥ ननु तदंतरस्य कालत्वं कुतो ग्रहादि तद्योजक क्रियया संबंधाऽभावात्॰ अत उक्तं आह॥ स्वे स्वे
इति॥ यस्माद्धेतोः स्वे स्वे कुजे क्षितिजेऽर्कस्य सूर्यस्य समुद्गमः उदयः स्यात्॰ अस्माद्धेतोः अर्को
दययोः चकाराद्दर्कास्तयोः मध्ये अंतराले चरार्धं मौ सूर्यस्य चरकालः सिद्धः॥ अर्थात् स्वे
स्वे क्षितिजे अर्कस्य समुद्गमः एतदुपलक्षणं दस्तश्च स्यात्॰ उन्मंडले लघुरात्रवृत्त प्रदेशस्थित
सूर्यस्य निरक्षदेशे उदयास्तौ॰ स्वदेशे क्षितिज वृत्ते लघु रात्रवृत्त प्रदेशसक्ते सूर्यस्योदया
स्तौ॰॥ सूर्य इत्युपलक्षणं विशेषतः प्रत्यक्षत्वात् तद्ग्रहणम्॰॥ यस्माद्धेतो रर्कोदययोश्च
निरक्षस्वदेशसंबद्धयोर्मध्ये अंतराले चरार्धं सूर्यस्य चरकालः एत
काराद्दर्कास्तयोः स्वनिरक्ष स्वदेश संबद्धयोर्मध्ये अंतराले चरार्धं सूर्यस्य चरकालः एत
कारादर्कास्तयोः ॥ तथाच॥ ग्रहाणां लंका
दुपलक्षणात् ग्रहोदयास्तादयोर्अंतरं कालो ग्रह चरात्मकः॥ तथाच॥ ग्रहाणां लंका
र्कोदयकालिकानां देशांतर संस्कारेण स्वनिरक्षदेशार्कोदयकालिकत्वसिद्धेश्चरसंस्कारेण
स्वदेशार्कोदयकालिकत्वसिद्धमिति भावः॥ इत्युक्तं मरीचौ मुनीश्वरैः॥ मममतं त्विदं॥
ग्रहाणां उदयांतर संस्कारेण लंकार्कोदय कालिकत्वं चरसंस्कारेण स्वरेखा देशार्कोदयकालिकत्वं
देशांतर संस्कारेण स्वदेशार्कोदयकालिकत्वं सिद्धमिति भावः॥ २॥ अथ प्रसंगाच्चरघ्न भु
क्तिद्युनिशासु भक्तेत्यादिनोक्त चर फल धनर्ण संस्कार वासनामुपजातिकयाह॥ मूः॥
आर्कोस्वदेशेथ निरक्षदेशे सूर्योदयो यास्तमयो न्यथातः॥ ऋणं ग्रहे स्यादुदये स्वमस्ते फलं

चरोत्थं रविसौम्यगोले॥ ३॥ श्रीकृष्णायनमः॥

॥श्री॥
११७

117

॥टी०॥हि॰ अतः रविः सौम्यगोले० रवौ उत्तरगोलस्थिते० स्वदेशे आदौ नाम प्रथमं सूर्यो
दयः अथ नाम तदनंतरं चरकालेन तुल्यकाले० स्वनिरक्षदेशे सूर्योदयः॥ अतः ना
म० उदयस्थितेः सकाशादन्यथा नाम वैपरीत्येन सूर्यास्तमयः॥ वैपरीत्यं लिख्यं०॥निरक्ष
देशे प्रथमं सूर्यास्तः॥ तदनंतरं चरकालेन तुल्यसमये स्वदेशे सूर्यास्तः॥ अत्र स्वक्षि
तिजवृत्तादुन्मंडलस्य ऊर्ध्वस्थत्वात्० अस्मात्कारणात् चरोत्थं नाम चरकालोत्पन्नं फ
लं च रवेर्लत्वाद्यानीतं उदये नाम स्वसूर्योदयकालिकत्वसिध्यर्थं ग्रहे ऋणं क्रियते०
अस्ते० नाम० स्वदेशसूर्यास्तकालिकत्वसिध्यर्थं ग्रहे स्वं धनं क्रियते॥३॥ ननु उ
त्तरगोले तु चरफलेनयुतः सूर्योदयास्तयोः ग्रहः इति युक्तिसिद्धं दक्षिणगोले ग्रहः
सूर्योदयास्तयोस्तद्युतोनः इत्युक्तं वासनया सिद्धमित्यत उत्तरं गोलवासनां च प्रसंगा
दिंद्रवज्रयाह०॥ मू०॥ याम्ये विलोमं खलु तत्र यस्मादुन्मंडलं स्वक्षितिजादधस्तात्०॥
नाड्या स्वया दुत्तरयाम्यभागो गोलस्य तावुत्तरयाम्यगोलौ॥४॥टी०॥याम्ये दक्षिण
गोलस्थे सूर्ये० विलोमं० उक्तादैपरीत्यं० खलु० निश्चयेन० सूर्यस्य उदयास्तौ स्याताम्॥ एतदुक्तं
भवति०॥याम्यगोलस्थे सूर्ये प्रथमं निरक्षदेशेऽर्कोदयः तदनंतरं स्वदेशे सूर्योदयः सूर्या
स्तश्च प्रथमं स्वदेशे तदनंतरं निरक्षदेशे० अतः ग्रहस्य स्वदेशसूर्योदयास्तकालिकत्वसिध्य

॥श्रीगणेशाय नमः॥ चरफलं ग्रहे धनर्णं कार्यमित्युक्तम्॥ ...

शिव०
११७

॥ अत्र हेतुमाह ॥ तत्रेति ॥ तत्र नाम दक्षिणगोले यस्मात्कारणात् उन्मंडलं स्वदेश
भूगर्भ क्षितिजवृत्तादधस्तात् भवतीति गोले प्रत्यक्षं दृश्यते ॥ अस्मात्कारणात् याम्ये विलो
मं इत्युक्तं ॥ अथ प्रसंगात्सौम्यगोलः भदलं यदाद्यं याम्योपरमित्यत्रोपपत्तिमाह ॥ नाड्या
कृत्या दिति ॥ गोलस्य नाम भगोलस्य नाड्याकृत्या तत् नाम नाडिकावृत्तात् उभयतो द्वौ
यौ उत्तरयाम्यभागौ नाम उत्तरदक्षिणदिक्स्थौ गोलार्धभागौ तौ क्रमेण उत्तर
याम्यगोलौ नाम उत्तरदक्षिणगोलौ स्वदिक्संबंधात् स्यातां ॥ एतदुक्तं भवति
नाडिकावृत्तात् क्रांतिवृत्तस्य उत्तरदक्षिणयो रर्धत्वात्संपातात् उत्तरभागेक
ल्पितमेषादि षड्राशयः उत्तरगोलः ॥ संपातात् दक्षिणभागे कल्पित तुलादि
षड्राशयो याम्यगोलः ॥ इति प्राग्यदुक्तं व्युत्क्रमेवेति भावः ॥४॥ ~~अथ चरस्वरूपं प्रति~~
~~पाद्याह~~ ॥ अथ महद् इत्याद्युक्तप्रश्नस्योत्तरमुपजातिकयाह ॥ मू ॥ अतश्च
सौम्ये दिवसो महान् स्यात् रात्रिर्लघुर्व्यस्तमतश्च याम्ये ॥ धुरात्रवृत्ते क्षितिजादधः
स्थे रात्रिर्यतः स्याद्दिनमानमूर्ध्वे ॥५॥ टी ॥ सौम्ये नाम रवौ उत्तरगोलस्थिते
यतः कारणात् स्वनिरक्षदेशार्कोदयकालात्पूर्वं [illegible] स्वदेशेऽर्कोदयो भवति पुनः स्वनिरक्ष

देशाकालात् [illegible] कालात् पश्चात् स्वदेशे सूर्यास्तः श्च यतो भवति अतः कारणात् सौम्ये दिवसो महान् स्यात् नाम महत्प्रमाणं स्यात् रात्रिर्लघुः स्वल्पप्रमाणा ॥ स्यात् ॥

श्रीः
११८

118

॥ चकार एवकारार्थे तेन अन्य उराणोक्त कारणस्य निरासः ॥ याम्ये नाम रवौ दक्षि
ण गोलस्थे अतः नाम रवि उत्तर गोलस्थितेः सकाशात् व्यस्तं नाम विप
रीतं· रात्रिदिनयोर्मानं स्यात् दिनमल्पप्रमाणं रात्रिर्महती प्रमाणा स्यादित्यर्थः
~~चकार~~ स्वनिरक्षदेशे प्रथमं सूर्योदयः पुनः स्वदेशे उदयः ततः स्वदेशे सूर्या
स्तः पुनर्निरक्षदेशे सूर्यास्तः इति कारण ज्ञापनाय चकारस्य निवेशः ॥ अ
तः याम्ये व्यस्तमित्युक्तं ॥ ननूक्तोदयास्तयोर्वा पर्यभावेन दिनरात्र्योर्महत्त्व
मल्पत्वं च कुतः संभवतीत्यत आह ॥ यतः कारणात् क्षितिजादधःस्थे नाम
क्षितिजवृत्तात् अधःस्थिते द्युरात्रवृत्ते· नाम अहोरात्रवृत्ते तत्प्रदेशे रात्रिः स्यात्·
ऊर्ध्वे नाम क्षितिजवृत्तादूर्ध्वस्थित द्युरात्रवृत्ते तत्प्रदेशे दिनमानं स्यात् अ
त एव युक्तं तस्याहोरात्रवृत्तत्वं· तथा च· अहोरात्रवृत्ते भ्रमतः सूर्यस्य
क्षितिजवृत्तादूर्ध्वाधोभागयोः क्रमेण दर्शनाऽदर्शनसंभवात् उदयास्तयोः
पर्यभावेनैव रात्रिदिनयोरल्पत्वं महत्त्वं च भवतीत्युक्तं युक्तमेवेति भावः ॥५॥

शिव.
११८

नु २

॥ ननु स्वक्षितिजवृत्तस्य सर्वद्युरात्रवृत्तानामर्धे स्थित्यऽभावात् दिनरात्र्योरल्पम
हत्त्वमेतदुक्तं नयुक्तं ॥ निरक्षदेशे निरक्षक्षितिजस्य सर्वेषां द्युरात्रवृत्तानामर्धे स्थि
तिसद्भावात् दिनरात्र्योरल्पमहत्त्वाऽनुपपत्तिदर्शनादित्युत्तरं स्थलांतरस्थितवि
शेषोदृष्टांच उपजातिकयाह ॥ मू ॥ से सदा समत्वं द्युनिशोर्निरक्षे नो मंडलं तत्र कु
जात् यतोऽन्यत् ॥ षट्षष्टिभागाभ्यधिकाः पलांशाः यत्राथ तत्रास्त्यपरो विशेषः ॥ ६ ॥
टी ॥ निरक्षे निरक्षदेशे सर्वत्र द्युनिशोरहोरात्रयोः सदा नित्यं समत्वं नाम तुल्यत्वं ज्ञेयं त्रिं
शत् घटी मितत्वमित्यर्थः न मासावत् न्यूनाधिकत्वं विषुवद्दिने साक्ष्यदेशे पितयोस्तु
ल्यत्वं ॥ तत्र हेतुमाह ॥ यतः कारणात् तत्र नाम सर्वे निरक्षदेशे कुजात् नाम स्वक्षितिज
वृत्तात् अन्यत् नामभिन्नं उन्मंडलं न अस्ति ॥ ~~अतः निरक्षे द्युनिशोः सदा समत्वमि~~ कुतः
~~स्युक्तं~~ ॥ निरक्षदेशात् दक्षिणोत्तरसूत्रे ध्रुवद्वयोत्तरे च दत्ति रिक्त निरक्षदेशाऽभावात् भि
न्नमुन्मंडलं नास्ति ॥ तथाच ॥ निरक्षदेशे क्षितिजोन्मंडलयोरभेदात् दिनरात्र्योः समत्वं सिद्धं ॥
ननु यत्र देशे द्युरात्रवृत्तानां क्षितिजवृत्तेन संबंधो नास्ति तत्र देशे द्युरात्रवृत्ते क्षितिजाद
र्धस्थपरात्रियतः स्या दिनमान मूर्ध्वे इति लक्षणं कथं घटतीत्यत आह ॥ अर्थादुक्तलक्ष
णेऽव्याप्तिमाशंकसे तर्हि यत्र देशे षट्षष्टि ६६ भागाऽभ्यधिकाः पलांशाः ~~अक्षांशा~~

१ मितियावत् = ८

२ धाव द्वयमध्ये =

१ लंबानधिकक्रांतिसंबद्धद्युरात्रवृत्तानां क्षितिजसंबंधात् लंबाऽनधिकक्रांतिपर्यंतं निगदित रात्रिलक्षणस्य ४
२ सूपपन्नत्वं लंबाधिकक्रांतिसंबद्धद्युरात्रवृत्तानां क्षितिजवृत्तसंबंधाऽभावात् कथं ४ = नु ३ पं

नाम षड्षष्टि ६६ भागोऽभ्यधिकाः पलांशा यत्र

११८

॥ तत्रदेशे अपरः अन्यः विशेषः अस्ति अपरो विशेषः इत्यनेन उक्तदिनरात्रिलक्षण
मपि तत्रास्तीति सूचितं अन्योपि विशेषोस्ति च ॥ तत्कालविशिष्टतद्देशानामनन्तत्वान्नाऽ
व्याप्तिः ॥ तत्र तु दिनरात्र्योर्लक्षणं तत्रस्याप्यभ्युपगमादितिभावः ॥ ६॥ अथोद्दिष्टविशे
षमुपजातिकयाह ॥ मू० ॥ लंबाधिकाक्रांतिरुदक्चयावत् तावद्दिनं सन्ततमेव तत्र ॥ या
वच्चयाम्यासततं तमिस्रा तत्तश्चमेरौ सततं समार्धम् ॥ ७॥ टी० ॥ तत्र नाम षट्षष्ट्य
धिकांशदेशे उदक्नाम रवेः उत्तरा क्रांतिर्यावत् यत्कालपर्यंतं लंबाधिका नाम
स्वदेशलंबांशान्न न्यूना भवति तावत् तत्कालपर्यंतं सन्ततं नाम रात्र्याऽव्यवहितं त
त्रदेशे दिनं एव स्यात् ॥ एवकारस्तु तदूनोत्तरक्रांतिकाले तद्देशेऽहोरात्रमस्मद्देशा
वद्दिनेतरव्यवहितम् भवति ॥ याम्या दक्षिणा क्रांतिर्यावत् यत्कालपर्यं
तं स्वलंबांशादऽधिका तावत् तत्कालपर्यंतं सततं नाम दिनाऽव्यवहिता
तमिस्रा रात्रिर्भवति ॥ ननु मेरौ नवतिभागाऽस्तत्वात् लंबांशाऽभावात्
तदधिकन्यूनत्वक्रांतिभागेष्वऽसिद्धेस्तत्र कथमिदं लक्षणं संभवतीत्यत
आह ॥ ततश्चेति ॥



१२०

120

श्लो॰ ३४५०
नं ५२